Shri Raghunath Temple MSS. Library,
JAMMU

No. ४२८३

Title विधि रसायनम्.
सुखोपजीवनी.

Author अप्पयदीक्षितः

Extent १३९ Age ९

Subject पू॰ मीमांसा शास्त्रं

© Dharmartha Trust J&K. Digitized by eGangotri

विधिरसायनव्याख्या

४२८३

© Dharmartha Trust J&K. Digitized by eGangotri

मीमांसा

व्या

~~विधिरसायन व्याख्या~~

विधिरसायनव्याख्या

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशाय नमः ॥ उद्घाय योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः । यः
प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुंदः ॥१॥ जन्मस्थेमलयं समस्तजग
तां यस्यैव लीलायितं यस्मिन्नायतने भवस्थिरमहापुण्यक्षयः प्राणिनां । तद्ब्रह्मादिदुरध्यगम्यविभ
वं विश्वाधिकं शाश्वतं संसारखेलरसालमूलरसिकं पश्येम मंतर्दृशा ॥२॥ यत्कुमारिलमतानुसारि
णा निर्मितं विधिरसायनं मया । तस्य रूपमतिस्फुटाशयं तत्सुखावगतये विविच्यते ॥३॥ प्रा
रीप्सितप्रकरणविघ्नपरिसमाप्तये सूत्रकारस्य महर्षेरनुस्मरणरूपं मंगलमाचरन्नेव प्रक
रणारंभं तावदाक्षिप्य समाधत्ते ॥ विख्याता मुनिवर्यसूक्तिषु विधास्तिस्रो विधेस्तासामाद्या
यैर्विशदं विविक्तविषयास्ताश्च व्यवस्थापिताः ॥ किं तत्रास्ति विचार्यमार्यमखिलं मार्गे निसर्गो
ज्ज्वले नानोन्नाहशतैः कृताः प्रविभागीकर्तुं प्रवृत्तमिदं मुनिवर्यस्य भगवतो जैमिनेः सूत्रेषु
विधिवस्यादपूर्वं तान्नियमार्था वांश्कृतिरुच्यते परिसंख्येयेवमादिषु त्रयाणां विधिप्रकाराः प्र

© Dharmartha Trust J&K. Digitized by eGangotri

सिद्धा अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्चेति भट्टपादैः परस्परासंकीर्णविषयतया
स्पष्टमेवोपपादिताः । तत्स्थल एव निरवद्यो ग्रंथकारैश्च बहुभिर्निष्कर्षं प्रापितः पूर्वविध्यादिवि
भागे नूतनं किंचिद्विचारणीयं नास्त्येव । यद्यप्येवं तथाप्यपूर्वविध्यादीनां द्वादशस्वप्यध्या
येषु विप्रकीर्णे इहापूर्वविध्यादिलक्षणविचारव्याजेन तत्तत्र प्रदर्शनीयैरुदाहरणविशे
षैस्तमेवार्थमतिस्पष्टीकर्तुं प्रकरणमिदमारभ्यत इत्यर्थः ॥ अथ विधिरत्यंतमप्राप्तौ नियमः पा
क्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयत इति श्लोकेनाचार्यैरपूर्वविध्यादीनां ल
क्षणमुखेन विभागः कृतः । तत्र व्रीहीन्प्रोक्षतीत्यत्रापूर्वविधिः । एतदभावे हि दर्शपूर्णमा पौ ४
सिकेषु व्रीहिषु प्रोक्षणं कथमपि न प्राप्नोति । व्रीहीनवहंतीति नियमविधिः । एतदभावेपि पु
रोडाशार्थमुपात्तेषु व्रीहिषु तुषविमोके लोकसिद्धकारणत्वात्तदाक्षिप्तस्तयावघातः प्राप्नोति
वा किंतु लोकसिद्धकारणत्वाविशेषात्कदाचिन्नखविदलनमपि प्राप्नोतीति पाक्षिकी तस्या

© Dharmartha Trust J&K. Digitized by eGangotri

क्षेपतः प्राप्तिः॥ इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इति परिसंख्याविधिः। एतद
भावेप्यगृभ्णन्रशनामितिलिंगादश्ववयनप्रकरणाम्नातोमंत्रस्तत्रस्यैश्वरसनाग्रहणेनियं
2 तमेवप्राप्नोतीतिकिंतुलिंगविशेषात्तत्रस्यैगर्धभरशनाग्रहणेपिप्राप्नोतीतितत्रचान्यत्रैवप्रा
प्तिः। यद्यपिनियमपरिसंख्ययोरुभयोः पाक्षिकीनियताचप्राप्तिर्व्यक्ततोनास्यवृतुषविमो
केनकार्येणाक्षिप्तत्वात्स्वयमेवास्यपाक्षिकीप्राप्तिर्वक्तव्याआक्षेपात्कस्मागेवव्रीहीनवहं
तीतिप्रत्यक्षश्रुत्यैवप्रवर्त्तते तदनंतरंप्रत्यक्षशास्त्रसिद्धेनैकोपायेननैराकांक्ष्यादनिय
तोपायान्तरमेवनप्रवर्त्तते। एवंप्रत्यक्षशास्त्रेणाश्वरशनाग्रहणेघटितेनियुक्तस्यमंत्रस्याले विनि४
नैवनैराकांक्ष्याद्रशनाद्वयसाधारण्येनलैंगिकविधिपोगकल्पनेनप्रवर्त्तते। एवंचनियमप
रिसंख्ययोरप्युभयविधिवदुक्ततासंतांप्राप्तएवविषयस्तथापिनियमपरिसंख्याशास्त्रयो
१प रप्युदितोअर्थाक्षेपेणनखविदलनस्यापिकदाचित्प्राप्त्याचयातस्यपाक्षिकैवप्राप्तिःस्यात् २

© Dharmartha Trust J&K. Digitized by eGangotri

मंत्रस्य च लिंगाविशेषेण गर्दभरशनाग्रहणेऽपि विनियोगः स्यात्तयोः प्रवृत्तौ त्वाक्षेपमंत्रलिंगाभ्यां ना
२ नि रम्भेऽवधातवघातस्य नियततामंत्रस्य गर्दभरशनातो निवृत्तिश्च लभ्यत इति नियमपरिसंख्यावि
ध्योः अवघातावघातविध्यविशेषेऽपि आक्षेपमंत्रलिंगाभ्यां तत्प्रतिबंधद्वारावघातनियमेन गर्दभ
रशनायां मंत्रवर्जनेन च फलवत्त्वात्फलतो नियमपरिसंख्याव्यपदेश इति प्रतिबंध दात इत्यपू
र्वविधिलक्षणयोर्भेदः॥ यद्यपि नियमेन नखविदलनादिनिवृत्तिः परिसंख्यायां गर्दभरशनादिनिवृ
त्तिरितीतरनिवृत्तिलाभस्तूभयत्राप्यविशिष्टः अवघातेनैव तुषविमोकः कार्य अश्वरशनायामे
व मंत्रः कार्य इत्येवकारेण फलविवरणमप्यविशिष्टं तथाप्यवघातशास्त्रेणावघातनियमस्या
पेक्षितोऽवघातप्राप्त्यंशेषु अवघातप्रापणरूपस्याकरणेऽपायांतरसाधारणेनाक्षेपेणाप्रा
त प्तत्वादुपायांतरस्यानिराकर्तुमशक्यत्वात्तन्निवृत्त्यसंभवेन नियमस्य प्रथमोपस्थितत्वाद्विधेय
गतत्वेन प्रत्यासन्नलाभ्या प्राप्तांशपूरणरूपो नियम एव फलं उपायांतरनिवृत्तिस्तु वर भोषस्थि

© Dharmartha Trust J&K. Digitized by eGangotri

वि०र० तत्वाद्विधेयमुपगतत्वेन विप्रकृष्टत्वाच्च तदनुनिष्पादिनी नफली परिसंख्योदाहरणे तु द्वयोरपि नि शायनं

३ न त्यप्राप्तिसंभवेत्तत्स्वरूपप्राप्तेर्नियमस्यवा फलत्वायोगाद्द्वितरनिवृत्तिरेव फलं ॥ एवं नियम

परिसंख्याविध्योः फलभेदाभिधाने एवकारेण फलविवरणमेकत्रायोगव्यवच्छेदार्थमन्यत्रा —

न्ययोगव्यवच्छेदार्थमिति विशेषोऽनुसंधेयः ॥ एवमाचार्यश्लोकार्थं मनसि निधाय तत्र कांश्चि

3 दर्थानाक्षेपसमाधानाभ्यां विचारयितुं तत्क्रमपूर्वविधिलक्षणं तावदाक्षिपति ॥ अत्यं

ताप्राप्तियुक्ते विधिरिति विषये सप्तमी वर्ण्यते न चेत् अव्याप्तिः प्राप्तियुक्तं विषयमुपगतेष्व

ग्निविध्यादिषु स्यात् ॥ अग्रेहेरेव सप्तम्या विषयगतये योज्यते चेत्प्र नोकांक्षाज्ञोपयत विध्योः

२२ प्रथममप..नुपोः स्यात्तदव्याप्तिदोषः ॥ अत्यंतमप्राप्ते विधिरित्यपूर्वविधिलक्षणमयुक्तं ।

ननु स्यप्राप्तइति विषयस्सप्तमी .. स्यात् । आद्ये योगा विधिविषयत्वेनान्वेति तस्यैवाप्रा ३

१सतिसप्तमीवा१

तर३

© Dharmartha Trust J&K. Digitized by eGangotri

निर्वक्तव्या। द्वितीये विधिविषयस्य प्राप्तिस्तु पितदन्यस्य यस्य कस्यचिद्वाप्यालक्षणमु
पपद्यत इति विशेषः। तत्र विषयसप्तमीपक्षे विधिविषयत्वेनाभिमतस्य सर्वथा प्राप्तिर्विव
क्षिता उद्देश्यसंबंधित्वेन तथा। आग्नेय एवं विद्वानग्निं चिनुते अग्निहोत्रं जुहोति दधिमधु
घृतं धाना उदकं तंडुलास्तत्संसृष्टं प्राजापत्यमित्यादिविधिभिः स्वरूपेण प्राप्तानामग्न्युचितो
त्र प्राजापत्ययागादीनां क्रतुनिमित्तफलादिसंबंधार्थेषु यथा नोग्निमग्निष्टोमेनानुय
४ व जंति यो जीवमग्निहोत्रं जुहोति चित्रया यजेत पशुकाम इत्यादिविधिषूक्तो कर्तः स्वरू
पेण प्राप्तानां विदेवनादीनां राजसूयादिसंबंधार्थेषु पक्षेऽव्याप्ती त्यादिविधिषु चाव्या
प्तिः स्यात्। द्वितीये वै कृतेष्वग्निविधिष्वप्तिर्यास्य विधिषु चाव्याप्तिः स्यात्। तथाहि य एवं
विद्वानग्निं चिनुत इति प्रकृत्य श्रूयते। अथातोग्निमग्निष्टोमेनानुयजंति तमुक्थ्येन तमतिरा

© Dharmartha Trust J&K. Digitized by eGangotri

न्वेत्थलं द्विरभ्रेणैत्यादि। तत्राग्निं चिनुत इति वचनेनाग्निं संस्कुर्यादित्यर्थः॥ चयननिष्पादिते स्थं-
डिलेऽग्निं स्थापयेदिति यावत्। स्थंडिलनिष्पादकस्य चयनस्य साक्षादग्निसंस्कारकत्वायोगा-
त्। अतोऽग्निमिष्यादेश्चयननिष्पादिते स्थंडिले आहवनीयाग्निस्थापनानंतरं तस्मिन्नग्नावग्नि-
होमादि क्रियत इत्यर्थः। तथाग्निग्राह्यानामकेचनग्रहाः तानधिकृत्य श्रूयते। उक्थ्ये गृह्णीयादि-
ष्वग्निलिंग्याद्व्यात्यादि। तत्राग्निस्तावत्कृतावप्यस्ति। अग्निष्टोमेनानुयजंतीति विधानात्।
न च प्रकृतेः प्राकरणिकोऽत्र बोध्यविरोधात्त्रानारभ्यविहितोऽग्निर्ग्रहेषु गीयत इति तत्राग्निष्टो- नि ५
मपदं विकृत्याग्निष्टोमपरं स्यादिति वाच्यं प्राकरणेन वाक्यबाधायोगात्। न च यथा सप्तदश-
सामिधेनीरनुब्रूयादित्यनारभ्याधीतं साप्तदश्यं प्राकरणिकपांचदश्यविरोधात्क्रतोर्द- श्रीराम ४
र्शपूर्णमासयोर्निवेशमलभमानं मित्रविंदादिविकृतिगामि जातमेवमग्निरपि स्यादिति वा-
च्यं साप्तदश्यस्य हि सामधेनीमात्रसंबंधो वाक्येन नावगम्यते क्रतुसंबंधस्तस्यैव व्यर्थापि ४

© Dharmartha Trust J&K. Digitized by eGangotri

परिहारार्थमथाभिचारिकक्रतुसंबंधित्वाभिधेनोलिंगेनक्रतुंहृदयमागमय्यकाल्यायितव्याः पां
चरभ्यस्यतुप्रकरणवशात्स्वतएवबुद्धौविपरिवर्त्तमानेनक्रतुनासंबंधःक्लृप्तइतियुक्तमेवतं
त्रप्राकरणिकस्यबलवत्त्वंइत्युअग्निष्टोमशब्दःक्रतुमेवाभिधत्तइतितत्संबंधेवाक्येनक्लृ
तेप्रकरणेनवा धोनयुक्तः। तस्मात्तेनाभ्याधीतोप्यग्न्याधानस्कंडिलन्यागाग्निप्रकरणाम्ना र४
तयोस्तत्रुवेघाविकल्पितः प्रकृतौनिविधानइत्यस्तितत्रस्थापनेनसंस्कृतेआहवनीयोगिनःप्र म ५
कृतौएवमग्नियास्याउपिउपस्थानंवाएतद्धर्मस्ययदग्निराहुत्यइतिप्रकृतौविहिताःसंतिप्र ह ६४
कृतौस्तेनध्याग्न्युतियास्युः सर्वास्तुविकृतिष्वतिदेशेनेप्राप्नुवंतीतिकास्तुचित्तेषांश्रवणं
नतस्मान्न्यर्थं किंतुनलाश्रितगुणकामप्राप्त्यर्थं अग्न्याधानाश्रितानादिगुणकामाः श्रूयंते
श्येनचितं चिन्वीतस्वर्गकामइत्यादयस्तेचोदकान्नप्राप्नुवंति। अंगस्यादिस्तम्भोद

© Dharmartha Trust J&K. Digitized by eGangotri

काकथं भावः काङ्क्षा कस्यात्मालिः न तेषां आश्रितानां फलार्थगुणानां । तथा निर्णीतं चाष्टमाध्या
५ ये । गुणकामेष्वाश्रितत्वात् प्रवृत्तिः स्यात् । निवृत्तिर्वा कर्मभेदात् इति लिङ्गवेन्निरपेक्षत्वाभ्यां ।
एवं चान्यत्रैव व्याख्यातृणां प्रकृतौ काम्येषु ... विकृतिषु च उपदेशेन नास्त्यां प्रकृतेष्वसामानवि
ध्येषु तदाश्रिताः फलार्थगुणाः प्रकृताविव नास्मै विकृतिष्वपि प्राप्नुवंति । न च प्रकृता
चि४ वग्निकृतदेवयागस्य हविकल्पितत्वात् काम्येषु विकृतिषु अभ्युपदेशस्य नियमगर्योस्त्विति वाच्यं ।
अनारभ्याधीतमप्यग्निं प्रकृत्याधानो गिं अग्निष्टोमेनेत्यादि वाक्यैस्तस्य प्रकृतिविकृति नि ३
३ क्रतु रूपक [illegible] क्रतुसंबंधः क्रियते नन्तु तत्र प्रकरणे तत्र श्रुतिरूपे चाप्यन्युपदेशस्य प्रयोजनाकां
क्षायामग्निप्रकरणाम्नातत्वात् संनिहितानां तदाश्रितगुणकामानां प्रवृत्तिः प्रयोजनमिति ये
वकाल्ययितुमुचितं । न ...संनिहितं न तद्धि प्रकरणव्यवस्थितचोदकगणात् प्राप्य ५

© Dharmartha Trust J&K. Digitized by eGangotri

योत्तरवेद्याग्नेः पाक्षिकत्वप्रसक्त्यपेक्षस्तन्नियमः प्रयोजनमिति कल्पयितुं । न च वाच्यमुत्तरे
ह्वाद्विरात्रस्यागृह्यत इति सर्वेषां द्विरात्राणामतिरात्रसंस्थे द्वितीयेऽह्नि षोडशिग्रहनियमवि
धिस्तत्र द्विरात्रप्रकरणव्यवस्थितचोदकग्रहणप्राप्तेन षोडशिग्रहणाभावेन षोडशिग्रहणस्य
पाक्षिकत्वप्रसक्त्यपेक्षो दृष्टस्तथेहापि स्यादिति ॥ न च संनिहितप्रयोजनालाभे नागत्या
तथा कल्पनात् । इह संनिहितबुद्धिविपरिवर्तमानप्रयोजनसंभवे दूरस्थितंबुद्ध्यावधिपरिवर्तमा
नं विशेषकलितानेकचोदकानुसंधानसापेक्षमर्थस्येदमागमस्य प्रयोजनकल्पनानौचित्यात् । एते प ५
नाहूरात्रादिषु चोदकेनप्राप्तानांअंगानामनिवृत्त्यर्थं द्विरात्रादिष्वग्निरेव नांगान्तराणीति वाद्वि
गा.३ रोधातिरिक्तविकृतिषु चोदकप्राप्तस्याग्नेर्निवृत्त्यर्थं द्विरात्रादिष्वेवाग्निर्नान्यास्वविकृतिष्विति वापरि
संख्यातविधिष्वित्यपि शंका निरस्ता । प्रकरणासंनिधापितप्रयोजनसंभवे द्विरात्रादिचोद
कपर्यालोचनालभ्यस्य विकृतसंत चोदकपर्यालोचनालभ्यस्य वा प्रयोजनत्वकल्पनायोगात् ॥
र

© Dharmartha Trust J&K. Digitized by eGangotri

प्रकृतिसमानविधानस्य चोदकपरिसंख्यानुपपत्तेश्च। तथाहि न तावदंगांतरपरिसंख्यापंचले। प२
साहित्यक्रमेधीयपंचमपक्षन्यायाच्चोदकप्राप्तपरिसंख्यास्यात् तदृष्टमपक्षन्यायाच्चोदकप
रिलोपकल्पनाप्राप्तपरिसंख्यावा। नाद्यः। वैकृताग्निविधानकाल एव प्राकृताग्निविधेर्निष्प
द्यमानतया तत्पूर्वस्याग्न्यंगांतरसाधारणस्य चोदकस्य तदानीमात्मलाभाभावेन ततः प्राप्त्य
भावात्। प्राप्तपरिसंख्यात्वे स्वार्थत्यागः। परार्थग्रहणं प्राप्तबाधश्चेति दोषत्रयापत्तेश्च। प्रागे
व चोदकतः प्राप्तत्वे त्वग्निर्न विधातव्यश्चोदकतः प्राप्तानि त्वंगांतराणि स्वयमेव निवर्तन्त इति न१
प्रतिषेध्यानि। अतो वैकृताग्निश्रवणस्याग्निविधिरूपस्वार्थपरत्वस्य कथं। अंगांतरनिवृ
त्तिरूपपरार्थलक्षकत्वं चांगीकरणीयं। चोदकप्राप्तानि चांगांतराणि बाधितव्यानि। यदि हि
श्नाराज परिसंख्याविधिवदप्राप्तपरिसंख्या स्यात् तदैव विधिश्रवणस्य प्रागप्राप्तस्वार्थवि
धायकत्वस्य तेनैव नैराकांक्ष्यमापादयता परिसंख्येयसाधारणप्रामाण्यप्रवृत्तिप्रतिबंधः ६

6

© Dharmartha Trust J&K. Digitized by eGangotri

कृतयाफलतः परिसंख्यात्वमिति चेद्दोष्यं नापद्यते। अप्राप्तपरिसंख्येति द्वितीयपक्षोऽपि नोपप
द्यते। गर्दभमेधीयेष्वाज्यभागौ यजतीति दार्शपौर्णमासिकयोराज्यभागयोश्चोदकात्संभव
स्यात्तिकयोः पुनः श्रवणं क्लृप्तोपकाराज्यभागसंबंधेन गर्दभमेधीयप्रयोगविधेर्नैराकांक्ष्यमापा
द्य चोदककल्पना प्रतिबंधकत्वेन गर्दभमेधीयस्य प्रकृतिरादित्याद्यपूर्वतापत्तिप्रसंगीकृतं। नचेह
प्रकृतावग्निविधेः क्लृप्तोपकारताऽस्ति। अकृताग्निविधेरपि वैकृताग्निविधानकाले एवनि
४ ब ष्पद्यमानत्वात्। अत एकत्वेऽपि परिसंख्येति पक्षोऽपि नोपपद्यते। द्विरात्रादिष्वग्निविधानसमये
तत्समसमयविधानस्य प्राकृतस्याग्नेर्विकृत्यैतरे चोदकतः प्राप्त्यभावात्। नचैवं तत्राप्राप्तप
परिसंख्यात्वं शंकितुं शक्यं। द्विरात्रादिष्वग्निविधाने न विकृत्यैतरप्रयोगविधीनां नैराकांक्ष्या
पादनासंभवात्। नच चोदकत्वे कास्तु चिंतास्तु नः श्रवणं व्यर्थं मा भूदिति अग्निविषये चोदका

© Dharmartha Trust J&K. Digitized by eGangotri

२अग्निमात्रे प्रत्येकं चोदकाभावात्२

भावज्ञापकं स्यादर्थलः परिसंख्यास्यादिति वाच्यं। अंगांतरसाधारणस्य चोदकस्य निवारयितुमशक्यत्वा
८ त्। तस्मात्प्रकृतो विकल्पितमग्निं यथाप्रकृते वह्निरात्रादिषु विद्धानानां हूरोदिवं गांतराणि चा२
विकल्पं ने ऽग्निं चापरिसं च क्षाणानां वै कृतानामग्निविधीनामप्रतिग्राह्य विधीनां च गुणकामप्र
वृत्तिरेव प्रयोजनं। तथा च वृत्तापितं वाग्न्यानिग्राह्यस्य विकृतावुपदेशादप्रवृत्तिः स्यादिति दाश
मिकाधिकरणे। तत्रश्चातिदेशाप्राप्तविषयत्वेनाप्राप्तविषयत्वाभावान्नेषु लक्षणस्याप्राप्तिः।
न च तेषामभूवन्नपूर्वविधय इति वाच्यं। अप्राप्तांशपूरणेन तु निवृत्तिफलगुणहितानामप्राप्तगुण
कामप्रगतिफलानां तेषामपूर्वविध्यंतर्भावावश्यंभावात्। अन्यथा तेषां नियमपरिसंख्या
योरप्यनंतर्भावेन विधित्रैविध्यभंगापत्तेः। नन्वस्तु सति सप्तमी द्वितीयः पक्षो नियमः प्राप्ति
के सतीत्यग्नेन केनस प्रत्यवेक्ष्युलाभात्। तथासति नोक्ताव्याप्त्युपेक्षकाशः। नन्ववाप्यमग्न्या
दिविधिषु विधिविषयस्य प्राप्तत्वेपि श्चेन ना कृत्यादिगुणो न प्राप्त इति रवल्व प्राप्तिपरिहारं म ८

© Dharmartha Trust J&K. Digitized by eGangotri

न्यसे। तन्नोंतिविलक्षितं। तस्याप्यध्ययनविधिं विन्वीत स्वर्गकाम इत्यादिवाक्यैः स्वरूपेणस्वस्योद्दे
श्यस्वर्गादिसंबंधित्वेन च प्राप्तत्वादितिनोप्यन्यस्य यस्य कस्यचित्संभवितामप्राप्तिमादाय स्वोद्दे
शानुगमनोपपत्तेः। लक्षणीयाविध्युद्देश्यसंबंधित्वेनाप्राप्तिविवक्षायांतस्याप्यप्राप्तिसंभवाच्च।
नह्यग्नेर्विकृतिसंबंधोपदेशाभावेनतत्रापि तद्गुणकामानां विकृतिमध्येनुष्ठानप्रसक्तिरस्तीति
५ब चेन्न। उच्यते। यस्मैभावेन भावलक्षणमितिसूत्रानुशिष्टयास्सप्तम्यायस्याप्राप्तिविधिप्र
वृत्तावुपलक्षणत्वेननिर्दिष्टातत्प्राप्तिफलकत्वपर्यन्तं लक्षणमितिविवक्षितंतथाचस्वविवक्षा
यां हस्त्यादिविधिष्वतिव्याप्तिप्रसंगः। दार्शपौर्णमासिककृत्स्नांगकलापोपदेशेनपत्नीविपाशुक
चोदकाधीनप्रसक्त्यपेक्षेनतेनोपपशुकरोतिदृष्टसाद्गुण्यभागनिषेधेउक्तचोदकाधीनप्रयाजादि
प्राप्त्यपेक्षे एकादशप्रयाजान्यजतीत्यादिसंख्याभागविहितेप्यव्याप्तेकादशत्वादिगुणेवस्वस्योद्दे

© Dharmartha Trust J&K. Digitized by eGangotri

८

श्रय [illegible] मप्राप्तएवाज्यादिधर्मविज्ञापनादेषप्रकृतविध्युद्देश्ययमप्राप्तएवचक्री। हीनवहंतीत्यादिनि

यमविधिप्रवृत्तेः। अनस्तत्पदिकारायतत्साग्निफलकत्वपर्यंतमवश्यंविवक्षणीयं। तथासतित्र्यनी

कभाजोराग्रयोरग्रताविध्योर्व्याप्तिः। तथाहिद्वादशाहेत्र्यनीकाम्नाता ऐन्द्रवायवाग्रोग्रायणी

योत्र्यनीयोद्दशमंवादः। अथैतेषांनवानामन्हामैन्द्रवायवाग्रंप्रथमहरश्चतुष्कमथाग्र

यणाग्रमथैन्द्रवायवाग्रमथशुक्राग्रमथाग्रयणाग्रमथैन्द्रवायवाग्रमथशुक्राग्रमथाग्रयणाग्रमि

५ना ति। अत्रैतेषांनवानामन्हामग्रतारूप्यनीकेत्युच्यते। त्र्यग्रणामैन्द्रवायवशुक्राग्रयणाग्रतारूपा व

४म णामनीकानांसमाहार इतिव्युत्पत्तेः। अत्रत्र्यनीकायामाद्येऽहनीरथंतरवृहत्सामनी। तथा

चतयोरैन्द्रवायवशुक्रायतेष्वहोति नोज्योतिष्टोमादेवप्राप्तः। ज्योतिष्टोमेयदिरथंतरसामासो

मः स्यादैन्द्रवायवाग्रान्ग्रहान्गृह्णीयाद्यदिवृहत्सामाशुक्राग्रानिति। रथंतरसामत्वेन

वृहत्सामत्वेनचनिमित्तेनतयोरग्रतयोर्विहितत्वात्। एवमत्रैन्द्रवायवाग्रयोरपिविधानम्

© Dharmartha Trust J&K. Digitized by eGangotri

नैमित्तिकत्वार्थं। तस्य प्रयोजनं लिङ्गकृतिश्च सत्यपि रथंतरबृहत्सामत्वे निमित्ते ऐन्द्रवायवाग्रस्य क्रत्वग्रत्व

प्राप्तिः। तद्यथा गर्गत्रिरात्रे द्वितीयमहः वामदेव्यं पृष्ठं तत्र बृहत्साम त्वाभावेऽप्यनैमित्तिको ऽंशु

क्राग्रताया हृष्टा हेतोर्निर्देशात्प्राप्नोति। तदेतत्सर्वं व्यनीकायां प्रयोक्तव्याम्नातं गुणार्थं स्यादिति

दाशमिकाधिकरणेन निरूपितं। एवं च सत्यैन्द्रवायवबृहस्पतिक्रत्वग्रत्वरूपे विधेये प्रकृतविषु हेयं बृहद

ह्निकमग्रमहः ऐन्द्राग्नसमलितव्रतत्वाद्यस्यार्थे यमैन्द्रवायवाग्रताविध्योः प्रवृत्तिर्न भवतीति अनि

वार्या तयोरुत्पत्तिः। तथा गवामयने आग्रयोरन्तरे ऐन्द्र वायवाग्रत्वविधी श्रूयेते। तयोरप्यव्या

सिस्तथाहि। गवामयने प्युक्तरूपाव्यनीका तत्र वैकेष धिकविंशतस्तु सात्मकस्य गवाम

यनस्य पूर्वस्मिन्पक्षस्यशीर्षक तत्तु कालतस्तु त्याग एकेनद्वांमरुत्प्रकरणवलाद्गत्वेन निविशते। ए

कयाच व्यनीकया पूर्वपक्षोनपूर्यतः उत्सर्गवत्तीयासातत्ति द्वेधा संभवति। स्व स्थान विराडि

दंड कलित वत्सवृत्तिश्च। यथा क्षेत्रमानेकर्तव्ये कश्चित्करस्थं मानदण्डं निवेश्य तद्दनं तद्देशेऽपि

आश्वका

कृत्स्नत एव मागनदंढुंगो निवेश्यते॰ एवं प्रथममहरें द्वायवाच्यं द्वितीयंस्तुच्छकाय्यमित्येवैं प्रकारेणाक्क
स्त्तां व्यनीकामनुस्याय तथैव सापुनः पुनरनुष्ठीयते चेत्पूर्वस्मिन्पक्षेऽसि व्यनीकायादंडकालितव
द्वावृत्तिर्भवति॰ अथपूर्वपक्षोलवधाविभङ्गमाद्येविंशतिस्तुत्याकमकेभागेषं द्वायवाच्यतादितीय
भागेष्वक्काय्रतेत्पुर्वमेकवारमेवसानुष्ठीयते चेत्तदा तदंतर्गतानामभ्युतानांस्वस्वस्थानएवविर
9 ढिः॰ यथैद्वायवाग्रंप्रथममहद् इत्यादावहर्ग्रहणंविवाक्षितमतदंडकलितवृत्तावृत्तिर्भवति अ
हरपूर्वप्रयुक्ताम्बनन्तद्ग्रनाभवंति तदविवक्षायांतु स्वस्वस्थानविवृद्धिर्भवति अहः संघात
रूपपक्षभागैर्ताम्नायगृता अहर्धर्मलाभावाफ़ावामयनिकपरमापूर्वप्रयुक्ताभवंति॰ एवंस्थि
तेवाचमिके एकादशनीवव्यनीकोपरिवृत्तिः स्यादित्यधिकरणे॰ हः॰ एवकस्याभ्यूयमाणत्वाद्दंड
कलितवृद्धावृत्तिरितिपूर्वपक्षंकृत्वा प्रथमस्यभागस्याविद्यमानस्यान्तःया॰ न्यूनदिश्यमानस्य
साधर्म्येनवाविशेषणयोगाद्गृहे कल्बवरेकमविपाक्षितंकृत्वा प्रथममहरितिवोहिं एवं॰ नत्राह

© Dharmartha Trust J&K. Digitized by eGangotri

रुद्देशेऽन्हां धर्मातिदेशाद्विधानं स्युरित्यथेति निर्देशानुपपत्तिः। अतः प्रथममैन्द्रवायवाग्रत्वमयं श्रुक्का
ग्रमित्येतावदेव विवक्षितं। अतः ■ द्वादशाहिकत्र्यनीकायां प्रथमाहिभागानां वस्त्व
गत्या द्वेरूप्यादनुवादः। गावामयनिकत्र्यनीकायां मरुः संघातपरोऽनुवादः। तस्मात्तत्रान्या
नविद्धिरिति सिद्धान्तितं। एवं च त्र्यनीकाविधिबलादैन्द्रवायवाग्र्यमाग्रन्हामग्र्यायां विंश
तो लदंत■ ग्रंगनयोराद्ययोरन्होः पुनरैन्द्रवायवाग्रत्वविधानं तद्दूरतृतीयप्रयुक्तत्वसिध्यर्थं।
तत्फलं तल्लिङ्गिकारद्वेकाहक्रतुपुरःसरसामान्याभावेऽप्यैन्द्रवायवाग्रत्वप्राप्तिरिति प्रतिपा
दितं तंत्ररत्ने। तत्रभ्वनयोरप्यैन्द्रवायवाग्रत्वविध्योरनिवार्या व्याप्तिः। तथा चोदाहृतेषु
विधिषु विधेयानामग्रतां मुद्देश्येषु द्वादशाहिकगवामयनिकेषु ग्रहेषु चोदकत्र्यनीकोप
देशाभ्यां प्राप्तिस्तत्वेपि लदन्येषां केषांचिदग्रग्यातेषु लक्षणं समर्थनीयमिति शंकितुं शक्या

© Dharmartha Trust J&K. Digitized by eGangotri

ते· तेषां विधीनां तत्प्राप्तिफलकत्वाभावात्· अत्र विषयसप्तमीपक्षे विकल्पद्वयस्यापि दूष
णम् व्याप्तिः प्राप्तियुक्तमित्यादिना दर्शितं· तत्राद्यविकल्पदूषणे ऽग्निविधिशब्देन प्रकृति
विकृतिसाधारणमग्नेः क्रतुसंबंधविधिमात्रं ग्राह्यं· आदिशब्देन चाग्निहोत्रे प्राजापत्य
10 यागविहेवनादिविधिर्ग्राह्यः। द्वितीयविकल्पदूषणे ऽग्निविधिशब्देनाग्नेर्विकृतिसंबंधविधि
र्ग्राह्यः। आदिशब्देन तन्नियागत्याविधिः। सतिसप्तमीपक्षे तत्प्राप्तिफलकत्वाविवक्षायां यद्दू
षणं तत्त्वं च मध्यलोके प्रदर्शयिष्यमाणत्वादिहकथं दर्शितं। नहिविवक्षायां यद्आमिक्षं अनीको
भाजोरित्यादिना दर्शितं। तत्राद्यव्याप्त्युदाहरणे अनीकाभाजोर्द्वादिग्रागहि क अनीकायास्तयो
रैंद्रवायवग्रहत्व कार्यत्वविध्योरव्याप्तिरित्यर्थः। द्वितीयाव्याप्त्युदाहरणे येयत्वगावामंयनी
काअनीकात्वेवस्वयं प्रवर्तमानतया अनीकाभाजोरैंद्रवायवग्रहत्वविध्योरव्याप्तिरित्यर्थः।
स्यादेतत्सतिसप्तमीपक्षे प्रथमविकल्पे उद्भावितमिदमव्याप्तिद्वयं न प्रसज्यते· तथाहि द्व १०

© Dharmartha Trust J&K. Digitized by eGangotri

दर्शपूर्णमासीकांतर्गतमङ्गलादृष्टं परमापूर्वसाधनत्वोपहितयोराग्नेययोरन्होर्विधीयेते न च तथा
त भूतयोस्तयोः प्रकृतिस्तत्स्थलादृष्टं प्राप्तं किंत्ववान्तरापूर्वसाधनत्वोपहितयोरेव यद्वा दर्शानां
सोमयागानामेकफलावच्छिन्नानां सहानुष्ठानेपि प्रतिसोमयागं चोदकस्य पृथक्प्रव
त्तेः तथा गवामयनिकयोराग्नेययोरन्होरवान्तरापूर्वसाधनत्वोपहितयोरैन्द्रवायववायनादृ
ष्टं विधीयते न च तथाभूतयोस्तत्प्राप्तं किन्तु परमापूर्वसाधनत्वोपहितयोरेव इदं च नसद्व्या
स्युज्ज्वलस्थलेस्पष्टीकृतं। तथा चोद्देश्यतावच्छेदकरूपेणाग्नेयत्वेसत्वादुक्ताविनाव्याप्त्योर्नावि मा
काशात्स्वाशंक्याह अप्राप्तिमप्राप्तिभाजामपि यद्धि परमावान्तरापूर्वकृतव्यापारत्वोद्देश्यधर्मैः
सज्जातिविघटयन्नेव मव्याप्तिदोषं तस्मात्सदा लैयल्लक्ष्मलक्षणयुक्तानिनिरूपितं स्यादिति व्या
प्ति वक्रेबीसुद्धेशेपि हत्तो नियमविधिपदे खल्वपूर्वावली हः। यद्यव्याप्तिं परिहर्तुमाप्ताका

मप्यप्राप्तानामपूर्वविशेषसाधनतोपाधिभेदेन प्राप्तिं लक्षणार्थत्वेन कल्प्यपरिसितत्व केषांचिदेव प्र
सिद्धानामपूर्वविधीनां केषांचिद्ग्राहकमिदं लक्षणमुक्तमिति लक्ष्यसंकोचविवक्षया सुपरिहराद्व्या
प्तिदोषा दृष्टाय लक्षणं तानि कस्य नियमविध्यतिव्याप्तिदोषव्याघ्रस्य वदने इदं लक्षणं तु पाति
हितं स्यात्. व्रीहीनवहन्तीति नियमविधावपि व्रीहीणामपूर्वसाधनतोपहितानामेव बोद्धुं शक्यतावच्छेद देयतयो
प्रा करूपेणाप्तिसत्त्वात्. तत्र हि द्वितीयाश्रुत्या व्रीहीणामवघातसाध्यत्वं प्रतीयते न तु तेषां व्री
हित्वेन रूपेण तत्साध्यत्वमस्ति प्रागेव सिद्धत्वात्. नापि व्रीहीनवहन्तीति लौकिकव्रीह्यवहनना
नुवादवाक्यमेवात्र तुषविमोकविशिष्टत्वेन रूपेण साध्यत्वं द्वितीयार्थ इति वक्तुं युक्तं। विदलने
नापि संभवतीति तस्मिन्नंशे त्वविवक्षितस्यावघातनियमस्यानुपयोगात्. तस्मादपूर्वसाधनत्वाकार धान २
णैव तेषां तत्साध्यत्वं वाच्यम्. न च यथा ऽग्नीनादधीतेत्यत्राग्नीनां स्वरूपेणासाध्यत्वं तथेहापि स्यादि
ति वाच्यम्. तत्राहवनीये जुहोति गार्हपत्ये हवींषि श्रपयन्ति दक्षिणाग्नावन्वाहार्यं पचतीति वाक्या ११

© Dharmartha Trust J&K. Digitized by eGangotri

तरेहेमिगाहिषु विनियुक्तानां संस्कारविशेषविशिष्टाग्निरूपणमाहवनीयादीनां साधनकांक्षा
यामाधानविधानात्तेषां संस्कारविशेषावच्छिन्नत्वेनरूपेणाक्षिप्तदोपात्तानामाधानसाध्यता
युक्ता। नचेह व्रीहयः संस्कारविशिष्टाः क्रतौ विनियुक्ताः येनावहननवाक्येपितेषां तद्विशि-
ष्टतयोपादानात्तेनरूपेणावहननसाध्यतायुक्तास्यात्। व्रीहिभिर्यजेतेति जातिमात्रेण
व्रीहयः प्रकृतौ विनियुक्ताः। नचात्रसक्तुन्यायेनाविनियोगभंगः कल्पयितव्यः। अपूर्वसा
धनत्वेलक्षणामात्रेणप्रधानद्वितीयाश्रुतिनिर्वाहे आकांक्षितदृष्टफलत्वेनियममात्रवि
षयतयाविधिलाघवेचसंभवतिद्वितीयाश्रुतिबाधस्यानाकांक्षितादृष्टफलकल्पनस्याचसं
नाप्रापकापूर्वविधित्वाभ्युपगमस्यचायुक्ततात्। नचैवमपूर्वसाधनत्वलक्षणायामप्युसा
न्नाम्यजुहूस्रुक्वादीनामप्युपघातप्रसंगः। व्रीहीणां सुवगतमपूर्वसाधनत्वं लक्षणीयं तेषां
चाग्नेयाद्यपूर्वसाधनत्वं तंडुलनिर्वृत्त्यादिद्वारकं व्रीहिभिर्यजेतेत्यादिशास्त्रेणावगतमि

© Dharmartha Trust J&K. Digitized by eGangotri

तिलक्षणायां यवसार्थतृणलाभेपि कान्यत्रागस्त्विप्रसंगः। तथैव चावघातलक्षणो यमव घात
स्य दृष्टफलत्वन्निर्वाहस्य। तदेतत्सर्वं तेषामर्थेन संबंधः इति तार्त्तीयाधिकरणे सुस्पष्टमिति। दृ
12 ष्टसंख्याहेतुसमुदायं वाश्रुति संयोगादिति नावमिकाधिकरणे च स्पष्टमिति भावः। एवं प्रा
प्तानामपि रूपभेदाश्रयणेनाप्राप्तिमपेक्ष्य लक्षणानुगमने श्रीदीपदर्शिना काराश्रयणे
नावघातनियमविधावुक्तिव्याप्तिरुक्तरुदाहृतं शक्यानिकाराश्रयेण नान्यत्र विधावतिव्याप्तिमु
दाहरति। यूपः सर्वोप्ययूपं स्वयमपि विविधादृष्टसंस्कारयोगात्तस्मिन्दृष्टेपि दृष्टरूपादे
नियमनं चैतेषां प्राप्तिर्वा नो। तस्मात्तत्स्वरूपे परमलवगतं रूपभेदा विहाय प्राप्तस्य प्राप्ती
विनापि कथमपि तद्धि तद्व्याप्तिदोषान्नमुक्तिः। यूपः प्राकृतो वैकृतः सर्वोपि तावदादवनी
याद्विदृष्टलौकिकः। प्रोक्षणादिजन्यादृष्टछेदनतक्षणाष्टाश्रीकरणादिनियमाः। दृ
ष्टरूपानेकादृष्टसंस्कारविशिष्टस्यैव यूपशब्दार्थत्वात्। न चात्र कुतिदृव्याप्तिः नियमविधिः श्रू १२

© Dharmartha Trust J&K. Digitized by eGangotri

यते खादिरो यूपो भवतीति · नन्वालौकिकयूपलावच्छेदेन खादिरत्वप्राप्त्यभावाद्यूपविधिमूल
क्षणस्यूलतयाप्यातिव्याप्तिः स्यात् · नन्वाहवनीयाभ्युद्देशेन आधानविधानवद्यूपोद्देशे
न खादिरत्वविधिरप्यपूर्वविधिरस्तु यूपाहवनीययोरलौकिकत्वाविशेषात् · खादिरत्वविधि
४त धेर्नियमविधित्वप्रसिद्धिस्तु वैकल्पिकविधिविषया स्यात् · विकृतावपि खदिरत्वं तत्र यूपते ·
खादिरो यूपो भवतीति तस्य च प्रकृतावपि कल्पनानन्तरं खादिरत्वोपलाभादीनां विकृतावनुवृ
दकत: प्राप्तो खादिरत्व एव लक्ष्यमाणस्य इति नियमविधित्वमुपपद्यत इति चेन्न · उच्यते · दृष्टे
दीक्षायां कृपोऽपि नास्तीति दीक्षाकालकर्तव्यपदेनप्राकृतयूपे खादिरविधिरपि नियमविधि
रेव · तदभावेन स्फुरणादिना कच्चपर्याप्तोऽन्न यादृशमयत्नेनावगतस्य यूपस्य प्रकृते साकांक्षाया
मनियतानेकद्रव्याक्षेपस्यानिवार्यत्वात् · तत्स्फुरणप्राप्ताखादिरत्वादिविशिष्टयूपस्य दृष्टरूपे ख
दिरादीनां प्रकृतित्वयोग्यतया लौकिकत्वावधारितत्वात् · आधानं तु आहवनीयादीनां दृष्टप्रज्वलना

© Dharmartha Trust J&K. Digitized by eGangotri

कारेणानिष्पादकं किं तु तन्निष्ठापूर्वसंस्कारमात्रम् इति युक्तं तद्विधेः प्रोक्षणादिविधेरिवापूर्वविधित्वं तस्यात्मा कृतस्वर्गादिनियमाविध्युत्विव्याप्तिरूप्यनिवार्यैव। एवमुद्देश्यगविवक्षितत्व
पभेदा श्रयणे ना प्राप्तिसमर्थनस्यानि व्याप्ति दुष्टत्वान्नित्यारे हाराय यथा। वार्त्तिकवन्ताद्विध्य
13 भावे विधेयत्वाभिमतस्य प्राप्त्यप्राप्तिविवेचनेन वानियमापूर्वविधिव्यवस्कोपपादनीया। त
थानतिद्रव्यदशादेहमनीकाविध्यभावेव्यवायोरन्दोष्मोरेकादेद्रव्यादेककार्यप्राप्नुतःगवा ने २
मयनेवाप्ययोरन्तोः प्राप्ति स्विकविध्यभावेस्वस्थानाविरुद्धमन्नीकाविधिबलादेद्रव्य
५ व संश्च कार्यनेमा भुत इकरादृताग्नताविधिवत्तु एवाव्याप्त्यासति तस्सप्तमी पक्षे प्रथमाविक
ल्पो दुष्टएवेत्यर्थः। २ अस्मिन्नेवविकल्पे सकलां तरो व्याप्तिं रूपभेदाविवक्षयागनेरस्तिनुमत्या
कयानुदाहरति अव्याप्तिःयोऽर्थिनास्याममपि यजमानविधावृत्वकल्पे भसपर्सेमागन्तोद्देश्यस्यत न
स्याधिगन फलतोपांशुयाजस्यलभ्यात्। स्यात् किं वैयागपराग्न्याकृतिषु फलसमापोजनार्थं
प्रवृत्तेनिष्प्रत्यूहाग्निहोत्रादुनियुगलमिता धायुरूसंकीर्तनेपि। ७। दर्शपूर्णमासप्रकरणे १२

© Dharmartha Trust J&K. Digitized by eGangotri

श्रूयते तावद्भूतमग्नीषोमयोराज्यस्यैव नानुपांशु पौर्णमास्यां प्रजानन्निति । अत्र वाक्ये कीर्त्ति- मध्ये कालव्यतिरिक्तानां
तानां यागतदपेक्षितानाग्नीषोमदेवताद्रव्योपांशुत्वगुणपौर्णमासीकालानां तत्तद्धर्म
गुणग्रहणाभावादन्यतः संभवत्प्राप्तिकानां तेषां पुनः श्रवणस्य निष्फलत्वाच्च कालस्यै-
व विधिः । न ह्यग्नीषोमवरूकवाक्यगतस्य प्रजानन्नितिस्य यागविधेः षष्ठी चतुर्थी साधार- –
५ विधा णस्य नाविर्भावस्यदेवतोवाज्यस्येति षष्ठ्यं तस्य द्रव्यविधौ वा द्वागे वानुगुण्यमवगम्यते संभ-
वति यो पांशुयाजमन्तरायजनीतिस्य च विधिना यागस्य च द्रव्यदेवताप्रकाशनैकप्रयो-
जनकेनाग्नीषोमीययाज्यानुवाक्यायुगलेन देवतायाः सर्वस्यैवाएलद्यत्वायगस्यलेइ
त्यादिनाद्रव्यापेक्षायां सर्वयागार्थतां विधायकतया न्यन्तमेन ध्रौवाज्यविनियोजनकव-
न चनैर्द्रव्यस्य प्राप्तिः । उपांशुत्वस्यापि यागोत्पत्तिवाक्यत एव प्राप्तिः संभवति । अतोऽपु-
राकल्परूपार्थविदनकत्वयः कालस्यैव विधिः । तदनुगुणस्य सप्तमीविभक्तिश्रवणात् । न हि

© Dharmartha Trust J&K. Digitized by eGangotri

ज १

धानस्य फलवत्त्वाच्च । तथा हि यद्यपि तद्विधानमुपांशुयाजस्य कालविधिसिद्ध्यर्थं न भवति तस्यो
पांशुयाजमन्तरा यजतीति उत्पत्तिवाक्येनैव पौर्णमासी कर्तव्याग्नेयाग्नीषोमीययागद्वयान्तराले
उपांशुयाजं विदधानेनार्थतः सिद्धत्वात्तथापि उपांशुयाजस्य दर्शपौर्णमासाभ्यां स्वर्गकामो या
जेतेत्यधिकारवाक्योद्दिष्टफलसंबंधासिध्यर्थं भवेदेव । एतदभावे विद्धवाक्यस्थेनाधिका
रवाक्यस्थेन च पूर्णमासपदेन यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भ
वति अग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छदित्युत्पत्तिवाक्येनावगतपौर्णमासी
कालयोराग्नेयाग्नीषोमयागयोरेव ग्रहणमिति प्रवृत्तिनिमित्तावगमात् अथ संग्रहीतयोः फलसं
बंधकरणाद्दर्शविगम्य पौर्णमाससंबंधस्योपांशुयाजस्य विलम्बितप्रवृत्तिनिमित्तमप्रतीतिक
न यावद्विद्धवाक्याधिकारवाक्यगतपौर्णमासीपदात् गृहीतस्यफ लसंबंधो न सिध्येदिति ।
यनुभवदेवेनास्य विधेः प्रयोजनमुक्तं यदंतरालविध्यर्थं लभ्यते वोपांशुयाजे पौर्णमासीका १४

© Dharmartha Trust J&K. Digitized by eGangotri

लः स्यात् न तदानीमाग्नेयो वै ब्राह्मणो देवतयास सोमेनेष्ट्वाग्नीषोमीयो भवतीति श्रुतेः सोमयाजि
नोऽग्नीषोमीयपुरोडाशाभावे न तदीयायामेकपुरोडाशायां पौर्णमास्यां पुरोडाशद्वयांतराला
भावादुपांशुयाजो न प्राप्नुयात्· प्रातिस्विककालविधिसद्भावे त्वंतरालानपेक्षत्वे पौर्णमास्यु
पांशुयाजोऽयमिति सिद्धेस्तदनुसारेणांतरालश्रवणमात्रेणैतत्कालमात्रोपलक्षणं भवेदि
या त्येकपुरोडाशमप्युपांशुयाजः प्राप्नोति· अतस्तस्मादुपांशुयाजमांतरालार्थः पौर्णमासीविधि
रिति· तत्सारं। उपलक्षणापायेप्युपलक्ष्यानपायादिति न्यायेनैवैकपुरोडाशायामपि तत्प्रा
प्तिसंभवेन तु स्वयमुपांशुयाजांगं· यत्तदभावे नैर्गुण्यं स्यात्· न च तदभावे अंतरालकालस्यां
गस्याऽलाभाद्वैगुण्यं उपलक्षणापायेप्युपलक्ष्यानपायस्य प्रतिपादितत्वं एव वेलायां का
गंतव्यमिस्यादेः प्रसिद्धत्वात्· नहि कौविशेषोपलक्षणतयोपानेयं रव्युद्धवो काचिद्दिवसे दिवा
दधनेसतितदुपलक्षितः कालो नास्तीति गम्यते· ननु द्विपुरोडाशायां स्यादंतरालं गत्येति तद
न तद्दपविध्यन्तरानपेक्षणात्· उपलक्षणं हि पुरोडाशद्वयमुपांशुयाजांगमतस्य कालस्य ४

© Dharmartha Trust J&K. Digitized by eGangotri

15

श्री

शामांस्याधिकरणेः तत्राल्लक्ष्यतिप्रलाग्नेद्दपुरोडाशस्यामेवोपांशुयाजइतिपूर्वपक्षेप्राप्तेउभयोरस्तुविधा
नाहितिसिद्धान्तसूत्रेणोपांशुपौर्णमास्यां यजन्तितिपौर्णमासीविधानमेवहेतूकृत्यत्रिपुरोडाशयामे
कपुरोडाशयांचोपांशुयाजःसमर्थितः। सत्यं। उत्पत्तिशिष्टगतरालवैगुण्येसतिसहेतुसाधकदृष्यस्या २७
रस्यादेवतदनंतरमनपायोदिकालस्यलक्षणंहिपुरोडाशविनिसृत्रांतरेणतत्थेवपूर्वहेतुस्त्वाररस्यं
वर्णयताभाष्यकारेणत्वलक्ष्यमाणपायन्यायमेवहेतूकृत्यकालवैगुण्याभावःसमर्थितः। तत्पाया
पेक्षणेचलनएवैकपुरोडाशयामप्युपांशुयाजप्राप्तिर्भवतीतिनसापौर्णमासीविधानमपेक्षते। अ
वश्यंचोपलक्ष्यमाणपायन्यायमाश्रित्याद्धिध्यंतरमनपेक्ष्यैवोपलक्षणस्यादित्येपिप्राप्तिर्भवतीतित्वयापि
स्वीकरणीयमन्यथापौर्णमासीविधिवशादेकपुरोडाशयांप्राप्नुवन्नप्युपांशुयाजोग्नीषोमदेवत्ये पो
एवप्राप्नुयात्। पौर्णमासी। विष्णुदेवत्यःप्रजापतिदेवत्यश्चनप्राप्नुयात्। पौर्णमासीविधानेना
वबृगामग्नीषोमाविनिश्रवणात्। एकपुरोडाशयामुपांशुयाजसामान्यप्रापकविध्यंतराभावाच्च। १५

© Dharmartha Trust J&K. Digitized by eGangotri

तस्मात्तत्राग्नीषोमयोरुपलक्षणत्वाद्देवतांतरवतोऽप्युपांशुयाजस्याग्नीषोमीयो मोयेति लिङ्गितयागत्वा
न्नपायाद्दैवेकपुरोडाशायामाप्तिः समर्थनीयेति तत एव लक्ष्यानपायन्यायादुपांशुयाजमंतरायजतीति
विधिमारोपितादेकपुरोडाशायामपि तत्प्राप्तिः सिध्यंतीनपौर्णमासीविधेः प्रयोजनं प्रागुक्त्वा मिति 3
पांशुयाजस्य फलसंबंधसिद्धिः प्रयोजनं। तदेव प्रयोजनमुपांशुयाजाधिकरणे भाष्यवचनाद्वेति
सूत्रेण न तु वार्त्तिकेनापि स्पष्टीकृतं। तत्राप्यधिकरणे विष्णुरुपांशुयष्टव्योऽजामित्वायाग्नी
षोमावुपांशुयष्टव्यावजामित्वाय प्रजापतिरुपांशुयष्टव्योऽजामित्वायेति त्रयाणां यागानां विधयः
अंतरालवाक्यं नु तत्समुदायानुवादो विधिसिद्धवाक्यवादितिपूर्वपक्षनिराकरणार्थं सूत्रे भाष्ये च वचनादिति·
शिरो वा एतद्यज्ञस्य यदाग्नेयः हृदयमुपांशुयाजः पादावग्नीषोमीय इत्युपांशुयाजस्य प्रधानप्राय
पाठावगतेर्विकृत्यादिवाक्येस्त्रयाणां यागानामुपांशुयाजशब्दपरामृष्टानां विधावुपांशुयाजमात्र
प्राधान्यावगतिबाधप्रसंगात्तदेतद्वाक्यविधेयत्वे एकस्यैवोपांशुयाजस्य स्यादादृष्टिविकृत्यादिवाक्यानी
तिसूत्रस्यास्य भाष्येन तात्पर्यमुक्तं कथं यागत्रयविधिपक्षे तत्प्राधान्यबाधः स्यादिति साशंक्योपपा

© Dharmartha Trust J&K. Digitized by eGangotri

16

इतं कार्त्तिके· विष्णुप्राजापत्याग्नीषोमदेवत्ययागत्रयविधिपक्षे तावद्भूतामग्नीषोमाविस्साद्दिना
ग्नीषोमदेवत्यस्यैव यागस्य पौर्णमासीविधिरितिस्मात्तथा च तस्यैव विद्धवाक्यफलवाक्यस्थ
पौर्णमासीपदगृहीतस्य फलसंबंधेन प्राधान्यं सिध्येत्· ननु तद्गृहीतयोर्विष्णुप्रजापतिदेव
त्ययागयोरपि स्वांतरवाक्ये नैकस्यैव यागस्य विधिरत्र त्रैवर्षार्थवामदेवाम्नातैर्याज्यानुवाक्यायु
गलैः प्रापिताविह्ल्वादिदेवताविकल्पं न इति सिद्धांतपक्षे तु विष्णुप्रजापतिदैवत्याप्येकत्वेनाग्नी अ५
षोमीयोपलक्षितत्वान्नपार्थग्यादुपांशुयाजसामान्यस्य पौर्णमासीकालसंबंधलाभेन सिध्यति
प्राधान्यमिति अनेन पौर्णमासीविधिर्नैव लभ्यः फलसंबंधोनांतरालविधिलभ्य इत्याशयः स्व
एएव· अन्यथा विष्णुप्रजापतिदेवत्ययोराहूत्य पौर्णमासीविध्यभावेप्यंतरालतयार्थप्राप्त
पौर्णमासीसंबंधेनैव फलविधिगृहीतयोः प्राधान्यं सिध्येदितितत्प्राधान्यावगतिर्वा धर्मसं
गदूषणमसमंजसं स्यात्· न त्वंतरवाक्यं यागत्रयसमुदायानुवाद इति पूर्वपक्षेंतराले यागवि
धायकं किं विद्धवाक्यं नास्तीति विष्णुप्रजापतिदैवत्ययोः फलसंबंधार्थं पूर्णमासीविधिरेवशर १६

व

© Dharmartha Trust J&K. Digitized by eGangotri

ग णीकरणीयः। अतोग्न्यारंभे देवस्याग्नीषोमीयमात्रविषयत्वेन तयोः फलसंबंधो न सिध्येदिति दू
षणस्य गमंत्रस्यमिति चेन्न। अंतरा वाक्यमनुवाद इति पक्षे पर्यायाम्नात दोषपरिहाराय मंतरा
क्रतेरनालंबनत्वपरिहारार्थं चात्रिष्वपि यागेषु चांतरालप्राप्तेरवश्यं वक्तव्यत्वात्। भवदेवेनै
वोपांश्वयाजाधिकरणपूर्वपक्षे कथमंतरा वाक्यस्य सर्वात्मनाऽनुवादकत्वं मंतरालकस्यैवाप्राप्त
स्य विधेयत्वादित्याशंक्य पर्यायाम्नानादोषोपक्रमेण विष्ण्वादि वाक्येषु प्रसक्तपर्यायाम्नानानुवादेन व
तेषां तरालप्राप्तिमुक्त्वा भवति चानुवादत्वोपि स्थानानियमो यथा न गिरा गिरेति ब्रूयादिति गिरा प
४५ दनिषेधानुवादबलादिरां दस्य गिरापदस्थानानि वेशितं द्विसह ऋषीनमुपपादितत्वात्। केचित्तु
विष्ण्वादि वाक्यानि यागविधय इति पक्षे तस्याधान्यवाधूमथासमर्थयन्ते। विष्ण्वादि वाक्येषु
न च प्रसंगात्प्रथमं गुणकर्मत्वधीर्भवति कर्मान्तरानुपयोगानुसंधानेन तु प्रधानकर्मता वगन्तव्या।
अतः श्रीघ्रावगत प्रधानकर्मणाम्ने वाधिकारानुप्रवेशादुपांश्वयाजस्य तदनुप्रवेशेन प्राधान्याद

गतित्विहितत्वेन संनिपत्योपकारकं यच्चादिविधिगुणिनि पक्षे तु न तत्र तथ्य प्रत्ययाभावेन गुणकर्मत्वयोः कत्वविलंबात्प्र
सक्तेराग्नेयादेर्विवदधिकारानुप्रवेशात्प्राधान्याववगतिर्न विहन्यत इति तेषामप्यधिकारानुप्र
17 वेशोपयोगमुक्तं प्रतीतिसिद्धे प्रमाणावग्रहणे तदनुप्रवेशोन्यायप्राप्तः संपन्नस्तत्रोपांशुयाजस्याहत्यपौ तदननुप्रवेशा ३
र्णमासीविधप्रभावेनुष्ठान पौर्णमासीकालयोराग्नेयाग्नीषोमयोरेवाधिकारानुप्रवेशः स्या
दित्युपांशुयाजस्य तदनुप्रवेशलाभफलक एव पौर्णमासीविधिः किं ध्वनित स्यादेवं यदि पौर्ण
रा मासीसंबंधप्रतीतिसिद्धेः प्रमाणांतराभ्यामधिकारोनुप्रवेशनन्नुप्रवेशोस्यात्तौ तत उपांशुयाजस्याप्य
निवाक्यप्रवृत्तिसापेक्षेण वाक्यांतरेण पौर्णमासीसंबंधलाभेप्युसन्निवाक्यावगत पौर्णमा
सीसंबंधयोराग्नेयाग्नीषोमीययोरेव तदनुप्रवेशः स्यादिति संदेहोपस्थितेर्वस्तुः न चैवमाप्यन ६३
न्यत्रोपांशुयाजनः पौर्णमासीविधिर्विलंबितोपस्थितस्याधिकारसंबंधमापादयिष्यतीत्युपात्तहेय
थमसंगात् एकपुरोडाशयागमुपांशुयाजमाग्नेयं लक्ष्याकपायन्यायलब्धत्वेन द्विधिर्वियोज ७७

© Dharmartha Trust J&K. Digitized by eGangotri

न्त्वाभावादिति । अमावास्यायामुपांशुयाजः । अथ वर्त्तनेनापि पौर्णमासीविधेश्चारितार्थ्यादि । उपां
शुयाजोत्पत्तिवाक्यपर्यालोचनयाऽमावास्यायामपि सम्प्राप्नोति यथा पौर्णमास्यामाग्नेयाग्नी
षोमीयौ पुरोडाशौ तथाऽमावास्यायामाग्नेयैन्द्राग्नौ स्त इति पुरोडाशद्वयं तत्कालस्य द्वयोरविशेषा
दमावास्यायामसोमयाजिन ऐन्द्राग्नाभावेनैव पौर्णमास्यामसोमयाजिनोऽग्नीषोमीयाभावेन पुरोडा
शद्वयासंवृत्तिः कथं स्यात् योऽविशिष्टत्वात् । तस्मात् पौर्णमासीविधिरमावास्याव्यावर्त्तनेन चरिता
र्थः स्यादेव । अत एवाध्वर्यवेऽपि वा पौर्णमास्यां स्यात्प्रधानशब्दसंयोगात् तत्संयोगाद् यथा प्रधानं स्यादिति
सूत्रेण प्रधानस्योपांशुयाजस्य पौर्णमास्यां यजन्तीति शब्देन पौर्णमासकालसंयोजना
त्पौर्णमास्यामेवोपांशुयाजः कार्य इति पौर्णमासीवि[illegible]लादमावास्याव्यावर्त्तनं कृतमिति चे
त् । उच्यते । उपांशुयाजमन्तरा यजतीत्युत्पत्तिवाक्यं पौर्णमासीरूपप्रकरणराज्ञकालेऽपांशुयाजं
विदधाति उपांशु पौर्णमास्यां यजन्निति प्रकृत्य जामि वा एतद्यज्ञस्य क्रियते ... नाहिति तदमावास्याधिक
रणभाष्ये दुष्टीकमोक्तम् । अत उपांशुयाजस्योत्पत्तिवाक्याद्वगतपौर्णमासीकालत्वाविशेषाल्लक

© Dharmartha Trust J&K. Digitized by eGangotri

ध्वरदधिकारानुप्रवेशोंतरायः । एवं च यदप्यत्र पौर्णमासीविधिरमावास्यायामावर्तनीय इति संख्या
रूपस्याप्राप्तिरहतं तस्मान्नातोत्पत्तिवाक्यफलमंतरा कालपौर्णमासीरूपनामसमनुपांशुयाज
स्य फलसंबंधार्थेभिवनीयपूर्वविधिरूपतायास्यावश्यंभाविनी तत्र चोत्पत्त्यनुपादेयतेनोद्देश्य
पौर्णमासीकालविधेयस्य यागस्य प्राप्तिरलभ्यायेप्युत्पत्तिवाक्यपर्यालोचनया प्राप्तलभ्यतद्
18 तिरस्याः फलतासांभिहायविधेयस्यानुद्देश्याधिकारवाक्योपात्तस्वर्गप्राप्तिफलत्वेनोपा
दानेऽस्मिन्विधौ रूपभेदेविवक्षायामप्यप्राप्तिरनिवार्या । न च पौर्णमासीत्योपादिते काले
उपांशुयाजस्याप्राप्तिरस्ति । अंतरालविधिसामर्थ्येनतस्याप्राप्तिसंभवात् । न चानन्यतृन्केन
चिद्रूपेणोपादितेन तत्र तस्याप्राप्तिमुपपाद्य तत्प्रापणार्थमिदं वचनमिति कल्प्यते किं प्रयोज
नमस्ति पौर्णमासीत्वोपादितएव न विधानस्य फलसंबंधसिध्या प्रयोजनवत्वात् । तस्माद्रूप
भेदविवक्षायामप्युक्तविधावप्राप्तिस्यादेव । अपि च । द्वे आहवनीये च तत्रोगार्हपत्ये चैते स्रो
त्वा हार्यपचने एकस्सप्यं तदस्याभरगविराड्एवं विहारविराड्संपन्नमग्निहोत्रं जुहोति । इत्यत्र १८

© Dharmartha Trust J&K. Digitized by eGangotri

द्वे आहवनीयद्वयस्मिन्नुभयोरग्निहोत्राहुत्योः यदाहवनीये जुहोतीति सामान्यशास्त्रप्रमि
ताहवनीयरूपाधारसंकीर्तनमात्रव्याप्तिः । द्वंद्वेन हि नाहवनीयस्याहुतिद्वयसंबंधप्राप्त्यर्थं सा
मान्येन शास्त्रेण प्राप्तत्वात् । नापि तद्द्वयस्य कस्यचित्संबंधप्राप्त्यर्थं एकैकस्यापि तत्संबंधप्रा
प्त्यलाभात् । नापि विरोधसंपत्तिवाक्यानुसारेण द्वयसंख्यानामग्निहोत्राहुतीनां मध्ये द्वयोरा
हवनीयेन तथाविनियोगाय परिसंख्यार्थं । अन्यासां गार्हपत्यान्वाहार्यपचनरूपाधिकरणेन
विधानादेवाहवनीयव्यावृत्तिसिद्धेः । किंतु तासामन्यासां आहुतीनामाहुतिद्वयवदग्नि
होत्रं जुहुयात्स्वर्गकाम इत्युत्पत्त्यधिकारवाक्यबोधितफलसंबंधप्राप्त्यर्थं । न यावाहिद्व आहवनीये
ऽयं तदभावे च तस्यां गार्हपत्ये चक्रस्यान्वाहार्यपचनदृष्टिवाक्ये संख्याधिकरविशिष्टकर्मवि १३
धायकस्यात्तः तथा अग्निहोत्रं जुहोतीत्युत्पत्तिवाक्यविहितकर्मानुवादेन गुणविधायके ।
अन्ये कर्मणि संख्याधिकरणरूपानेकगुणविधाने वाक्यभेदापत्तेः । ननु तथाप्यं यथा

© Dharmartha Trust J&K. Digitized by eGangotri

यदग्नये च प्रजापतये च सायं जुहोति यत्सूर्याय च प्रजापतये च प्रातरिति वाक्ययोः कालदेवतास्व
पानेकगुणश्रवणेप्यग्निहोत्रवाक्योत्पन्नहोमानुवादेन गुणमात्रविधानमिति तस्यैकस्यैव वद
जाप मस्य सायंप्रातःकालयोरग्निप्रजापतिसूर्यप्रजापतिरूपदेवताभेदेन द्विर्द्विरभ्यासस्य अभ्युपगम्यते एव
मिहाप्यनेकगुणश्रवणेपि तस्मिन्होमे गुणमात्रविधानमिति तस्य वाधिकरणभेदेन तु अभ्यनु ७४
भ्यासोभ्युपगम्यत इति सायं जुहोति प्रातर्जुहोति इति विधिभ्यां सायं प्रातःकालयोरग्निर्ज्यो
19 तिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति च तत्कालाग्निहोत्रमंत्राभ्यामग्नि
सूर्ययोश्च प्राप्तत्वेन यदग्नये यत्सूर्यायेति वाक्ययोर्द्वयोः कालद्वयेपि प्रजापतिमात्रविधिस्व
कांततया तयोर्गुणमात्रविधानेपि वाक्यभेदाप्रसंगात् अतस्तु संख्याधिकरणयोर्द्वयोरप्यन
न्यलभ्यत्वेन कगुणमात्रविधाने वाक्यभेदानिवारणात् एवं तथाहुः पत्न्यान्वाहार्यपचनवाक्य
योः संख्याधिकरणविशिष्टहोमविध्यवश्यंभावे तेऽप्यावपि होमयग्निवाक्यविधेयात्सायंप्रातःकाल
योर्देवताभेदेन द्विर्द्विरभ्यस्तीयाद्धोमादन्य एव सुविहितविधानायोगादिति तेनैषामग्निहोत्रमि १८

© Dharmartha Trust J&K. Digitized by eGangotri

त्रिनामसिध्यति । किंत्वग्निहोत्रवाक्यविधेयस्यैकस्यैव होमस्य तन्नामेति प्राप्नोति नतु स्यन्त्रि
वाक्यगतत्वात् । अग्निहोत्रवाक्यविहितस्य साभ्यासस्य होमस्य गार्हपत्यान्वाहार्यपचनवा
क्यविहितानां होमानां चानुदको विरुद्धः संपत्तिवाक्ये तत्साधारण्येनाग्निहोत्रशब्दप्रयोगस
त्त्वेपि तस्य छत्रिन्यायेन लक्षणयोपपत्तेः । अग्निहोत्रवाक्यविहिते कर्मणि प्रथमावगते शक्त्य
वरुद्धेन तत्संबंधादितरेषु लक्षणोपपत्तावनेकवृत्तिकल्पनस्यान्याय्यत्वात् । अतएव
रथंतरं पृष्ठं भवति बृहत्पृष्ठं भवतीत्यत्र सन्ति वाक्ययोर्माहेंद्रस्तोत्रनामत्वेन प्रथमावगत पृष्ठ
शब्दस्य सप्तदशानि पृष्ठानीत्यनुवादवाक्ये माहेंद्रादिषु चतुर्षु स्तोत्रेषु प्रयोगो लाक्षणिक इति
प्रकृतौ पृष्ठबहुत्वं नास्तीति प्रपंचितं सप्तमे विश्वजिति सर्वपृष्ठतत्पूर्वकत्वाज्ज्योतिष्टोमिकान्य
स्तित्वप्रसंगादित्यधिकरणे । एवं चाधिकारवाक्यस्थेनाग्निहोत्रनाम्नाऽग्निहोत्रवाक्यविहि
तस्यैव होमस्य समर्पणात्तस्यैव फलसंबंधः सिध्येन्नतु गार्हपत्यान्वाहार्यपचनवाक्यविहिता

© Dharmartha Trust J&K. Digitized by eGangotri

नां होमानां। दूआहवनीयइति वाक्यसद्भावेतु विराड्संपत्तिवाक्यानुसारेणदशधाभ्यसनीयस्याग्नि
होत्रहोमस्यदशानामभ्यासानांमध्येऽष्टानामभ्यासानां दूआहवनीयइत्यनेनाहवनीयं परिसंख्याय
तेषामेवाक्षिप्तमधिकरणामेवगार्हपत्यान्वाहार्यपचनवाक्याभ्यांविधीयतेतयोश्चतुःसंख्याश्रवणा
त्समत्वस्यादृष्टत्वादितिन्यायसामर्थ्यानुवादकमितिलभ्यते। एवमग्निहोत्रवाक्यविंनस्यैवहोमस्य हि ४
देवताभेदेनाधिकरणभेदेनचसायमातस्त्वदशदशाभ्यासाः। ननुतद्व्यतिरेकेणहोमान्तराणिसंतीति
पर्यवसानेधिकारवाक्यगतमग्निहोत्रनामसर्वाविधाभ्याससहितस्याग्निहोत्रस्यसमर्पकमि
तिसर्वसाधारण्येनफलसंबंधःप्राप्नोति। यथाज्योतिष्टोमेनयजेतेतिवाक्योत्पन्नस्यैंद्रवाय्वादिदेव
ताभेदेनाभ्यसनीयस्यसोमयागस्यज्योतिष्टोमपदंकामेतिसर्वाभ्याससहितस्यसोमयागस्या
धिकारवाक्येनफलसंबंधः। नच दूआहवनीयेइतिवाक्याभावेपिविराड्संपत्तिवाक्यमग्निहो
त्रहोमस्यदशधाभ्यासविधायकमभ्युपगम्यतांनचास्त्वितितत्रमनुक्तरीत्या। [illegible]नामभ्यासानां
मधिकरणमात्रविधायकयोर्गार्हपत्यान्वाहार्यपचनवाक्ययोःसंख्याश्रवणान्नायमसामान्यानुवा २०

© Dharmartha Trust J&K. Digitized by eGangotri

दकं भविष्यतीत्य पराग्निकहोमानामग्निहोत्रहोमाभ्यासरूपत्वेन फलसंबंधः सिध्येदितिवाच्यं·
यदि स्यात्पु·नीयवाक्यं न स्यात्तदा गार्हपत्यान्वाहार्यपचनवाक्ययोस्तदधिकरणविधायकत्वा
त्वेन कत्वेदृशानामपि तदभ्यासानामधिकरणविधायकतापत्त्यापत्तेश्चतुःसंख्यानुवादासंभवेन
तयोः संख्याधिकरणविशिष्टकमंत्रविधायकत्वस्यावश्यंभावितया विराट्संपत्तिवाक्यम
ग्निहोत्राणामग्निहोत्रहोमानां प्रचयशिष्टसंख्यानुवादकमिति सकामेनापि स्वीकरणीयं तस्मादा
हवनीयवाक्यमेव तत्त्वधीनएवापराग्निकहोमानां फलसंबंधः एवं चाग्निर्मन्त्रे आहवनीयइ
तिविधौ विधेयानां मपराग्निकहोमाभ्यासानां तदनुदेशस्य स्वर्गसंबंधप्राप्त्यएमेव फलवि
त्ययं विधिरदृष्टे विधेयस्यानित्यप्राप्तत्वेनान्यस्य वाप्राप्यस्यानियम्यस्य निवर्त्यस्य चाभावा
त्स्वकेवलं परफलसंबंधबोधनार्थं· अत्रायं संग्रहः। द्वे आहवनीययुतिश्रुतौ विधिरग्निहो
त्रमधिकृत्यापरसंबंधविधानं विनास्य न स्यात्फलं किंचिन· प्राप्तत्वस्थापणीयं किल यदि

२दन्यत्रतस्यतत्र२

© Dharmartha Trust J&K. Digitized by eGangotri

हकीयत्वमूरणीयोस्तिनांशेनानिषंवानिवर्स्मनिजविषयतयादृश्यतेकिंचिदस्य·किंतुव्यापा
रवर्मेप्रथयत्पतिफलस्ययोजनार्थंपरेषांप्राप्तः पुण्यैरगण्यैरिवविबुधगणोव्येकदक्षोणिपालो।
तस्मादस्मिन्नपिविधावव्याप्तिरनिवार्येतिभावः। अथत्राप्यव्याप्तिमुद्धरति·आकांक्ष्यदि
21 र्थवादादपुनर्भक्तिफलेकर्मणोयद्विधानंतत्राप्येषानदंगीभवनक्षतिभवेत्तस्मिन्निधानस्यकतान्वो।
यत्किंचिदत्रकुत्राप्यनधिगतवतीसेवलक्ष्मस्किंतिविश्वंदूसायद्यपूप्रतिसिद्धानियमाविधिरपिस्या
दपूर्वविधानं·५वैश्वदेवींसांग्रहण्यपीतिवपकुनामकाम्यो वैश्वदेवास्सुजाता विश्वानिवदेवान्वेनभा
गधेयेनोपधावतितएवास्मैसजाताप्रयच्छन्तियाम्येवभवतीतिश्रूयतेतत्रसांग्रहणीष्ट्यामिफले
त्र३ यद्विधानंतत्रतस्याख्यान्याव्यर्थं राद्धिसन्न्यायेनसमनंतरपठितार्थवादादेवतस्याप्तिसंभवात्·
आकांक्षितोह्यत्रविधिनाऽर्थवादस्फलितलाभोऽयं·विशिष्यवात्रग्रामशब्दोयंबद्धकर्थप्रतिमहा
भाष्योत्करनेकार्थस्यफलसमर्पकस्यग्रामशब्दस्यविवक्षितार्थनिर्णयलाभाय·किंतुसांग्रहा २१

© Dharmartha Trust J&K. Digitized by eGangotri

यत्प्यास्तदर्थवादात्तत्फलक ल्पनायामामनमस्यामनस्य देवा इतिनिस्त्र आहुतीर्जुहोति॰ एतावं
तो वैसआ लायमृहंतोयेक्षुल्लुका यास्त्रियस्तामेवावरुंधे लए नमवरूढ्याउपतिष्ठंतीतिन्नतसंनिधि
पठितानामामनहोमानामपि तदर्थवादात्फलार्थत्वकल्पनाप्रसक्तावेतेषां सांग्रहण्यंगत्वं नप्रा
प्नुयादितितत्प्राप्त्यर्थं एतत्सत्तेहि मलक्षणाविधिना सांग्रहण्याः फलसंबंधेऽवगते फलवद्भ
ल्याया दामनहोमानां लदंगत्वं प्राप्नोति॰ एवं चात्र विधेयाः सांग्रहायण्याः केनापि रूपेणा
दृश्ययाग संबंधाप्राप्तिर्नास्तीत्यवाप्यव्याप्तिरनिवार्या॰ ननु लक्षणप्रकृत विध्यकृदृश्य समप्राप्त
सतीति न विशेष्यते किंतु विधिविषयेऽन्यस्मिन्वाप्रकृतविध्युद्देश्य मन्यद्वा किंचिदप्राप्तं सती
ति॰ तथा च नैतासामव्याप्तीनामवकाश इति चेन्न॰ एवं व्रीहीनवहंतीत्यादिष्वपि सिद्धो नियम
विधिरप्यपूर्वविधिः स्यात्॰ दार्शपौर्णमासिकप्रयाजादौ सोऽयमतिदिविकृतिमप्राप्तं सतिलदि
धिमक्षत्तेः अतस्तथा नोविस्यादव्याप्तिः स्यादेवेति भावः। स्यादेतद्विधिरत्वं तमप्राप्त

© Dharmartha Trust J&K. Digitized by eGangotri

इत्यस्य तद्धितप्रवृत्तावप्राप्तिः प्रसक्तिमतीति पर्यवसितोर्थस्तस्य श्लोकस्य व्यांनसमयेसू ख्या २
चितस्तेन तस्य विधेस्तत्प्राप्तिफलकत्वमर्थाल्लभ्यते अनायासेनैकस्मिंश्चिद्यत्किंचिदप्रा
प्तेस्सतीति विवक्षायामपि तस्य तत्प्राप्तिफलकत्वसाधिकाभस्य लक्षणे निवेशनान्नावह
ननियमविधावति व्याप्तिप्रसंगः। तस्य सोयं यदिषु प्रयाजादिप्राप्तिफलत्वाभावात्।
22 एवं चैवेहतदग्न्यनियतत्वविधिष्वविधेयानामपि गुणकामानां तद्धित्वक हृष्यासु विकृति
षु प्राप्ते ह्यदिशादिकर्णोवामयन्तिकशनीकान्तर्गत तद्वत्तन्तर्गतविधिषु विधेयानामे
वाग्नेयत्वादीनां तद्धित्वमनुदिश्यासु द्वादशाह विकृतिषु प्राप्तेरूपांशु पौर्णमास्यां यजन्तीति
विधौ विधेयस्योपांशु यजस्य तद्धित्वमनुद्दिश्य स्वर्गप्राप्ते है आहवनीय जुहोति विधाव विधे
यानामपराग्निकदेवानामनुदिश्य स्वर्गप्राप्तेः सांग्रहायणी फलविधाव विधेयानां
तस्यां निधिपठितानामनुदिश्येन तद्धितेय कर्मणि प्राप्तेश्च फलस्य सङ्ख्यावान्तकाय व्या २२

© Dharmartha Trust J&K. Digitized by eGangotri

त्विशंकावकाशोपीत्याशंक्याह उद्देश्येत्यत्र वाक्यविधिपदमितरद्वापिनमप्रामिमस्याप्तस्यापि
नत्रत्वन्वाप्तिविधिरितिकरणेप्येवमप्राप्तिरेव ज्योतिष्टोमादिकानां विदिवयतिफलेसर्वकामो
किसिद्धेकिंप्राप्येधर्मजातेमकरणानीतस्वर्गकामश्रुतिभ्यां । ६ । ज्योतिष्टोमेनस्वर्गका
मोयजेतदर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेतिवाक्ययोः इदंवाक्यद्वयं यज्ज्योतिष्टोमशब्दग्र
हीतस्यसोमयागस्यदर्शपौर्णमासशब्दाभिधेयानामाग्नेयादियागानांचस्वरूपप्राप्त्य
र्थंसोमेनयजेतेतिवाक्यमाग्नेयादिवाक्येष्वतेषांप्राप्तत्वादितिनावत्साधमेव नापितत्का
स्वर्गफलसंबंधप्राप्त्यर्थंएकैकस्मैवाअन्येयज्ञक्रतवः कामायाह्रियंतेसर्वेभ्योज्योति
ष्टोमः एकैकस्मैवाअन्येयज्ञक्रतवः कामायाह्रियंतेसर्वेभ्योदर्शपूर्णमासाविति
वचनाभ्यांतेषांपश्वादिफलकत्ववत्स्वर्गादिफलकत्वस्यापिप्राप्तिसंभवात् नाप्यंग
संबंधबोधनार्थंप्रकरणकल्प्येनवाक्येनतत्प्राप्तिसंभवात् नापिस्वर्गकामवाक्य

© Dharmartha Trust J&K. Digitized by eGangotri

23

योरंगस्संबंधबोधकत्वमपि लक्षितशब्दकल्पनां विना संभवति तयोरंगसमर्पकशब्दाभावात् न
चरीक्षणीयादिसन्निधानादिवाक्यविशेषितयोस्तत्संबंधबोधकत्वं संभवतीति वाच्यं। दीक्षणी
यादिवाक्ये क्षपिय ध्वोप बंधरहितस्वतंत्रारम्भात् सत्वेन स्वतंत्रस्तेषामन्यविशेषणताला
भात्। तस्मात्स्वर्गकामवाक्ययोरंगसंबंधबोधकत्वांगीकारे पितयोर्दीक्षणीयादिसन्नि
धानादिवाक्यानां वा प्रत्यक्षमप्येकवाक्यत्वं प्रकरणबलेनैकवाक्यतापादकशब्दकल्पन
योपपादनीयं। तथाहि ज्योतिष्टोमेन दर्शपूर्णमासाभ्यां वा स्वर्गापूर्वं भावयेदित्येकेन भ
वतिप्रकाराकांक्षा कथंभावेन ताभ्यां वा तद्भावनीयमिति। अनिर्ज्ञातप्रकारत्वात्। न हि
गोधूमैर्मण्डकाः कार्या इत्युक्ते तत्प्रकारानभिज्ञस्य नियोज्यस्याकांक्षा न भवति। क
थं गोधूमैर्मण्डकाः कर्तव्या इति। कुम्भकारेण रक्षणविधौ एकेन प्रकारानभिज्ञस्य भव
त्येव तदाकांक्षा। तं प्रति हस्ताभ्यां कुठारं गृहीत्वा तदुपमननिमग्नव्यापारस्य वर्तनेनेति २३

© Dharmartha Trust J&K. Digitized by eGangotri

नदिह परस्पराकांक्षा ३

व

वकृव्यमेव । एतत्प्रकारस्य प्रायेण लोकप्रसिद्धत्वात्तदुत्थान्तर्भूतस्या कांक्षा । इह तु ज्योतिष्टोमापूर्वसिद्धिं प्र

म पादनस्यात्यंतलौकिकत्वात्प्रकाराकांक्षावश्यंभाविनीतया दीक्षणीयादीनामप्यस्ति प्रयो

जनाकांक्षालक्षणे प्रकरणे सति रेवतीषु वारवंतीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन

यजेतेति वद्दीक्षणीयादिवाक्यानां प्रत्यक्षज्योतिष्टोमादिवाक्यैकवाक्यत्वे वा सतिये

नशब्देन दीक्षणीयादिव्यापाराणां ज्योतिष्टोमादिविशेषणतोच्यते नात्र कश्चन कल्पनेनाप्र

त्यक्षमेकवाक्यत्वं प्रकरणबलेन कल्पनीयं । यथा कीदृशं देवदत्तगृहमिति प्रकारा कांक्ष

यां द्वारोपांतलिखितशंखपद्मं लिखितं निधिबुधपेवं कालकृतानि कुंडदेवदत्तगृहमित्य

भिधानतो विशेषणमत्र काइहदेवदत्तगृहं वर्त्तते द्वारोपांतलिखितशंखपद्मोऽस्तः निकुंडे

चंपकाः संतीत्येतावत्सकलोऽपिगृहस्य प्रकाराकांक्षया प्रकरोपदेशस्य प्रयोजनाकांक्ष

© Dharmartha Trust J&K. Digitized by eGangotri

यात्तदुचितशब्दकल्पनयाएकवाक्यार्थं कल्प्यतइत्येवमतमेवोपपादितं तंत्ररत्ने· यथा च स्वर्गकामवाक्य
योरंगसंबंधबोधकत्वांगीकारेपि प्रकरणबलान्न द्बोधकंकल्पयितुंशक्यं· तथा हि यद्यपि सर्वका
२५ मवाक्ययोराख्यातरहितयोर्योगभावनाश्रूयते· तथापि चतुर्थ्यां ज्योतिष्टोमस्य दर्शपूर्णमासयोश्च स
मे ४ र्वकामार्थत्व प्रतिपादनाज्ज्योतिष्टोमेन दर्शपूर्णमासाभ्यां च स्वर्गपशुपुत्रहिरण्याद्यपूर्वं भावयेदित्यर्थ —
तोलाभात्स्याद्वचनस्य काकांक्षा· दीक्षणीयादीनां समिदादीनां चपूर्ववत्सप्रयोजनाकांक्षास्त्येवेति न
न ६ एवमुभयाकांक्षालक्षणेन प्रकरणेन दीक्षणीयादिभिः समिदादिभिश्चोपकृत्य ज्योतिष्टोमेन दर्शपू न
र्णमासाभ्यां च स्वर्गपश्वाद्यपूर्वं भावयेदिति वाक्यं किमिति कल्पयितुं न शक्यं· एवं स्वर्गसंबंध
स्यांगसंबंधस्य चान्यलभ्यत्वेपि केवलस्वर्गसंबंधे सर्वकामवचनत्वप्रसंगस्य स्वर्गकामवाक्ययो
रकनार्थत्वं मन्यमानास्त्वेयोरंगसंबंधबोधनार्थत्वमित्याहुः। अन्ये तु स्वर्गकामश्रुतेरविरोधे
न स्वर्गकामवाक्ययोरेव स्वर्गसंबंधबोधनार्थत्वं सर्वकामवाक्ययोस्तु सामान्यश्रुत्य प्रवृ २५

© Dharmartha Trust J&K. Digitized by eGangotri

नयोः स्वर्गेतरसंबंधबोधनार्थत्वमित्यर्थः ॥ उभयोरप्यन्यतः प्राप्तिसंभवान्न व्यतिरेकेपा च क
विकस्य विध्यापणी यस्यादर्शनात्स्वर्गकामवाक्ययोरुक्तलक्षणव्याप्तिः सर्वथैवानिवार्येति भा
वः ॥ ६ ॥ अथ प्रकारान्तरेणोदाहरन्नदितरापूर्वविधिष्वव्याप्तिमुदाहरन्ति · नानाशाखाग्निहोत्रप्र
भृति विधिषु न व्याप्तिरेवं सति स्यात्तन्नाद्विध्यभ्यासवापि नदाधिगतिः स्यात्छिविध्यन्तरेण · सा
सा प्राप्तिरुक्त एव वाक्यद्वयफलवती त्वेवमप्राप्तिस्त्वलं हेतुतान्याप्तेर्निरासेन नियमपरिसंख्या
नुरक्ते निवृत्तिः ॥ ७ ॥ अग्निहोत्रादिविध्यस्याव न्नानाशाखास्कश्रूयते · तत्र शाखान्तरविवि
ध्यभावेनानाशाखास्कविप्रकीर्णानामङ्गानामिवाग्निहोत्रादीनामपि शाखान्तरतः प्राप्तिः
स्यादेव · तत्रस्वतन्त्रविध्यभावेऽन्यतः प्राप्यसंभवरूपस्याप्राप्तविशेषणार्थस्याभावात्सर्वेषु
विनानाशाखास्नानापूर्वविधिष्वव्याप्तिरपरिहार्या । ननु शाखान्तराधिकरणे तेषां तत्र छा
स्वाध्यायिनं प्रतिस्वस्वशाखाध्ययनप्राधान्येनाज्ञातज्ञापकत्वं समर्थितं · सत्यं । नत्वज्ञात
ज्ञापकत्वसिद्धिमात्रेणाप्राप्तविशेषणार्थो विवक्षितो लभ्यते · कथा ज्ञानत्वमेवाप्राप्तशब्दा

गो

© Dharmartha Trust J&K. Digitized by eGangotri

र्थः। तथा सति नियमपरिसंख्ययोरप्यर्थाक्षेपमंत्रलिंगाभ्यां प्रागेव प्रवृत्तयोर्ज्ञातज्ञापकत्वसंभवेन
तयोरनुवादत्वापत्तेः। न त्वभ्युदयशिरस्कमानिसंभवराहित्यमप्राप्तस्यैतेन विवक्षितं। तत्र
न स्वाध्यायोऽध्येतव्य इति नियमविधिबलादध्ययनजन्यहीनस्य स्वार्थज्ञानस्य तत्तद्वाक्यजन्यतदर्थ स्वा
ज्ञानस्यैवाभ्युदयकारित्वेन स्वार्थांतर्गततद्वाक्यसंज्ञावेशात्स्वांतर्गततद्वाक्यजन्यज्ञानस्याभ्यु
दयकारित्वस्याभावान्न च्छात्रवाक्यापेक्षया सर्वेषामग्निहोत्रादिविधीनामज्ञा स्वाद्
श्री तज्ज्ञापकत्वेन स्वर्गप्राप्तिफलकत्वमपि विशिष्टरूपमस्त्येवेति नानार्थोऽग्निहोत्रादिविधिषु न्द
न्या० व्याप्तिः। नापि स्वर्गकामवाक्येषु व्याप्तिरस्तु पिसायामिदृश्यवाक्यन्यायेनाभ्युदयफलकत्वभा
व्यभावसत्त्वात्। तथाहि सप्तदश सामिधेनीरनुब्रूयादिति समारभ्य श्रूयते। अत्र विधीयमानस्य
साप्तदश्यस्य न सामिधेनीद्वारा प्रकृतौ निवेशः प्राकरणिकेन पांचदश्येन विरुद्धत्वात् किंतु वि
कृतिष्वेव तत्रापि मित्रविंदादिष्वेव निवेशो न तु सर्वासु विकृतिषु अनारभ्याधीत
न हि साप्तदश्यं यावत्सामिधेनीद्वारा स्वफलविशेषसंगं कल्प्यते तावत्प्राकरणिकैर्वैकृतैर्मित्र २५

विंशत्यादिसंबंधे कृते क्षीणार्थापि निर्द्धक्रतुसंबंधं कल्पयितेनारभ्याधीतस्य साप्तदश्यस्यो
पसंहारकर्त्तानितत्प्रकरणाधीनानिसाप्तदश्यवचनानि · ततश्च प्राकरणिकवचनैः साप्तदश्यस्य
क्रतुसंबंधसिद्धिः । अनारभ्याधीतेन वाक्येन सामिधेनीसंबंधसिद्धिरिति मीमांसकमर्यादा ·
अत्रानारभ्यविधानाभावेपि साप्तदश्यस्य क्रतुसंबंधवत्सामिधेनीसंबंधोपि प्रकरणा
केरेव वचनैः सिद्ध्यतीत्यनारभ्यविधानस्य वैयर्थ्यशंका प्राप्नोतीति · अत्रोक्तं तत्रैतत्ते · य
द्यपि प्राकरणिकैनैव क्रतुसंबंधः सामिधेनीसंबंधश्च सिद्ध्यति तथापि वाक्यद्वयाम्नानाद
वं विज्ञातमभ्युदयकारीति विज्ञायते अर्थवादप्रसंगे चैतद्वदितितन्भास्यान्यायस्य सार्वकाम्यवाक्य
ग्रतार्थं स्वर्गकाममात्रानुसारधारण्यात्तत्राप्यभ्युदयाधिकस्कूप्तमभावात्तत्स्यंदकर्यनरति
चेत् · तथासति नियमपरिसंख्यानविध्योरन्यतमप्राप्तिरनिविशेषणाभ्यां निरीक्षितेनस्यात् · तथा
पिसाध्यापनियमविधियंत्रलोदेवार्थक्षिप्त मंत्रलिंगाभ्यामवघातादिप्राप्तेरभ्युदयकारि

© Dharmartha Trust J&K. Digitized by eGangotri

स्य

त्वाभावस्यैव तत्कुंभकत्वात् । तस्मादन्यतः प्राप्त्यभावमात्रमिह प्राप्तिरिति वृत्तकृद्भिर्मिलकटाहूतस्व
स्यैव व्याप्तिः स्य [illegible] इति भावः । ननु तस्य मूलः प्राप्त्यभावमात्रम प्राप्तविशेषणार्थः । प्राप्त्य
भावस्य कतमो [illegible] ध मात्राप्रवृत्तादिति नेष्यते किंतु विध्यंतरा प्रवृत्तिसंहितायां केवलायां
२८ वानत्र हि विध्यप्रवृत्तो यः प्राप्त्यभावः स सर्वोप्यप्राप्तविशेषणार्थ इतीष्यते ननु एवं तत्र छागस्या
ग्निहोत्रा [illegible] दिविध्यप्रवृत्तो नदन्यस कलस्याप्यवगततत्वादिविध्यप्रवृत्तिसंहितायां
नद्व्याप्तिरक्षते तिर्नाकाशगस्वागमनादिनिहिवृत्तादावधिव्याप्तिः । नापि स्वर्गकामादिभ्यो
२८ रव्याप्तिः । तद्भावतौ सार्वकाम्यादिविध्यप्रवृत्तिसंहितायां ज्योतिष्टोमादीनां स्वर्गसंबं
धाप्राप्तिसत्वात् । वसंते वसंते ज्योतिषा यजेत इति यावज्जीवं दर्शपूर्णमासाभ्यां यजेत
ध्यां २ इति विधिषु [illegible] नेषां प्रत्यवायपरिहारार्थतावगमेन नलव फलाकांक्षाशंते विश्वजिन्न्या
या विषयत्वात् ततः स्वर्गसंबंधप्राप्तेरनाशंकनीयत्वात् । अवरपक्ष वित्तकं सिन्निपम २९

© Dharmartha Trust J&K. Digitized by eGangotri

विधौ तत्र द्विधा प्रवृत्तौ विधित्वं तत्र प्रवृत्तिसामग्र्यन्याया योग्यमनुसारणीयं: अन्यथा व्रीहिभिर्यजे
तेति नियमविधौ न लक्षणस्याप्राप्तिः स्यात् व्रीहिशास्त्राभावे यवशास्त्रेण यवाना
मेव नियतप्राप्त्या व्रीहीणां पक्षप्राप्त्यभावात् एवं यवैर्यजेतेति नियमविधावपि तल्लक्षणाप्राप्तिः
स्यात् तदभावे व्रीहिशास्त्रेण व्रीहीणामेव नियतप्राप्त्या यवानां पक्षप्राप्त्यभावात् तथोच हुं ४
वरो यूपो भवतीत्यादिवैकल्पिकद्रव्यविधिष्वपि सर्वे द्रव्यविधयो नियमविधय इति मीमांसकमर्या
दया नियमविधित्वेन तल्लक्षणीयेषु तदप्राप्तिः स्यात् वैकल्पविध्यभावे प्राप्ततेन खदिरादेर्यू
पो भवतीत्यादिशास्त्रेण बोधकत्वः खदिरादीनामेव नियतप्राप्त्या औदुंबरादीनां पक्षप्रा
प्त्यभावात् तत्र व्रीहियवशास्त्रयोर्द्वयोरप्यभावे पुरोडाशप्रकृतिद्रव्याकांक्षया व्रीहियव
नीवारादीनां पक्षप्राप्तौ प्रकृते वैकल्पविधीनामभावे पुरोडाशं यूपादिप्रकृतिद्रव्याकांक्षा
यां धवखदिरपलाशौदुंबरादीनां पक्षप्राप्त्या व्रीहियवौदुंबरादिशास्त्रेषु नियमविधिल

© Dharmartha Trust J&K. Digitized by eGangotri

27
लक्षणं समर्थनीयं । तथा परिसंख्यालक्षणेपि न्यायोयमनुसरणीयः । अन्यथामित्रविंदाध्वरक
ल्पवेम धवादुर्मास्यपश्वाग्रयणादिनानाकर्मसमाम्नातस्य तद्रव्यविधिषु अनारभ्याविहितशा
स्त्रस्योपसंहारार्थत्वेन तद्विकृतीनां साप्नदेश्यसंबंधव्यावृत्तिफलकतया परिसंख्यारूप
पुतलक्षणव्याप्तिः स्यात् । मित्रविंदागतविध्यभावे ऽध्वरकल्पागतविधेर्मित्रविंदासाधारण्येन त
ध्वरकल्पेतरसकलविकृतीनां साप्नदेश्यसंबंधव्यावृत्तिफलकतया मित्रविंदायामन्यतः साप्न
देश्यप्राप्त्यभावात् । एवमुक्तन्यायेनैवाध्वरकल्पादिष्वपि तत्प्राप्त्यभावात् । तथा गृहमेधीय [redacted] ग
ने वाज्यभागौ यजत्यग्नये स्विष्टकृते समवद्यति इत्युपक्रम्य तदुत्साद्य कृतं गम्पुनाविधि
पुवोदक लोषकत्वेन तद्भिन्नानां गृहमेधीयसंबंधव्यावृत्तिफलकतया परिसंख्यारूपे पुत
लक्षणव्याप्तिः स्यात् । आज्यभागसाधारण्येन स्विष्टकृदितरसकलचोदकप्राप्त्यांगानां गृ
हमेधीयसंबंधव्यावृत्तिफलकतयाज्यभागयोरन्यतो गृहमेधीयप्राप्त्यभावोक्तन्यायेनै वा२
वा स्विष्टकृदादीनामपि तत्प्राप्त्यभावात् । ततश्च मित्रविंदादिप्रकरणगतसकलसाप्नद
ः आज्यभागविध्यभावे स्विष्टकृद्विधेः ः
न३
२७
© Dharmartha Trust J&K. Digitized by eGangotri

श्यविध्यभावेनारभ्याधीतस्याप्तदश्यविधिनाप्रकृतितः पांचदश्यविरोधान्निवृत्ते नाविशेषात्तस
र्वास्वविकृतिषु साप्तदश्यप्राप्त्याग्रहमेधीयप्रकरणगतस्य कलत्राप्तागपुनर्विध्यभावेनोद
कात्सवेषामाज्यभागादीनां ग्रहमेधीये प्राप्त्यावतेषु परिसंख्यालक्षणे समर्थनीयं। तद
कलशरवागतताग्निहोत्रविध्याद्यभावेऽग्निहोत्राद्यप्राप्त्याने पूर्वविधिलक्षणं समर्थ
यितुं शक्यमेव अतो न क्वाप्यव्याप्तिदोष इत्याशंक्याह न तद्विध्यपवर्गौ सुलभमिति तद्वि
ध्यपवर्गसंयुतायां तेषामप्राप्तिमत्वं नियमपदयवश्रीहिपक्षाप्तिमावत्। नानाकर्मोपसंहृत्य क्वचिन्नि
यतत्सत्प्राप्त्यघृश्याप्तिवक्त्वेवेक्षेनु पृष्ठस्थितिनियममुखात्रिप्रसक्तिः प्रसज्यते। ।८। एवमप्राप्तिप
रिहारार्थमतियमेनैकानेकविध्यपवर्गनावप्राप्तेरपूर्वविधिलक्षणनिविष्टकल्पनायामुपहृत्याह वि
हितिपृ प्रकृतितो विकल्पेन प्राप्तयोर्ग्रहद्वयं तरयोरन्यतरनियमार्थं वचनस्य छंभवतिरर्थं तरं एव ८३
भवतीति विधेयो विकृत्यतिरात्रे चम प्रकृतितो विकल्पेन प्राप्तयोः षोडशिग्रहणाग्रहणयोः षोडशिग्रह
नियमार्थं पुनरेहवद्धिरात्रस्य घटयनइति विधेय ग्रहमेधीयप्रकृतितः समुच्चित्य प्राज्यभागादि

© Dharmartha Trust J&K. Digitized by eGangotri

या

नरांगक लोप मध्ये चोदक लोपकत्वा न दिलरांग परिसंख्यास्त्वे आज्यभागौ यजती ति विधेयौ नाप्ति
माप्तिः स्यात्. एक रूपथंतरस्य पयोः पोडशिग्र हस्याज्यभागयोश्च प्राकृतनवैकृ तो विध्यभावे सर्वथैवा
प्राप्तिस्सत्वात्. व्रीहियववद्विध्योर्वैकृतद्रूप विधिषु प्राकरणिकसाम दृश्वा विधिपुरूहमेधी यथित्रि
२४ एह्रूलादि विधिषु चानेकविध्यप्रवृत्त्युपेक्षया पाक्षिकी [illegible] यतां च प्राप्तिं संभाव्य नियमपरिसंख्या
विधित्वेन समर्थि ते पुनर्नादृष्ट्या पक्षेवाप्राप्तिरपूर्व विधिलक्षणेनान्य तुं शक्यते स्यान्निओही हो न्द्रा तथा ५
५ द्वि क्षुनीति आग्नेयपूर्व विधावप्राप्तेस्तद्विधिमात्रापत्र रूपपक्षत्वेन तत्र यानिः स्यादिति तत्परि हा
रार्थमाविय मैनं कानेकविध्यप्रत्यासत्तल्लक्षणे नि वेशनी मुत्वात्. तथा चेत्तदुज्जुत्पत्त्वा कांग कांगति
अष्टवृपर्ष्ये भ्गनि चतुर्धवायामिति कार्य । विशेषासंयुक्त नयोत्पन्नात्तो होवा ज्यादी नां वैनियो
गाविधिषु पञ्जु कांग कांति प्रयाजे भ्यस्तत्रद्धेषु भवि प्रयाजानुयाजेभ्यस्तत्र. सर्वस्मै वाजुघ २
ह्यायगत्यंत यज्ञ वापामान्याग्निषेवं रूपेषु मध्ये जोहवो पश्च. नाज्य विनियोग विध्यानियम
विधित्वेनाभ्युपगतयानियमविधित्वं त्रयाणामेवैतेषां विधीनां मध्ये रस्यपेक्षया जोहवाज्या २८

७ प्रवृत्त्यपेक्षया सर्वथैवाप्रागप्तेरपि न [illegible] प्राप्ति स्यात्. न त्वनेकविध्यप्रवृत्त्य

© Dharmartha Trust J&K. Digitized by eGangotri

दीनां द्व्याकांक्षेषु प्रयाजादिषु पक्षप्राप्तिसंभाव्यसमर्थनीयं तन्न द्विध्यप्रत्यपेक्षया विधेयस्यो
जोहृवोपभृन्नाज्ययोः प्रयाजानुयाजेषु प्राप्तिरपि संभवति सर्वयज्ञार्थध्रौवाज्यान्वयेन निराकां
क्षेभ्यः प्रयाजानुयाजेभ्यः परावृत्तस्य तयोरयज्ञरूपेषु आज्यापेक्षसदनकरणादिकार्येषु च प्रा
प्तेरिति तयोरपि विध्यारतिव्याप्तिः स्यादेवमनियमेनैकान्ते कविध्यप्रत्यपेक्षयापाक्षिक नि
यतप्राप्त्योर्नियमपरिसंख्यालक्षणानि विषत्वकल्पनायां तयोरविलक्षणयातिव्याप्तिः स्यात् ॥ पि ५
तथापि ध्रौवाज्यविनियोगाविधेर्न विधयत्वेपि नियमविधित्वं न संभवति जोहृवोपभृन्नाज्ययोः
त्या ४ प्रयाजानुयाजार्थत्वे सति परिशेषादेव ध्रौवाज्यस्य तदितरिकृत्यापेक्षसर्वयज्ञार्थत्व नियम
मसिद्धेः । न च स्वाज्यस्यापि तेषु पक्षप्राप्त्या परिशेषतो सिद्धेर्नियमविधित्वं संभवतीति वा
च्यं जोहृवाद्याज्यग्रहणे विनियोगेन निराकांक्षस्य स्वस्थानाज्यस्य स्वतस्तेषु प्राप्त्यसंभवा
का त्। तस्माद् द्व्यापेक्षसर्वयज्ञेषु यज्ञरूपेषु सदनकरणादिषु च ध्रौवाज्यस्य समुच्चितत्व
माप्तेः सदनेकरणादिव्यावृत्त्यर्थं तस्य परिसंख्याविधित्वमेवमुक्तं तत्र याणन्मते पांवि

५६

© Dharmartha Trust J&K. Digitized by eGangotri

धीनामप्रत्नेोध्रौवाज्यस्यतद्विनियोगविधिसंग्राह्येषु आज्यभागादिषु पक्षप्राप्तिः संभवतीति तत्र
नियमविधिलक्षणस्यातिव्याप्तिः। तथा रथंतरं पृष्ठं भवतीति वैरूपो विधिर्नियमविधिस्तस्य
प्राकृतबृहद्रथंतरविकल्पविधेश्चाग्निष्टोमप्रकृतिना बृहद्रथंतरयोः समुच्चित्यप्राप्तिः
संभवतीति तत्र परिसंख्यालक्षणस्यातिव्याप्तिः। पृष्ठ्यः षडहो बृहद्रथंतरसामाक्व
र्यऽतिगावामयनिके षडहे रथंतरपृष्ठ ह स्त पृष्ठविधिस्तु पूर्वविधिस्तदंगगतेषु हतीयादिषु हस्कं
नत्स्कृषिभूला द्वादशाहादिकान्नानापृष्ठषडहाक्रमेण वैराजशाक्वररैवतपृष्ठानामेवप्रा
प्तत्वेन तत्रीयरथंतरं चतुर्थे दिनत्वं च मे रथंतरं पृष्ठे बृहदित्यस्यार्थस्य कथंचिदप्राप्त्यभा
वात्। द्वादशाहिकनानापृष्ठविधिप्रभावतस्मिन्गावामयनिकषडहे ज्योतिष्टोमा बृहद्
रथंतरपृष्ठयोरनियतप्राप्तिः संभवतीति तत्र नियमविधिलक्षणस्यातिव्याप्तिः। आज्यपा
गेपुनर्विधाने न गृह्णमेधीयवदपूर्वविधे प्रयाजानुयाजप्राप्त्यभावात् तत्र बर्हिषः प्रयाजा
न्यजति अपबर्हिषावनुयाजान्यजतीति बर्हिर्वर्जितत्प्रयाजानुयाजप्राप्त्यर्थोऽपूर्वविधिः। २८

© Dharmartha Trust J&K. Digitized by eGangotri

नत्वाज्यभागपुनर्विध्यभावे बर्हिःसंज्ञकप्रयाजानुयाजयोरूर्ध्वमिति किं प्रयाजानुयाजानां वस्तु
मुख्यस्य प्राप्तिः संभवतीति तत्र परिसंख्यालक्षणस्यातिव्याप्तिः। एवमनियम्यस्यावहननादिनियमे
नैकानेकविध्यप्रवृत्तेः पूर्वविध्यादिलिलक्षणानुप्रवेशकल्पनमयुक्तमिति भावः। इत्यष्टमश्लो
कविवरणं। अथ नवमश्लोकोपानतनिका। स्यादेतत् हुतत्रस्थं तत्र पश्वादिविधिषु पूर्वविध्या
दिलक्षणाननुगमेनाव्याप्तिः। नानालक्षणसमावेशानुसारेणानेकविधिरूपत्वांगीकारे
दोषाभावात्। नावतारप्रयाजादिष्वनुष्ठानभेदाभावात् उपधेयसंकरेऽपि तत्तल्लक्षणोपाधी
नामसंकर्यविरहे केकस्मिन्वाक्यविषयभेदेनापूर्वविध्यादिलक्षणानामुपजीव्योपजी
वकभावेन तत्तत्फलानां च सांकर्यस्य प्रतिपन्नत्वेन तत्र स्यादेकानेकविध्यप्रवृत्तिभे
देनापि तदुभयसांकर्यस्याप्युपगमसंभवात्। न च यदि उपांशु पौर्णमास्यां यजन्निति वाक्ये
उपांशुयाजप्राप्तफलसंबंधप्रापकत्वेन तस्मिन्पौर्णमासीसहप्राप्ताऽमावास्याऽसंबंध
मावर्त्तकत्वेन चापूर्वपरिसंख्याविधिलक्षणयोः सांकर्यं नाव्यवहारेणीकृतं तत्र श्लोकव्या

© Dharmartha Trust J&K. Digitized by eGangotri

स्यानि सायंजुहोति प्रातर्जुहोतीति विध्योर्नियमपरिसंख्याविधिलक्षणसांकर्यं दृश्यते। तो
खल्वग्निहोत्रं जुहुयात्स्वर्गकाम इति विहितकाम्याग्निहोत्रप्रयोगस्य अनियतकालत्वप्रा
प्तौ कालविशेषनियमार्थो। यावज्जीवमग्निहोत्रं जुहोतीति विहितनित्यप्रयोगस्य सातत
त्येन सर्वकालत्वप्राप्तौ सायंप्रातः कालावच्छिन्नमेव जीवनं निमित्तमिति निमित्तविशेषणसम
र्पणेनान्यकालव्यावर्त्तकौ च। यदा अश्वः श्यावो दक्षिणेत्यपदव्यदक्षिणाविधिरिहोदाहरणं
सति गौश्चाश्वश्चेत्यादि ज्योतिष्टोमिकदक्षिणाविधिना अश्वस्य गवादिभिः समुच्चित्य प्राप्तौ श्या
वनियमार्थश्च। यद्योन्यायां उत्तरयोर्गायतीति विधावपूर्वनियमविधिलक्षणसांकर्यं दृश्यते
कथं क्रतौ स्तोत्रसाधनानां साम्नां यथा धर्ममकस्यामृचि गानं प्राप्नोत्येकं साम तृचे क्रियते स्तो
त्रीयामिति वचनादेतालिंगात तथा निरुक्तिस्थापितमेकर्चस्थानियतत्वे स्वाध्यायवत्तत्त्वे वा लिंगद
र्शनादिति पूर्वपक्षोत्तरपक्षस्तत्राभ्यां दशमाध्याये। तत्रस्थले पाठस्थयोनिषु गीयमानानां तु
न्ययोरपि ययोः कयोश्चिदृचोर्गेयत्वे प्राप्ते संशयविशेषपरिहारार्थं योनिसमर्थं स्कन्धे च ३०

© Dharmartha Trust J&K. Digitized by eGangotri

गातव्यमितितिनिर्णीतं तदभ्यासः समासुस्यादिति नावमिकाधिकरणे॥ नन्वेदं वचनं प्रवर्त्ततियद्यो
न्यांतरुत्तरयोर्गायतीति॥ अत्र योनिग्रंथपठितयोर्योन्युत्तरयोर्गानं विधीयते किं तूत्तराग्रंथपठि ८२
तयोस्तदुत्तरयोस्तत्रैवोत्तराधादस्यपरांतरमसंनिधाननिरपेक्षयारूढ्याप्रसिद्धेरितिनिर्णी
तं नैमित्तिकं तूत्तरात्वमितिनावमिकाधिकरणे उत्तराग्रंथपठिते वोत्तरेरथंतरादियोनीनां तादृ
शसमछंदस्के वामदेव्यादियोनीनां तत्समछंदस्के एवं चरथंतरादिसाम्नां संशयविषये पदि
हारार्थमुत्तराव्यतिरिक्तयोरेव कयोश्चिद्दृचोर्गानप्राप्तावप्राप्तोपराप्राप्तप्राप्त्यर्थमुत्तराविधिः॥
यो वामदेव्यादिसाम्नामुत्तरयोरन्ययोर्वा कयोश्चिद्योनिसमछंदस्कयोर्गानप्राप्तौ उत्तरानियमार्थ
इति॥ को पुनः संशयविषयो यत्र संशयः साम्नो हि साविज्ञातस्य कृत्स्नापेक्षया कल्पते॥ यद्यपि
कछंदस्कायामुत्पन्नं साम न्यूनछंदस्कायामृचि गीयते तदा केनचिदेव सामभागेन कृत्स्नर्चा
खाधिक्यसामभागाश्रयाणां वाद्धिः स्यात॥ यदि न्यूनछंदस्कायामुत्पन्नमधिकछंदस्कायांगी

© Dharmartha Trust J&K. Digitized by eGangotri

येन तदा त्वं साम रूक्पाशिपूर्वश्रुमंस्यात्. तथा स्तृष्टीरुपदधातीत्यादिविधौ विधि धृ विधिलक्षणा
नां संकरो दृश्यते. कथं स्तृष्ट्यादिभिः शब्दैः स्तृष्टिशब्दादिमन्त्रेणोपधेया इष्टका उच्यन्ते. तदानास्मा
उपधानो मन्त्र इतीष्टकास्तु लुकवमतो रिति निपातिनिस्मरणात्. अत्र न तावदुपधानविधीयते
इष्टकाभिरग्निं चिनुत इत्यनेनैवाप्राप्तत्वात्. इष्टकानामनुपधानेन चयनाद्यनिवृत्तेः। ननु तथापि
इष्टकाङ्गत्वेन तत्तद्विधानेनैव समुदितानामपि इष्टकानां कदाचिदुपधानं प्राप्नुयान्न त्वाभूत्स
एकमेवोपधानमस्त्विति एतदर्थमिष्टकाङ्गत्वेन तद्विधानं स्यात्. तथा सति द्विरिति प्रधान
मन्त्रगणसन्निधानात्यायास्मात्येकमुपधानं सिध्यति. नैतद्युक्तं। एकेनोपधानविधिनाऽस्य प्रयोज
नस्य लाभेन स्तृष्टीरुपदधाति प्राणभृत उपदधाति वज्रिणीरुपदधाति वज्रिणीरुपदधा
तीति वाक्येषु सर्वत्रोपधानवैयर्थ्यापत्तेः। न चैवमेकत्रोपधानविधिरन्यत्र केवलं तद्वचनं कथं
वक्तुं विनिगमनाविरहात्. नापि सर्वेषु तेषु तद्वदिष्टकाविशेषविधिरिष्टकाभिरग्निं चिनुत इ
ति विधिनैव सर्वासामिष्टकानां प्राप्तत्वात्. ननु तथापि मध्यमचिति लाभार्थं विशिष्टका ३९

४ नै

31

सांविद्धिधानं स्याल्लक्षणादितेषु विधिषु स्वस्थ्यादिशब्दोदितानांमंचितिप्रकरणाम्नातानामिष्टका-
नां मध्यमचितावुपधानं लभ्यते मध्यमायां तु वचनाद्ब्राह्मणवत्य इति पंचमाध्यायसूत्रेणयां
३म वैकाचन ब्राह्मणवतीमिष्टकां विजानीयात्तां मध्यमायां चितावुपदध्यात् द्विवचनबलेन प्रस- ति
स्तुतानवाच्यमिश्रां पूर्वजानाति वशात्सर्वस्य स्वब्राह्मणविहितानामिष्टकानां मध्यमचिता-
वेवोपधानं । न च तं ने नु बादरायण इति न्यायान्वितं तत्र इति निर्णीतत्वादिति चेन्न नैतदपि युक्तं
कासामिष्टकानां स्तष्टिमंत्रादिभिरुपधानमिति प्रागनवगततया स्वस्थ्यादिशब्दोक्तानां
स्तुतिशब्दादिवन्मंत्रोपधेयेष्टकाविशेषाणामवुध्यमानोद्देशेन विधातुमशक्यत्वात् । तस्मात्
तन्मंत्रविशेषाणामेवेष्टकोपधाने विधौ यंतद्वितीयुक्तं तेषां च विधिर्नोपधाने प्राप्त्यर्थः प्रकर-
णादेव प्राप्तिसंभवात् । नापि लिंगविनियोज्यमंत्रानंतरपरिसंख्यार्थः मंत्रांतराम्नातवै-
यर्थ्यापत्तेः ॥ किं तेकयास्तुवत प्रजा अधीयंत प्रजापतिरधिपतिरासीत्तिसृभिरस्तुव-
त ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीदित्यादीनामुपधाने कांतिकलिंगविशेषप्र

© Dharmartha Trust J&K. Digitized by eGangotri

हितानां मंत्राणामिष्टकाग्रहणादिष्वपि विनियोगप्रसक्तौ तत्परिसंख्यार्थः प्रत्येकोपधान
नियमार्थश्च समुदितोपधानेन तन्नादिष्टकोपधानक्रमोत्सर्गापवादखिलतत्तन्मंत्रकरणक
त्वयोगात् मध्यमवृत्तिप्राप्त्यर्थश्च मंत्रश्रुतिरेकेण स्वकालविशेषां तदगनिरूपणेन मंत्र
विनेष्टकानियमपि धेरावश्यकतया प्राप्तैकांवनेतिविधेरपीष्टकाविशेषणमंत्रविध्य
32 वलंबनत्वात्. एवं तावदपूर्वविध्यादिलक्षणानामाश्रयभेदेन संकरो दर्शितः। तथैव तत्फ
लानामपि प्रथमचरमभावे न संकरो दृश्यते. किंतु क्रतुषु विकिंचित्फलमनन्यलभ्यं तेष्वनुनिष्पादि
तैलादन्येषु ननु निष्पादितेष्वनन्यलभ्यत्वादपरेषु अननुनिष्पादितेष्वनुष्ठानविशेषा[illegible]मा क्रा ५
वफलत्वेनैवपदिश्यते तत्त्वानुनिष्पादिसंकरो यथा: अथातोग्निमग्निष्टोमेनानुयजंतीति वि
धितः प्रकृतसर्वग्निष्टोमेग्निप्राप्तिस्तत्वनुनिष्पादिनी तस्मिन्नन्यत्राश्रितगुणकर्मानां प्राप्तिः
यद्यप्यग्नेः सौमिकांगकलापसंवलितप्रयोगस्य सोमप्रयोगाद्वारैः संपादयितुमशा
क्यत्वेन तत्प्रयोगमध्यपतितत्वावश्यंभावान्निष्फलस्याग्नेः फलवत्सोमांगत्वमनुष्ठानसा ३२

न ३ नैन्यलभ्यत्वेष्व ४

© Dharmartha Trust J&K. Digitized by eGangotri

म

देशयत्वेन श्रुत्यैरवानप्रमाणे नासिध्यति तथापि तेनानारभ्याधीतस्य प्राकरणिकत्वेन सर्वे घवरु
कृतप्रकृतिव्यावृत्तस्य विकृत्यंगत्वमेव सिध्यति अतः प्रकृतावप्राप्तस्याग्नेः प्रथमश्लोकव्या
ख्यानदर्शितरीत्या ऽनेनैव वाक्येन प्राप्तिस्तत्राप्याग्नेयत्वादाश्विनानांश्चेनाकृतसादिफलार्थगु
णानां प्रकृतिमध्येनुष्ठानप्राप्तिस्तत्रैव बहिरनुष्ठातुमशक्यत्वात्॰ आग्रयणे द्यावापृथिव्य
एककपाल इति विधित एककपालयागस्य प्राप्तिस्तदनुनिष्पादी प्रसूनबर्हिर्नियमः। प्रस
नं पुष्पितं लूनं शेन्मूलास्सुनरुसन्नंवा॰ एककपालविध्यभावेप्याग्रयणे प्रसूनेन प्रसूनं वा
बर्हिर्नियतमैन्द्राग्नादियागानुसारेण प्राप्नोति॰ ऐन्द्राग्नादिषु प्रसूननियमाश्रवणात्॰
एककपालविधिसत्वेनस्य वैश्वदेविकैककपालप्रकृतिकत्वान्नलोतिदेशेन प्रसूननियमः
प्राप्नोति॰ यद्यप्येककपालो जघन्यत्वेनैकत्वेन चैन्द्राग्नाद्यपेक्षया दुर्बलस्तथापि प्रसू
नबर्हिर्ग्रहणेप्यनियतबर्हिषामैन्द्राग्नादीनां विरोधाभावात्कांस्यभोजिन्यायेनैककपालो

पा४ पु३

© Dharmartha Trust J&K. Digitized by eGangotri

स्य

तु वर्त्तनमुपपद्यते तथैव । यत्र शिष्यैः कांस्यभोजननियमोऽस्ति गुरोर्नास्ति तत्र तयोरेकपात्रभोज
ने कश्चित्प्रसक्तो गुणभूतमपि शिष्यमनुसरन् गुरुणापि हि कांस्यभोजनमेव क्रियते । अतिरा
यथा ३ ये तु बर्हिः प्रतिसमानपर्त्तिंशु क्रमोपक्रमनमिति बर्हिः प्रयाजोपक्रमे तु होत्रप्रयाजा औपभृ
ताज्यसमानयनमाह्निः । तदनु निष्पादितो ज्योहु वाज्यमादिप्रयाजं चयार्थं मौपभृताज्यमु
परितनप्रयाजद्वयार्थमिति परिसंख्या । यत्तु कौंगरतान्ति प्रयाजेभ्यस्तद्ध्रुपभृति गृह्णाति
33 प्रयाजानुयाजेभ्यस्तदिति विधिभ्यामिति तयोरविशेषेण सर्वप्रयाजार्थत्वं प्राप्तं तन्नश्चैवमय
मप्रयाजोपक्रम एव प्रयाजार्थस्यौपभृताज्यस्य जुहूमानयनमपि प्राप्तं तस्यतस्मात्कालात्प्राक्
एव बर्हिः प्रयाजोपक्रमकाले विधानाद्द्वयमपि प्रयाजविशेषविषयं तत्र पाव्यवतिष्ठते । एवं पात्रप्राप्त
परिसंख्याने नत्रैव दोषत्रयमन्यासुनिष्पादितेन सद्भूयात्पारा विषयत्वात् । कल्पिकर्माद्दक्षिणाद
दात्मनी धेद्दहतित्व्राह्मणेत्यादीत्यादिविध्यधीनकृत्विगानयनार्थं दक्षिणादाननियमानुनि
ष्पादितो ऋत्विजां कर्मस्वकर्तृत्वप्राप्तिः स्वर्गकामो यजेतेति समानाधिकरण्यादात्मनेपदेन कर्तु ३३

दा ५

© Dharmartha Trust J&K. Digitized by eGangotri

दक्षिणादानैर्नियमेन प्राप्यते २

रेवफलावगमान्न फलार्थिनो यजमानस्यैव साङ्गे ज्योतिष्टोमादिकर्मणि स्वातन्त्र्यात्कर्तृत्वे प्राप्तेन त
त्राप्यार्त्विज्यं कृत्विजां कर्तृत्वं दक्षिणादानविधिर्हि कृत्विग्गानमनरूपं दृष्टार्थं त्वेवं सम्भवति नादृष्टार्थः
कल्पयितुं युक्तमिति दक्षिणादानेनैव कृत्विज आनमयितव्यास्तेषु सामान्यरूपायामरेणेति नियम
विधिः संपद्यते· ततश्चैतेषां दक्षिणया परिक्रीतानां क्वचिद्विनियोगापेक्षायां वस्त्रकसामर्थ्य
रूपाल्लिंगाद्ध्वविस्यागदक्षिणादानादेर्दव्योत्सर्गादन्यत्र कर्मणि कर्तृत्वेन विनियोगः। तत्रप्र
योजकत्वेन प्रधानवाक्यावगतं यजमानस्य कर्तृत्वमिति संपद्यते।। राजन्यवशिष्ठादीनां
नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषामिति विध्यधीन नाराशंसादिनियमानुनिष्पा
दीनु कल्प्यकल्प्यानामेव सत्रेऽधिकार इति नियमः। नाराशंसतनूनपान्मे त्रयो द्वितीयप्रया
जस्थानपठितयोर्व्यवस्थितविकल्प आम्नेपुरुषभेदेन तन्न ह्य वस्थापो राजन्यवशिष्ठादीना
मिति विधिस्तावन्नियमविधिः। ततश्च सर्वेऽपि नाराशंसकल्पा इतिवा सर्वेऽपि तनूनपात्कल्पा
इति तुल्यकल्पा एव सत्रेऽधिकुर्युर्न भिन्नकल्पा अपीति नियमो लभ्यते· भिन्नकल्पानां सत्रे

© Dharmartha Trust J&K. Digitized by eGangotri

संभूपवत्नौ तदन्तर्गतप्रयाजेष्वन्यतरकल्पस्यैवाभ्युपगमे यनयाकेषांचित्क्रतुवैगुण्यप्रसंगात्। यजु
र्वागहृतागानिप्रयाजेभ्यः स्तादिति विध्यधीनप्रयाजनियमानुनिष्पादिनीत्येतत्समुच्चयपक्षे कार्यांत
रपरिसंख्या। अत्राद्रियथाद्रव्यापेक्षाणां प्रयाजानां पाक्षिकानेकद्रव्यप्राप्तौ जौहवाज्येनैव प्रया
जाः कर्तव्या इत्येकपायनियमोऽस्ति। तथा कार्याकांक्षस्य जौहवस्य पाक्षिकानेककार्यप्राप्तौ जौ
34 हवाज्येन प्रयाजा एव कर्तव्या इति कार्यनियमोऽप्यस्ति। प्रसक्षक्क स्यात् जौहवाज्यस्य प्रयाजा
नां च परस्पराकांक्षत्वे प्रयाजानां द्रव्याकांक्षा याज्जौहवाज्यस्य कार्याकांक्षया [illegible] लि
गात्प्रयाजानामनियतद्रव्यकल्पनस्येव जौहवाज्यस्यानियतकार्यकल्पकस्याप्यप्रवृत्तेस्ते
नैव कार्यनियमेनापरिसंख्यापि लभ्यते। प्रयाजानुयाजाज्यभागेषु पांक्तयाल पार्वणहोम
नारि[illegible]ष्ठहोमानां द्रव्याकांक्षाणामुपस्तरणाभिघारणकपालांजनसदनकरणालंकरणा
नां चाज्याकांक्षाणां कार्याकांक्षेषु जौहवाज्यादिषु त्रिषु वसवर्तमानानां मध्ये प्रयाजेषु जौहवा २४
ज्यप्राप्तिवत्क अन्येषामपि केषांचित्तैः समुच्चित्यप्राप्तेरवश्यंभावात्। नन्वेवं सति कार्यपरि

© Dharmartha Trust J&K. Digitized by eGangotri

संखे वस्यात् । उक्तो समुच्चयः कार्यविशेषनियतो न भवति नहि जौहवाज्येऽन्येषां कार्याणां समुच्चिता
नां प्राप्तिः । औपभृताज्येऽप्येवमिति कार्यविशेषनियतसमुच्चये किंचिन्नियामकमस्ति । अतोन्या
न्येव कार्याणि निचितानि यानि जौहवाज्ये समुच्चितस्य प्राप्नुवंति तान्येव नतोन्येषां केषांचित्कार्याणां तत्र
समुच्चितस्य प्राप्तेरप्राप्नुवंतीति कस्यापि कार्यस्य प्रयाजाज्ये नियतप्राप्त्यभावात्तत्र प्रयाजानामप्रा
प्तांशपूरणं तावदवश्यं कर्तव्यं तस्मिंश्च कृते नैराकांक्ष्येण लैंगिककल्पनाप्रतिबंधाद्भवतीयं प्रकृते प्रया
जैः सह समुच्चितस्य प्राप्तिमतामन्येषां कार्याणां नियुक्तिनैरपेक्ष्ये कल्पनादिनिवृत्तिवदनुनिष्पादिनी
त्ववहितेन मनसालोचनीयं । आतिथ्यायां चतुर्गृहीतान्याज्यानि भवंतीति विध्यर्थो नात्र प्रकृति
प्राप्तोपभृतश्चतुर्गृहीतानां तत्परिसंख्यानादनुनिष्पादिनी प्रवृत्तौ नो बर्हिः प्रयाजोपक्रमे प्रयाजा
र्थमौपभृताज्यादर्धं समासे नेतव्यमित्यस्यार्थस्य प्राप्तिस्तस्य विधेरभावे बर्हिः सदुपभृति प्रयाजा
नुयाजेभ्यस्तादिति विधिवशाद्दौपभृताज्यं सर्वमपि प्रयाजानुयाजसाधारणं स्यादिति समस्या
द्भक्ष्यति तावदिति न्यायेनौपभृतेऽस्मिन्ननुयाजत्र याश्रमिकर्दिधिकमवशेषणीयमिति प्रयाजद्वयार्थ

© Dharmartha Trust J&K. Digitized by eGangotri

मध्यान्न्यूनमेव समानेतव्यं शानुपात: । नन्वपभृत्स्वचतुर्गृहीतमेकं हविर्न भवति । किंतु चतुर्गृहीतं १ हवि १ र्द्वयं
होतीति विधिना चतुर्ग्रहणसंस्कृतस्यांगतावगमादिति निर्णीतं चतुर्थे । तथाच [illegible] पुरूप
भृतीति विधि: प्रयाजार्थमेकं चतुर्गृहीतमनुयाजार्थमपरमिति तस्मिन्नर्थे पर्यवसिते तत: स १ चतुर्गृहीतं
35 मानयनाविधिनार्द्धमेव समानेतव्यमिति प्राप्नुयादिति चेन्न भैवं । तथाच्युपस्थापकविध्यं
तराभावेप्युपभृती त्यविशेषविधाने चतुर्गृहीतद्वयस्यापि प्रयाजार्थत्वप्राप्तेरनिवार्यत्वात् ।
नन्वेकस्मिन्यागे हविर्द्वयं नान्वेतीति शक्यं वक्तुं । वचनबलादेकैकस्य चतुर्गृहीतस्य हवि
५ल्वे र्भानेकस्य प्रयाजार्थत्वे द्वितीयस्यानूयाजार्थत्वे चतुर्गृहीतद्वयरूपस्य हविर्द्वयस्यैकैकयागा
र्थत्वस्याप्युपपन्ने: । पशुयागे एकस्मिन् हृदयजिह्वाद्येकादशहविरन्वयदर्शनाच्च । नच
गृहीतान्याज्यानि भवंतीति अनुयाजस्य हि तावतामातिथ्यायां विधे: सत्वेन तु न चतुर्गृहीतानि
तत्संख्याबलादुपभृति प्रयाजार्थमेकं चतुर्गृहीतमनुयाजार्थमपरमिति व्यवस्थाव
गत्यार्द्धमेव समानेतव्यमिति सिध्यति । ननु चतुर्गृहीतवचनमातिथ्यायां प्रयाजार्थमेव । ३५

© Dharmartha Trust J&K. Digitized by eGangotri

चोदकाच्चतुर्गृहीतहृय प्राप्तोनत्वैकमेव चतुर्गृहीतं हविरिति प्रयाजार्थे हविषि वै कृतविशेष
वचनतयाप्युपपन्नं नोक्तं व्यवस्थां गमयेदिति चेन्नु सः समुभ यथाप्युपपन्नस्मतस्य च तत्रा
नुयाजा इत्येत इति वाक्यशेष वशाद्व्यवस्थाभविष्यति। अनेन हि वाक्यशेषेणोपपत्तिर्हि द्विती
यचतुर्गृहीताभावेऽनूयाजानामभावो हेतूकृतः। ततश्च तत्र हेतोः साध्यभूतायामातिथ्यायां
मुपपत्तिर्हि द्वितीयचतुर्गृहीतस्य परिसंख्यामुपनयन्विधिस्तस्य केवलानुयाजार्थत्वं व्य
वस्थापयति अतस्तादनुनिष्पादिन्य ईदृसमानयनप्राप्तिर्भवत्येव। त्रीणि ह वै यज्ञस्योदरा
णि गायत्री बृहत्यनुष्टुप्। अत्र ह्येवावपंत्यत एवोद्वपंतीति परिसंख्यानुनिष्पादी निय
मः। कथं। संति विरुद्धस्तोमकाः। कनवर्षविंशेनातिरात्रेण प्रजाकामं याजयेदित्यादिभि
र्विहितास्तेषु क्रतुषु बहिष्पवमानगद्धिषु सर्वेषु पि स्तोत्रेषु एकविंशादिस्तोमविपरिद्धि सिध्य
र्थं प्राकृतेभ्योऽधिकावापे प्राप्ते अत्र ह्येवावपंतीति तु द्वाहतवाक्येन पवमानगायत्र्यादिभ्यो

© Dharmartha Trust J&K. Digitized by eGangotri

न्यत्रापैः वोपरि संख्यायते। तेनावापस्य पवमानातिरिक्तेभ्यस्तोत्रेभ्यो निवर्तितत्वात् तदतिरिक्तेष्वा त १
ज्यपृष्ठादिस्तोत्रेष्वगत्याभ्यासेनैव संख्यापूरणं कार्यमिति सिध्यति। अनयावापसामान्यस्तो
36 त्रान्तरेभ्यः परिसंख्यायापेषु विवृद्धस्तोमकेषु क्रतुषु प्रसक्ष्यश्रुतिविहितान्यपि कानिचित्सा
मान्निसेंति तेषामपि स्तोमविवृद्धये सर्वस्तोत्रेषु सामान्तरावापकर्तव्यप्रत्यक्षश्रुतिविहितानां
साम्नामनियमेन यत्र क्वचित्स्तोत्रे प्राप्तावावापः पवमानविषयो व्यवतिष्ठते। तथा विवृद्धस्तो
मकेषु क्रतुषु प्रत्यक्षश्रुतिविहितानां साम्नां स्तोमाधिक्यपरिहारार्थं कृतसामोद्वापेन तत्स्था य
वि५ नेष्वावपनानामनियमेन यत्र क्वचित्स्तोत्रे प्राप्तावापस्तद्विषयो व्यवतिष्ठते तद्वदेवमत्र परिसंख्या
नुनिष्पादीनियमः। हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस इत्यादि विंशु परिसंख्यानुनि
ष्पादितापरिसंख्या। तथाहि पशुनायजेतेति श्रुतं पशोर्यागसाधनत्वं विशसनादिवाक्यबला स
दवयवद्वारेणेति तावद्व्यवतिष्ठते। यथा सोमेन यजेतेति श्रुतं सोमस्य यागसाधनत्वमभिषवादि
वाक्यबलादंशुद्वारेणेति व्यवतिष्ठते। ततश्च पश्ववयवानां सर्वेषामविशेषाद्विधानेन वदानप्राप्तौ ३६

धि ४

© Dharmartha Trust J&K. Digitized by eGangotri

अवयवांतरालां २

हृदयादिभ्योऽन्येषामवयवानामवदानपरिसंख्यापूर्णीनिहृदयस्याग्रेऽवद्यतीत्येवमादीनि। तयाग
वावदानपरिसंख्यायोर्हविष्परिसंख्यापि लभ्यते। एवं युक्तं भवतीति सामान्यविधिना चतुर्ग्र
हीतद्वयस्यापि प्राप्तौ विशेषेण प्रयाजानुयाजार्थत्वप्राप्त्यावाप्तिश्च प्राप्ताभ्युपगतिश्चतुर्गृहीतानां पर
रिसंख्यया ऽर्थवादसमर्पितानुयाजाभावे तु सम्भिन्नाहुत्या लभ्याप्रथमं चतुर्गृहीतं प्रया
जार्थं द्वितीयमनुयाजार्थमिति व्यवस्था परिसंख्यानुनिष्पादिनी परिसंख्येव। तत्र न त्वनुनिष्पा
दितीसमानेऽलभ्यस्यार्द्धत्वप्राप्तिर्व्यस्तीति सैव प्रागुदाहृता। एवमनुनिष्पादिफलत्वेऽ
सैवाद्यनुनिष्पादिफलान्तरमन्यत्राप्यूहनीयं। एवमनुनिष्पादिफलसंकरो दर्शितः। अन्यल
भ्यफलसंकरो यथा। सांग्रहिण्यां रात्रिसत्रन्यायलभ्यफलप्राप्तिर्मूला। तत्सन्निधिसमाम्ना
तानामनहोमानां तदंगत्वप्रसक्तिः। अन्यथा तेषामपि रात्रिसत्रन्यायेनैवार्थवादिकफलकल्प
नया नैराकांक्ष्येण तदंगत्वं न सिध्येत्। उरु प्रथस्वेति पुरोडाशं प्रथयतीत्यत्रालभ्यप्रथनप्रा

© Dharmartha Trust J&K. Digitized by eGangotri

त्रिमूल -स्तस्याध्वर्युकर्तृकत्वनियमः अप्रथितं हि पिष्टं स्वयमेव न पुरोडाशाकृतिशालितया प्रथते,
अतः पुरोडाशान्यथानुपपत्तिलभ्यमेव प्रथनं तत्राध्वर्युकर्तृत्वनियमः परं न लभ्यते। तस्मादाध्व
र्यवसमाख्यालंभनेन प्रथनेकर्तृनियमसिध्यर्थोऽयं प्रथनविधिः। वायवाएकाम्यस्यैन्द्रवायवो पदे
न्द्रवायवाग्राग्रहाग्रहणं तेवावमेवानुप्रयंतीस्यत्रान्यलभ्यप्राप्तिपूर्विका परिसंख्या। अत्र ग्रहाणा
मैन्द्रवायवाग्रतान विधीयते। सा हि विधीयमाना धाराग्रहाणामेव। विधीयेत तत्र धाराग्रहस्यैरूपा
६ त णां तर्यामियोरपि। ॐ एवाधारयात् अनपलभ्यस्य प्राप्तिरित्यग्ररूः गृह्णातीत्युपेतत्वसंनिधौ अत्रैव वे
न धाराग्रहाणामेवात्र गृह्णातिनोपादानात्। तेषां च पाठ एव प्राप्तेन्द्रवायवाग्रता। किं तत्र त ५
पाठमात्रायुत्तानु वाद्वैन्द्रवायवाद्योग्रह एव विधीयते। तेष्वैन्द्रवायवं गृह्णातिमैत्रावरु
भि णं गृह्णातीत्यादिक्रमेण पठितैः प्रातिस्विकविधिर्लभ्यास्तथापि तेषामिह पुनर्विधानं परि
संख्यार्थं। कथमेतत्संनिधौ श्रुको आग्नावारुणिलप्रतिष्ठाकामः मंथ्यग्राननभिचरेताभिसाद्दिवा
कं येग्रहानाग्निग्रस्पृक्काग्रतान् हयोत्तुरगाः कामायविधीयंते। तेषां ग्रहाणां धाराग्रहवद्धारा २७

गुणानां

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रहावप्याश्रयत्वेन प्रानुवृत्तिनत्कामनायां शुक्रादय उपांश्वंतर्यामाभ्यामग्रांश्रिपि प्रागपकृ
ष्टव्याः स्युः। अस्मिन्विधाने सति तु कामाय विधीयमानग्रहगुणानामनेन विधिना प्रकृतानैन्द्रवायवा
दिग्रहानेवाश्रित्य विधीयेरन्निति तेषामेवाश्रयत्वम्। शुक्रादयः कामनायामैन्द्रवायवादेव
प्रागपकृष्टव्या इति लभ्यते। तदेतत्सर्वं हृदि निधायैन्द्रवायवस्याग्रत्वं वचनादिति प्रतिकर्षः स्या
दित्येतत्कारणं निरूपितं। ननु नेतदुदाहरणं युक्तम् अग्रहणांककलार्थत्वस्यान्यत्र प्राप्त्यसंभवा
त्। न चैवं द्वायवस्य मैत्रावरुणादिग्रहविधीनां ज्योतिष्टोमप्रकरणाम्नातत्वात् प्रकरणेनैव तेषां
तदंगत्वप्राप्तिः। ऐन्द्रवायवाद्याग्रग्रहेयादयः कामयेत यथापूर्वं ग्रहाः कल्प्येरन्निति वाक्येन
प्रकरणं बाधित्वा तेषां पुरुषार्थत्वस्यैव प्रापणात्। न च शुक्राग्रयादि वा केवलं वायव्यतां एव फले या
विधानमिति शंक्यं। शुक्राग्रतादीनां पाठतोः प्राप्तत्वादनुवादासंभवेन विधेयत्वेपि च पा
ठप्राप्तैन्द्रवायवाग्रतानुवादेन धात्वर्थभूतानां ग्रहणानामेव फले विधानात्। क्रत्वर्थविधान

© Dharmartha Trust J&K. Digitized by eGangotri

संभवे वाक्यार्थविधानांगीकारस्यायुक्तत्वात्. कामसंयोगे तु वचनौदितः प्राप्तिकर्त्वः स्यादिति
दाशमिकाधिकरणे तथैव निर्णीतत्वाच्च। तथा चैतद्विधभावे प्रागुत्थितिकविधिभिरुत्पन्ना
नामैन्द्रवायवादिग्रहाणां प्राकरणिके क्रत्वर्थत्वं बाधित्वा कामसंयोगाद्वाक्येन पुरुषार्थत्वमे
3.96 वमापद्येदित्यप्राप्ते क्रत्वर्थत्वप्रापणार्थोयं वाग्वा एषेत्यादिविधिस्तथा च वाक्यद्वयबला
दैन्द्रवायवादीनां रवादिग्रहवदुभयार्थता भवति. एवं चानेन विधिग्रहाणां बाधकबाधकेन ना
क्रत्वर्थत्वे प्राप्यमाणे कामसंयुक्तवचनोपक्रमे समाम्नानबलात् तदाश्रयान्तरपरिसंख्या
प्यनुनिष्पद्यत इत्यनुनिष्पादिसंस्कार एवैतदुदाहरणं युक्तं न त्वन्यलक्ष्यसंकरे। तत्रापि वा
क्योदाहरणं धाराग्रहाधिकरणादेवाश्रयान्तरपरिसंख्यालाभादिति चेत्. एवं तर्हि मा भूत्तदि
होदाहरणं। कपालेषु श्रपयतीत्येतदुदाहरिष्याम[illegible]: अवनतावत्कपालं विधियेदाग्नेयो
ष्टाकपाल इत्याद्यन्यत्र विहित एव तत्साध्यः। अष्टसु कपालेषु संस्कृतो ह्यष्टाकपाल इ ९५

© Dharmartha Trust J&K. Digitized by eGangotri

त्वार्थः। उक्तं तद्धितार्थविवक्षायां कपालशब्दस्य समासेन तद्धितार्थोऽत्र पदस्य मा भूदेवेति
समासे कृतेऽष्टाकपाल इति प्रातिपदिकात् संस्कृतमित्यर्थे विहितस्याणः अप्रसक्तस्य द्विगोर्लुगनप
त्य इति लुक्स्मरणात्। नापि श्रपणविधिस्तस्य पुरोडाशं कूर्मं भूत्वा प्रसर्पन्तमित्यादिवा
क्यशेषेण कपालेषु संस्कार्यस्य पुरोडाशत्वावगमात् अपूपविशेषरूपस्य पुरोडाशस्य श्रप
णं विना निष्पत्त्यसंभवात् स्वरूपेण श्रपणस्यार्थसिद्धत्वात्। नापि श्रपणं कृतं गतत्वाप्यस्यार्थो स
विधिः प्रयोजनाभावात्। न च पुरोडाशविकारेषु चरुकरंभादिषु श्रपणस्यातिदेशेन प्राप्तिः
प्रयोजनं। तेषामपि श्रपणं विना निष्पत्त्यसंभवेनार्थतस्तल्लाभसंभवात्। ननु श्रपणस्य
प्रयोगमध्ये तु स्थानलाभार्थो विधिः स्यात्। विधाने हि सति प्रकरणग्रहीतस्यांगत्वस्य स
न्नस्य प्रयोगमध्येऽनुष्ठानं लभ्यते। अन्यथा त्वाज्यवत् पुरोडाशस्यापि बहिः श्रपणसिद्ध
एव गृह्येत। न च कपालेष्वधिश्रपणसंस्कारविधानात् ततः श्रपणसिद्धिः। बहिः श्रपणासि

© Dharmartha Trust J&K. Digitized by eGangotri

द्रव्यस्यैव पुरोडाशस्याज्यस्य गार्हपत्याहवनीययोरिव कपालेष्वधिश्रयणस्यादृष्टार्थत्वोपपत्तेः।
न चांगाशम्भूहननादिविधिभिस्तत्सिद्धिः तेषामप्यदृष्टार्थत्वोपपत्तेः। नन्वस्ति व्रीहीन्निर्वप
ति व्रीहीन्प्रोक्षति व्रीहीनवहन्तीति व्रीहीणां निर्वापादिसंस्कारविधानात्तेषां प्रयोगमध्ये
39 पुरोडाशप्रकृतित्वोपादानं लभ्यत इति तत एव तन्मध्ये श्रपणस्याप्यनुष्ठानं लभ्यत इति
चेत् न तेषां व्रीहिसाधनकनिर्वापाद्यर्थकर्मविधायकत्वेनाप्युपपन्नत्वात्। अन्यथास्ति
द्धिप्रकृत्युपादानलंभकविध्यभावे पुरोडाशस्याप्याज्यदार्शपौर्णमासिकजाघन्यादिव
त्स्वरसतो यथासिद्धस्यैव हविष्ट्वेन यागसंबन्धप्राप्तेः। अतएव पशुसोमाधिकरणे द्रवा
यवं गृह्णातीत्यादयो यागविधयस्तेषु गृह्णातिकर्मभूतं हविरेवाधारयागं गृह्णातीति सं
न्निहितवाक्यस्थं तं धारासमर्पयद्रव्यं न च सोमं क्रीणातिसोममभिषुणोतिसोमं पाव 35
यतीत्यादिसोमसंस्कारवाक्यपर्यालोचनया सोमप्रकृतिकमवयगीयते अनेन सोमेन यजेतेत्यत्र

© Dharmartha Trust J&K. Digitized by eGangotri

सोमशब्दस्तत्प्रख्यन्यायेन तेषां यागानां नामधेयं। यजेतेति तत्समुदायानुवाद इति पूर्वपक्षे उक्ताधा
रयागद्रव्यातिरिक्तदध्यादिस्याधारणस्य यथासिद्ध इव द्रव्यमात्रस्य हविष्ट्वप्राप्तेरन्यथासिद्धप्रकृत्यु
पादानलंभकविध्यभावेन क्रयादिवाक्यान्यपूर्वकर्मविधायकान्येव स्युर्न तु संस्कारकर्मविधाय
कतया हविष्ट्वं सोमस्य सत्त्वाप्रापकाणि। अतस्तत्प्रख्यन्यायोऽत्र नावतरतीति दूषणमुक्तं। तथापि
व्रीहिभिर्यजेतेति विधिना प्रकृत्युपादानं लभ्यत इति तत एव प्रयोगांतःश्रपणं सिध्येदिति चेन्न।
तस्य यागद्रव्यविधायकतया पुरोडाशप्रकृतिद्रव्यविधायित्वाभावात्। तस्मात्कपालेषु श्रपयती
ति विधिः श्रपणस्यांतःप्रयोगकर्तव्यतासिध्यर्थः स्यादिति चेत्। मैवं। यागोद्देशेन द्रव्यविधायक
स्यापि व्रीहिभिर्यजेतिवाक्यस्य पुरोडाशावरुद्धे यागे साक्षात्कारणत्वासंभवेन तत्प्रकृतित्वविष
यत्वपर्यवसायितया निर्वापप्रोक्षणादिविधीनामपि तद्विषयत्वालाभेन तत एव श्रपणस्य प्र
योगमध्यकर्तव्यतासिद्धेः। नन्वेवं सति तस्य श्रपणस्य कपालाधिकरणसिध्यर्थो विधिः स्यात्।
न स्यात्। इतरीत्या श्रपणस्य प्रयोगमध्यकर्तव्यतासिद्धावुत्पत्तिवाक्यावगतस्य कपालेषु संस्का

© Dharmartha Trust J&K. Digitized by eGangotri

रस्य श्रपणस्य रूपत्वासिद्धेः । दृष्टासंभवे हि तस्याद्दृष्टार्थाधिश्रपणमात्ररूपताप्राप्नुयात्॰ ननु तथापि श्र
पणस्य समग्रत्वावलम्ब्याध्वर्युकर्तृकत्वे नियमार्थस्तु द्विधिः स्यादिति चेत्॰ न॰ अविदहन्तः श्रपय
तेति प्रैषबलादध्वर्योः प्रैषिकहविः श्रपणेषु प्रयोजककर्तृत्वेन प्रैषेषु च पराधिकारादितरन्यायेन तु
40 श्रपयितुरध्वर्योरन्यस्यैव पुरोडाशश्रपणेषु पि साक्षात्कर्तृत्वात्॰ प्रयोजककर्तृत्वस्य च मन्त्रवर्णाद्
बलाभावात्॰ तस्मादन्यलभ्यश्रपणपुनर्विधानेन प्रकृतरूपादानमाक्षिप्याक्षिप्तोपादानापेक्षित
प्रकृतिद्रव्यनियममात्रपरत्वं व्रीहिशास्त्रस्यापाद्यत इति चारावित्रैष्टिगततण्डुलद्रव्यकयागस्य प्रकृ
त्युपादाने व्रीहिनियमव्यावर्तनार्थोयं विधिः । असति ह्यस्मिन्विधौ व्रीहिशास्त्रमेव जात्यवस्थाविशेष
विशिष्टप्रकृतिद्रव्योपादानपर्यवसायिमिति तण्डुलयागादृष्टलोपेन श्रपणनिरर्थकत्वापि व्रीहिशास्त्रस्य श्र
पणमुखप्रवृत्तिकत्वाभावेन चोदकाद्दङ्गं गतेः सहव्रीहिरूपप्रकृतिद्रव्योपादानमपि प्राप्नुयात्।
सति त्वस्मिन्विधौ विहितस्य श्रपणस्य प्रयोगमध्ये नुष्ठेयतया तत्प्रकृतरूपादानेन तदर्थ वाऽर्थ
तः सिद्धे व्रीहिशास्त्रं प्रकृतिद्रव्ये जात्यवस्थाविशेषनियममात्रार्थं भवति॰ प्रयोगमध्ये श्रपणा ४०

© Dharmartha Trust J&K. Digitized by eGangotri

ध्रंप्रकृतिद्रव्याण्यपादद्दीतेनियमन्तु व्रीहिजातीयानिस्तुषावस्थानीति। तथा च व्रीहिशास्त्रस्य प्रकृत
पादानप्रमाणस्य श्रपणविधापेक्षत्वे सत्येव व्यवस्थासिद्ध्युति। वैकृतेपत्न्नहविर्षिश्रपणमपेक्षितं तत्र
तस्य प्रयोगमध्येऽनुष्ठानं यत्र तत्र प्रकृतकपादानं तत्रैव च व्रीहिनियमः। एवं वसति तंदुलयागा
दर्थलोपेन श्रपणानिवृत्तौ तन्मूलक व्रीहिनियमपर्यवंनियन्त्रितेषु वा तदाकूः। तंदुलेभ्योऽर्थलोपेन
श्रपणं विनिवर्तते। श्रपणस्य निवृत्तस्य स्वयं कर्तकतार्थं तदधीनमुपादानं प्रकृतेः स्यात्कथ
तरगम्। न च श्यग व्रीहिनियमस्तदभावे कथं तमामिति। नन्वस्त्वेवं कपालेषु श्रपयतीति विधिरेवाप्
हरणं। अत्र यदुक्तं नष्टाक्षिप्तप्रकृतकपादानापेक्षित व्रीहिप्रशस्त्रमिति तदयुक्तं। व्रीहिनियमस्यानिर्व
पादिसंस्कारविधिभिरेवलाभसंभवात्। प्रकृतकपादानलंभकविध्यभावे हि प्रकृतिद्रव्यानपेक्षणेना
नपेक्षितसंस्कारायोगान्निर्वापादीन्यर्थकर्माणि स्युरिति ततः प्रकृतिद्रव्यनियमो नास्ति ध्रुवति·
कपालेषु श्रपयतीति विधिनाक्षिप्तस्य प्रकृतकपादेयस्य प्रकृति द्रव्यविशेषाकांक्षायां निर्व

© Dharmartha Trust J&K. Digitized by eGangotri

पादिसंस्कार्यत्वेनश्रुतानां व्रीहीणां क्वचिद्विनियोगाकांक्षायां कथं व्रीहीणामेवापेक्षितप्रकृतिद्
व्यत्वेनान्वयान्नन्नियमो न सिध्येत् तत्संस्कार्यद्रव्यापेक्षस्याहि कस्यचिदभावे यत्संस्कृत्य तु होतीति
वद्वितीयगद्यवगलगुणकर्मत्व परित्यागे नार्थकर्मत्वांगीकारः प्राप्नुयात् तत्सत्वे तु नार्थकर्मत्वप्रा
प्तिः। अत एवोपनयनसंस्कृतस्य माणवकस्य विनियोगाकांक्षायामुपनयनप्रक्रमाधीनस्याध्य
यनस्य कर्त्रपेक्षासत्वान्न कर्तृत्वेनान्वयः। उपनयनस्य नार्थकर्मत्वप्राप्तिः। उक्तं च पञ्चमाधि
करणे। स्वाध्यायविधिरनिर्दिष्टकर्तृत्वेन कर्तारमपेक्षमाणः प्रकृतोपनयनसंस्कृतान् किम
र्थं वियमाचार्यकरणंनीवाड्क्षेवैप्रयोजनमपेक्षमाणान्ब्राह्मणादीनेव कर्तृत्वेन स्वीकुर्वन् तेषा
मेवाध्ययनं विधत्ते न शूद्रस्येति। अपि च प्रपणविधापेक्षितः प्रकृतमुपादानेसत्यनियतप्रकृतिद्रव्यो
पादानप्राप्तौ तास्मिन्व्रीहीन्प्रतिमितिविषये व्रीहीणामेवसुमनस्यमान इति पुरोडाशप्रतिष्ठापनमंत्रवर्णादे
वद्धागोवामंत्रवर्णादिन्न्यायेन व्रीहिजातीयं प्रकृतिद्रव्यमित्ययमर्थो लभ्यते। किं तु लाघवात्तस्यापि पुरो ४१

© Dharmartha Trust J&K. Digitized by eGangotri

वस्तारयणमुपादानं प्राप्नोति इति सतुषावस्थोपादानं परं न स्यान्नु यत्तदपि प्रागुक्तरीत्याग्निवापादिसंस्कार
के मर्थक्यापेक्षया लभ्यत इति न काचिदनुपपत्तिः। ननु यवैर्यजेतेत्यागृहस्य विहितैर्यवैः प्रकृतिद्रव्याकां
क्षा शमंते मंत्रप्रकाश्यसंस्कार्यत्वान्यथानुपपत्त्या व्रीहीणां प्रकृतिद्रव्यत्वं न सिध्येदतस्तत्सिध्यर्थं व्री
हिशास्त्रमपेक्षितमिति चेन्मैवं। न खलु यवानामपि सत्त्वात्प्रकृतित्वं कृतं किंतु प्रकृतपुरोडाशा
वरुद्धयागकरणत्वान्यथानुपपत्त्या कल्पनीयं। व्रीहीणां तु मंत्रप्रकाश्यसंस्कार्यत्वान्यथानुपपत्त्या
इति को विशेषस्तस्मादनर्थकं व्रीहिशास्त्रमिति चेन्न। उच्यते। व्रीहिशास्त्राभावे व्रीहिगतापूर्वीयत्वरूपा
प्रतिपत्तिः संस्कारवाक्यगतेषु व्रीहिपदेषु अपूर्वीयत्वलक्षणानेन लभ्येतेति संस्काराणां स्ववस्तुधारे
एवं न स्यात्। सति व्रीहिशास्त्रे तेन व्रीहीणां यागापूर्वीयत्वावगतेस्तल्लक्षणासंभवात्संस्काराणां य
वस्वाधारत्वं सिध्यतीत्येवं च यद्यपि व्रीहिशास्त्रं व्रीहिनियमार्थं न स्यात्तस्यान्यलभ्यत्वात्तथाप्य
न्यलभ्यानियमद्वारा यवेषु प्रोक्षणादिप्राप्त्यर्थमवहननादिनियमार्थं वा स्यादित्यवंतरमर्शनीयम्। यथो
रन्यलभ्यानियममूलकप्रोक्षणान्यलभ्यनियममूलकनियमयोरिदमुदाहरणं भविष्यतीति। ननु नैव

© Dharmartha Trust J&K. Digitized by eGangotri

दपियुक्तं। व्रीहिशास्त्रप्रवृत्त्यधीनव्रीहिपदगतापूर्वीयत्वलक्षणाभावेपियवसाधारण्यलाभसंभवात्॥ द्वि
तीयमङ्कस्य प्रोक्षणावहननादिसाध्यत्वेनाङ्कितानां व्रीहीणां प्रागसिद्धेन स्वरूपेण तत्साध्यत्वासंभ
वान्न तत्क्रियाजन्यदृष्टादृष्टसंस्कारविशिष्टतया तत्साध्यत्वसंभवेपि तावता फलपर्यवसानाभावा
42 दनर्थक्यापत्तेः फलपर्यवसायिमोक्षरूपं त्वस्य च प्रोक्षणादिसाध्यतार्हस्य व्रीहिष्वनुपस्थितेः प्रोक्ष
णादिष्वप्येवस्य तन्त्र फलकल्पनागौरवापत्तेः श्रुतविनियोगभंगापत्तेश्च प्रोक्षणादिसाध्यत्वनि
र्वाहार्थमेव संस्कृतानां व्रीहीणां श्रपणाविध्याक्षिप्तप्रकृत्यपादानापेक्षितप्रकृतिद्रव्यतयाऽन्वयः
कल्प्यते। तन्निर्वाहः कथं स्यादित्यादि कल्प्यमानपुरोडाशप्रकृतिभावलभ्यापूर्वसाधनताकारे
ण व्रीहीणां प्रोक्षणादिसाध्यत्वसिद्ध्यनानुपपत्त्यर्थं तं न कल्प्यत इत्यत्र कल्पने च प्रोक्षणादीनां यवसा
धारण्यं तत एव लभ्यते नान्यथास्य विशेषो व्रीहिशास्त्रप्रवृत्तो लक्षितापूर्वसाधनत्वेन यवसाधारण्यं
तदप्रवृत्तौ कल्पितापूर्वसाधनत्वेनोभयथापि यवसाधारण्यं लभ्यत एवेति चेत् न लभ्यत इति ब्रूमः॥ व्री
हिवाक्यसद्भावे संस्कारवाक्यैकवाक्यतानिर्वाहाय व्रीहिपदानां व्रीहिशास्त्रसमपि ४२

नद्युद्गाहरणेमितिसुक्तमेव · अपि वास्ति व्रीहिशास्त्रस्यादृष्टपि १

अतो व्रीहिशास्त्रमन्यलभ्यनियमद्वारा यवेषु प्रोक्षणादिप्राप्त्यर्थमवहननादिनियमार्थं च पर्यवस्यति
इति समनंतरं प्रदर्शनीययोर्द्वयोरपि प्रयोजनं । अश्वशफपरिमाणो यशोषकार्यैर्भ्यश्चापर्याप्तानां पु
रोडाशजातिमात्रसंपादनसमर्थानामल्पानां व्रीहीणां लाभेन सर्वपर्याप्तानपि व्रीहिप्रतिनिधीन्नीवारा
43 नपहाय मुख्यानां व्रीहीणामुपादानं तदभावे हि पुरोडाशस्य पणे व्रीहिसंस्कारविधिसामर्थ्यात्पुरोडा
शमकृतित्वेन कल्प्यमाना व्रीहयः पुरोडाशांगत्वमेव प्रतिपद्येरन्न यागांगत्वं । तथाश्वशफपरि
माणास्विसकृदि उाप्रशित्रनुतुर्धाकरणभक्षणादि नां व्रीहीणां च पुरोडाशांगत्वविशेषेण नाव
त्यर्याप्तव्रीहिलाभे बहूनां तेषामंगानां बाधाद्वारमेकस्य व्रीहिरूपांगस्य बाध इति नीवारोपाद
नं प्रसज्येत · व्रीहिशास्त्रस्य सद्भावेन तेन व्रीहीणां यागांगत्वे बोधिते पुरोडाशावरुद्धे यागे हविष्ट्वेन
साक्षाद्यागसाधनत्वमलभमानानां तेषामरुणाधिकरणन्यायेन तत्र पणेविधाक्षिप्तप्रकृ
त्युपादानापेक्षितप्रकृतिद्रव्यतया पार्ष्णिकान्वयकल्पनेपि यागांगत्वमेवावतिष्ठते । ननु तदपहा ४२

© Dharmartha Trust J&K. Digitized by eGangotri

यपुरोडाशंगतं। श्रकृतयागांगत्वनिर्वाहायैवपार्ष्णिकान्वयकल्पनात्॥ अतएवारुणास्यपा
र्ष्णिकान्वयकल्पनेपिक्रयएवांगत्वंननुद्रव्यद्वारेतिप्रतिपादितमरुणाधिकरणे॥ ननश्चैव
हुभ्योगांगभूतेभ्योश्वशफपरिमाणशेषकार्येभ्योव्रीहीणांप्रधानांगत्वांगगुणविरोधा
धिकरणन्यायेनभाष्यकारोक्तगुणमुख्यव्यतिक्रमाधिकरणन्यायेनप्राबल्यात्तद्बाधन
मनुचितमित्यल्पानामपिव्रीहीणामुपादानंप्रतिनिधिपादस्थाधिकरणोक्तंलभ्यते॥ एवंचव्रीहि
शेषस्यमुख्यत्वेनशिष्टपुरोडाशेनक्रियाकांक्षेयागेप्राप्तिरहितानांव्रीहीणांप्राप्तिंकुर्वन्तिविहितायान्य
लभ्यपुरोडाशप्रकृतिद्रव्यनियमावतरेणापियागांगत्वापरित्यागाद्व्रीहीणांपुरोडाशपरिमाणशेष
कार्यपर्याप्तावप्युपादानंप्रापयतीतिप्राप्तमनुनिष्पादितांप्राप्तावप्येतदुदाहरणंभविष्यतीत्यलंप्र
सक्तानुप्रसक्त्या॥ प्रकृतमनुसरामः॥ उपांशुपौर्णमास्यांयजन्नित्यत्रश्रौतयाकालविधिसामर्थ्य
लभ्यपौर्णमासीकालनियमपूर्विकाऽमावास्यापरिसंख्या॥ नचात्रपौर्णमासीकालविधिनो

© Dharmartha Trust J&K. Digitized by eGangotri

पांशुयाजस्य फलसंबंधप्राप्तिवदमावास्यापरिसंख्यापि लभ्यत इति समर्थितं चतुर्थश्लोक
व्याख्याने। हे आहवनीये इत्यत्रान्यलभ्यपरिसंख्यामूलापराग्निकहोमानां फलसंबंधप्राप्तिः।
इयमपि तत्रैव समर्थिता। एकादश पशोरवदानानि तानि द्विर्द्विरवद्यतीत्यत्रान्यलभ्यपरिसंख्या
मूलो नियमः। दर्शपौर्णमासयोर्द्विर्हविषो वद्यतीति तावत्परिसंख्या। तदभावे हि चतुरवत्तं जुहो
तीति विधिबलाद्धोमस्य हविष एव चतुरवदानं प्राप्नुयात्। तत्सद्भावे तु हविषो द्विरेवावदानमितके
पस्तरणाद्यवदानविधिप्राप्तमेव शिष्टसंख्यानुवादश्चतुःशब्दः सिध्यति। इदं च द्व्यवदानं पा
शुकेषु हृदयादिष्वपि चोदकतः प्राप्नोत्येव तथाप्येतानि द्विर्द्विरवद्यतीति श्रवणान्नियमप्रसक्तो
नियमार्थं। पशुप्रकरणे हि यद्यपि चतुरवत्ती स्यै यजमानः पंचावत्तैव वपा कार्येत्यपि श्रूयते। त
त्र पाशुकावदानमात्रमुद्दिश्य। ननु वपावदानमेव हविरसाधिकरणन्यायेनोद्दिश्य वपाविशेष
स्याविवक्षितत्वात्। तत्तस्य सर्वेष्वपि पाशुकावदानेषु हविरवदानत्वितेनोपस्तरणाद्याः भिघा ४४

रणाद्ध्यावापयामिवर्हिरण्यशकलेनवापंचसंख्यासंपादनीयेति प्राप्तेतस्यावहानस्या
नियमः प्राप्तस्तत्रनियमः किंपतेरुविंषियुथाप्रकृतिच्छिद्रेवावदेयानि। पंचसंख्यातु प्रकारां
तरेणसंपादनीयेति। अग्निहोत्रंजुहुयात्स्वर्गकाम इत्यत्रान्यलभ्यपरिसंख्यापूर्विकापरिसं
ख्या। इदंहिनाग्निहोत्रस्यस्वर्गार्थत्वप्राप्त्यर्थमेतदभावेपितत्सर्वार्थमनादेशादितिविश्वजिद
धिकरणपूर्वपक्षन्यायेनानिर्दिष्टफलस्याग्निहोत्रस्यविनियोगेनाविरोहेणसर्वफलार्थत्वे
प्राप्यतास्वर्गार्थत्वस्यापिप्राप्तिसंभवात्। नापिस्वर्गेतरफलपरिसंख्यार्थं। तस्यापिसः
स्वर्गःस्यात्सर्वान्प्रत्यविशिष्टत्वादितिसिद्धांतन्यायलभ्यत्वात्। अतोऽग्निहोत्रस्यान्यलभ्यस्व
र्गसंबंधबोधनद्वारेणतत्संनिधिसमाम्नातानामनिर्दिष्टफलानांकर्मणांफलवदफलन्याये
नतदंगत्वप्राप्त्यर्थमेतदभावेत्वग्निहोत्रस्यविश्वजिन्न्यायेनफलकल्पनेविनियोगेनाविरोहात्ते
षामपितेनैवन्यायेनफलकल्पनास्यादितितेषामग्निहोत्रांगत्वंनप्राप्नुयात्। एवंचानेनविधि

© Dharmartha Trust J&K. Digitized by eGangotri

नाऽग्निहोत्रस्यानन्यलभ्यस्वर्गार्थत्वप्राप्तिर्नांतरीयकतया विश्वजिदधिकरणपूर्वपक्षन्यायप्रसक्त
फलांतरस्य परिसंख्या· नन्विसिद्धांतन्यायलभ्या प्राप्यते। अग्निहोत्रसंनिधिसमाम्नातकर्मण्यन
न्यलभ्यतदंगत्वप्राप्तिर्नांतरीयकतया तेषामपि स्वर्गफलार्थत्वस्य तत्सिद्धांतन्यायप्रसक्तस्य प
रिसंख्याऽनन्यलभ्यावप्राप्यत इत्येवमत्रानन्यलभ्यपरिसंख्यापूर्विका उ नन्यलभ्या परिसंख्या। यद्य
ग्निहोत्रस्य यावज्जीववाक्येन प्रसक्तपापपरिहारार्थत्वाप्राप्तस्य तत्। तत्संनिधिसमाम्नातकर्मणां
च फलाकांक्षायां तेषां विश्वजिदधिकरणपूर्वपक्षसिद्धांतन्याययोरुभयोरपि तत्र तेषु चानवकाशा
दिदं वाक्यमग्निहोत्रस्य स्वर्गसंबंधप्राप्त्यर्थमेव· न त्वन्येषां तदंगत्वप्राप्त्यर्थं नापि तद्द्वारादि
न्यत्रानन्यलभ्यातेषां स्वर्गार्थत्वपरिसंख्यास्तीति मतं तदा केवलकाम्यकर्मणो यत्स्वर्गसंबंधविधा
नं तद्धि जिन्यायलभ्यस्वर्गसंबंधमतिक्रम्य तत्संनिधिपठितकर्मणां तदंगत्वप्राप्तिपूर्वकत्वसार्थमिति तत्रा
न्यलभ्यपरिसंख्याफलसंकर उदाहर्तव्यः। एवमनन्यलभ्यफलसंकरदर्शिनः। अप्रवृत्तिविशेषकरफ ४५

© Dharmartha Trust J&K. Digitized by eGangotri

लसंकरोपदिकमात्रेणोद्दाक्रियते। द्वादशाहिकयोस्तन्मनाकांतर्गतयोर्गवामयनिकयोस्तत्रनैका
स्तान्तर्गतयोश्चाहिमात्रताविध्योरस्य वृत्तिविशेषकरप्राप्तिपूर्विका प्राप्तिः। नैविधिः परमापूर्वसा
धनतावच्छेदेनावांतरपूर्वसाधनतावच्छेदेनवाग्रतानां प्राप्तिरनन्यलभ्याक्रियते। नतयाप्रवृत्ति
विशेषः कश्चिद्द्वादशाहगवामयनयोरनन्यलभ्यः प्राप्यते। नैः प्रापणीयस्य द्वादशाहिकद्वा
रात्रांतर्गतयोराद्ययोरकारैंद्रवायवस्थुकाग्रतानुष्ठानस्य चोदकाद्गवामयनिकयोराद्ययोर
न्हो रैंद्रवायवाग्रतानुष्ठानस्य श्रनीकाविधानाद्वा लाभसंभवात्। किंतु तयातयाप्राप्त्यानतद्वि
कारेषु प्रवृत्तिविशेषपर्यवसायिनी प्राप्तिः क्रियते। एतच्च प्रथमश्लोकव्याख्याने स्पष्टमुक्तं। साम्नास्क
वीतेस्तत्राप्रवृत्तिविशेषकरप्राप्तिपूर्वको नियमः। कथमक्षरास्तुढगीतिक्रियारूपस्य साम्नः के
वलमक्षराभिव्यक्त्यर्थत्वमेव प्राप्तं ननु कृक्साध्यगुणिनिष्ठगुणाभिव्यंजकत्व स्तवस्यार्थ लभ्यपि तद्
ननेव विधिना प्राप्यते। तत्प्रापणेन च तत्र कश्चिदनुष्ठानविशेषो न लभ्यते। गीतिक्रियाः स्तुतेः
साक्षान्निर्वर्तयितुमशक्यत्वात्ततः कमप्रकरणाम्नातस्तोत्रांगत्वेनावगतानामक्षराणि। व्यक्तिं कुर्व

© Dharmartha Trust J&K. Digitized by eGangotri

स्सामत्वद्वारा स्तकलिं निर्वर्त्तयितुं शक्नमिति शक्नतस्त्र समर्थत्वनिर्वाहकानुमानविशेषलाभाय पार्ष्णिकान्व
यन्यायेन स्तकस्यार्थस्तु स्तुभवतु गतिकुगभिव्यक्त्यर्थत्वे तु साम्नः प्रसक्तावगतमिति नन्वाग्नेयस्याप्यनंवि
धिना कार्यमपि तु कृत्स्नं वा न भिव्यक्तो सामवत्वात् तुः स्तर्या त्रुपायां नराएयविसंतीति पक्षे प्राप्तस्युसा
म्नो नियमः कार्यः। अतोग्राम वृत्तिविशेषकरस्तकत्वलप्राप्तिपूर्वकः स्तकसमर्थकृग्गक्षराभिव्यक्तेयुक्त
46 यत्वेन साम नियमः। यदि रथंतरस्साम सोमः स्यादैन्द्रवायवाग्रान् गृह्णाति इत्यादि स तत्रापि वृ
त्तिविशेषकरप्राप्तिपूर्विका परिसंख्या। इदं हि नतावद्रथंतरसाम्नि ज्योतिष्टोमे ऐन्द्रवायवाग्रत
स्य प्राप्त्यर्थं पाठक्रमादेव तत्र तत्प्राप्तेः सिद्धत्वात्। नापि बृहत्साम्नि ज्योतिष्टोमे न प्राभूदित्येवम
र्थं। यदि बृहत्साम शुक्राग्रानिति बृहत्सामत्वपक्षे शुक्राग्रत्वविधानादेव तत्तो व्यावृत्तिसिद्धेः। किंतु
नैमित्तिकत्वार्थं तस्येदं पुनर्विधानं पाठादैन्द्रवायवाग्रत्वमनैमित्तिकं प्राप्नोति। तदेव रथंतरसाम
त्वनिमित्तकं क्रियते। एवं प्राकृतो पाठप्राप्तस्यैन्द्रवायवाग्रत्वस्यानेन विधिनानैमित्तिकीकरणा
देव द्वादशाहे अनीकायामाघस्या कर्मोदकप्राप्यनैमित्तिकमैन्द्रवायवाग्रत्वं नास्तीति तन्त्रनाद्धि ४६

© Dharmartha Trust J&K. Digitized by eGangotri

धानं विकृतस्यापेक्षितं विधत्ते तेन कृतेन नव नैमित्तिकीकरणेन ज्योतिष्टोमेन कश्चित्तु मानविशे
षो लभ्यते किं तु तस्मिन् पाठप्राप्तस्यैन्द्रवायवाग्रत्वस्य विशेषेण सर्वास्विकृतिषु चोदकात्प्राप्तो
ग्रह इत्यर्थः तत्रान्यसाम्भ्युस्तदुभयसामर्थ्यस्य विकृतिष्वपि निमित्तग्रहत्वेन तद्धात्वानिलभ्यत इत्येव
मत्राप्रवृत्तिविशेषकरनैमित्तिकत्वमप्राप्तिपूर्विकैन्द्रवायवाग्रत्वस्य निमित्तग्रहत्वं न विकृति
ष्वपः परिसंख्या। अप्रवृत्तिविशेषकरनियमपूर्विकाः प्राप्तिनियमपरिसंख्या यथा यस्य कृष्णवे
दृ यजुर्वेदयोः श्रूयमाणस्य सोमविकारस्यान्यत्राग्नभूयताभावेन भूयस्ते नोभयश्रुती स्फुट
विनिगमनाविरहादुभयत्रापि विधिः स्वीकर्त्तव्यः। तत्रोञ्छे कश्चाक्षि यत्तेतु पांसु येति विहित
योर्वेदस्वरयोर्विकल्पेन प्राप्ते तस्मिन् न पक्षे किंचित्स्यादीन मग्नीषोमीयाच्चे नो पौर्वरं नीति मन्त्र श्रु ३
भागस्वरविधिर्नियमविधिरापद्यते। स चकर्मणि साक्षात्स्वरस्यानुष्ठातुमशक्यत्वात् पार्ष्णिका
न्वयेनोपांशुत्वस्य कर्माङ्गत्वेन निर्वाहितुं तदङ्गमन्वेषयतीति। केन च केवलमृग्वेदसाम्नोर्देवा

© Dharmartha Trust J&K. Digitized by eGangotri

47

विहितास्तन्मंत्रास्तेषूच्चैस्त्वस्यैव प्राप्तत्वेनाप्राप्तस्योपांशुत्वस्य प्राप्तिर्भवति· यजुर्मंत्रा यजुर्वेदेपि
विहितास्तेषूच्चैस्त्वे नियतप्राप्तस्योपांशुत्वस्य नियमो भवति तेनैवोपांशुत्वनियमविधिना दीक्षणी
यादिषु वेदकप्राप्तानामैष्टिकानां मध्ये मंद्रमध्यमोत्तमस्वराणां परिसंख्यापि लभ्यते इत्येवमप्र
वृत्तिविशेषकरनियमपरिसंख्यानां तिसृणामपि विकृतिविशेषप्राप्तयज्ञभागस्वरविधिरेवोदा
हरणं· इदं वस्तुर्वमनुपदमेव स्फुटीकरिष्यते· अप्रवृत्तिविशेषकरपरिसंख्यापूर्विका प्राप्तिनि
यमपरिसंख्या यथा· दीक्षाः सोमस्य दक्षिणाः सोमस्येति कर्तृसंस्काररूपाया दीक्षायाः कर्तृ
द्वाराप्रयोगांगत्वाद्दक्षिणायाः साक्षात्प्रयोगांगत्वाच्च प्रयोगांगत्वे प्रधाने सोमयागे तदंग
कलापे च ज्योतिष्टोमप्रकरणे विहितस्य दीक्षादक्षिणस्य विशेषेण प्राप्तेर्वचनद्वयमिदमंगक
लापस्यतद्व्यपितत्वावचनार्थमित्येवं यत्रापि परिसंख्यानिर्विवादा· सा च तज्ज्योतिष्टोमेप्र
वृत्तिविशेषकरी। दीक्षादक्षिणस्यांगप्रधानार्थत्वे केवलप्रधानार्थत्वे च कत्वंगभूतयमानि ४७

© Dharmartha Trust J&K. Digitized by eGangotri

न १

यमसंकल्परूपपरीक्षणानुष्ठाने अग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाण इति तदर्थं विहितदी
क्षणीयानुष्ठाने दंडेन दीक्षयतीत्यादिवचनविहितं तदंगभूतमौंजकं दंडधारणाद्यनुष्ठाने द्वाद
शशतदक्षिणादाने च विशेषाभावात्. ननु दक्षिणांगप्रधानार्थत्वेऽंगप्रधानकर्तृभ्यो देया केव
लप्रधानार्थत्वे प्रधानकर्तृभ्य एवेति विशेषो वक्तुं शक्यते। यतः केवलप्रधानार्थत्वेऽंगकर्तृभ्य
ऋत्विग्भ्य एव देया न तु प्रधानकर्त्रे यजमानाय। तस्य स्वत एव फललाभाय प्रधानानुष्ठाने प्रवृ
त्तस्य दक्षिणादाने नग्नानमयि लब्धत्वात्. यजमानेनात्मनिस्संकल्प्यमानस्य दक्षिणाद्रव्यस्य स्व
त्वत्यागासंभवाच्च. किंतु सोमांगविकारेषु काम्यपश्वादिष्वतिदेशेन दैक्षपश्वादेः प्राप्तौ दीक्षा
दक्षिणां तेभ्यो व्यावर्तयंती तेष्वेवानुष्ठानविशेषोपयोगिनी। अतोऽत्रा प्रवृत्तिविशेषकरी सोमां
गेषु दीक्षादक्षिणापरिसंख्यामुखीकृत्य प्रवृत्ता सोमांगविकारेषु तत्परिसंख्या. नन्वत्र सोमां
गविकारेषु दक्षिणापरिसंख्योक्तिरनुपपन्ना। सोमांगस्याग्नीषोमीयपशोर्विकारेष्वनुक्तद

© Dharmartha Trust J&K. Digitized by eGangotri

क्षिणेषु काम्यनैमित्तिकादिपशुषु ऋत्विगानमनायदक्षिणापेक्षायांस्त्वप्रवृत्ताववंगभूतदक्षिणा
यां वा स्वत्वात्तत्र प्रसंगादुपकारकत्वं प्रतिपन्ना याः सोमांगदक्षिणायाश्च वयात्यत्वात्तु ॥ मैवं
तथा सति दक्षिणाः सोमस्य स्वस्यात्यंत वैयर्थ्यप्रसंगात् ॥ साक्षात्क्रतावदृष्टमपेक्षितं मूल
प्रकृतितो ग्राह्यमिति क्रतो कस्मादिषु दृष्टफलेन न तद्दृष्टितो न्वाहार्यदक्षिणाग्रहणोपपत्तेश्च ॥
एवं चानुक्तदक्षिणकाम्यादिपशुभ्यः सोमिकदक्षिणापरिसंख्या [illegible] कृतान्वाहार्यनियमः प्रा
प्यते ॥ तत्र स्वदृष्टादृष्टोपकारार्थं तद्दीयं [illegible] अजातमपि प्राप्यत इत्य प्रवृत्तिविशेषकरपरिसंख्या
मूलप्राप्तिनियमयोरेतदेवोदाहरणं ॥ ननु विधौ नाम प्रवृत्तिविशेषकरे फलेन पर्यवसानमिति तन्तो
न्यत्फलं यदि मृग्यं तदोपांशुपौर्णमास्यामजानिसाद्युदाहरणेऽपि उपांशुयाजादीनां स्वर्गस्य बंधादिना
प्राधान्यप्राप्तिः फलं न स्यात् ॥ तेषां प्राधान्ये परांगत्वानुष्ठाने विशेषाभावादिति चेन्न ॥ मैवं ॥ प्राधान्ये
सति तत्तद्रूपचारे प्रधानविस्मरणादि प्रायश्चित्तप्राप्तिर्विकृतिषु चातिदेशनिवृत्तिरित्यादिफलान्तरपर्य ४८

© Dharmartha Trust J&K. Digitized by eGangotri

वसानस्यवक्तुंशक्यत्वात्· एवमाश्रयभेदेनविधिनियमपरिसंख्यालक्षणानामाश्रयभेदेप्रथमचरम
भावाभ्यांतत्फलानांचसंकरोदर्शितः। विनैवत्वाश्रयभेदंतत्रैवोद्देश्येतस्यैवविधेयस्याप्राप्तिपक्षप्रा
प्तिभ्यामपूर्वविधिनियमविधिलक्षणासांकर्यमपिज्योतिष्टोमगतेयज्ञभागस्वरविधौदृश्यते· तथा
हि· यद्यपिज्योतिष्टोमस्ययजुर्वेदविहितत्वोपाधिनोपांशुस्वरत्वमुपांशुयजुषेतिवेदस्वरविधिनैवसि
द्धं· तथाप्याग्नीषोमीयायाग्नीनेषुयजुर्वेदविहितत्वोपाधिमनपेक्ष्यस्वरूपेणोपांशुत्वस्याप्राप्त्यर्थोपांशुय
ज्ञभागस्वरविधिस्तत्रऋग्वेदेनसामवेदेनवाविहितंज्योतिष्टोमविकारंप्राप्नुवत्स्वपितेष्वयंविधिः
प्रवर्त्तते· ननुयाजुर्वैदिकस्वरविधिरिवनप्रवर्त्तते· यजुर्वेदविहितत्वोपाध्यनपेक्षत्वात्· तेषुचप्रवर्त्त
मानोयमपूर्वविधिःसंपद्यते· ऋग्वेदसामवेदविहितकर्माङ्गभावमापन्नेषुतत्तद्वेदविहितत्वोपा
धिकोच्चैस्त्वस्यप्राप्त्याकथंचिदप्युपांशुत्वप्राप्त्यभावात्· यजुर्वेदेनवेदान्तरेणविहितंज्योतिष्टो
मविकारंप्राप्नुवत्सुतेषुप्रवर्त्तमानोयंविधिर्नियमविधिःसंपद्यते· तेषुयजुर्वेदविहितत्वोपाधि

© Dharmartha Trust J&K. Digitized by eGangotri

कस्योपांशुत्वस्यापि पक्षेप्राप्तिसत्वात्. न देवमस्मिन्यत्नेभागस्वरविधौ विकृति विशेषं प्राप्तेस्सं
नरोऽयैवाश्रयभेदमपूर्वं नियमविधिसंकरोऽजायते. यद्यप्ययं विधिरग्नीषोमीयात्प्राचीनेष्वपि
49 प्रवर्ग्यतदंगेषु न प्रवर्त्तते. उच्चैः प्रवर्ग्येण चरंतीति तेषामुच्चैस्त्वविधानात् दीक्षणीयादिप्रधाने
ष्वपि न प्रवर्त्तते यावत्यावाचा कामयीत तावत्या दीक्षणीयामनुब्रूयात् मंद्रं प्रायणीयायां मंद्रत
रमातिथ्यायामुपांशूपसत्स्विति तेषामपि स्वरांतरविधानात्. तथापि प्रवर्ग्यतदंगेभ्यो दीक्षणी
यादिप्रधानेभ्यश्च व्यतिरिक्तेष्वग्नीषोमीयात्प्राचीनेष्वंगेषु प्रवर्त्तत एव। ननु प्रवर्ग्यांगवद्दीक्ष ५०
णीयादीनामंगानि किमिति न पर्युदस्तानि। उच्यते। प्रवर्ग्येणेति तृतीयासंयोगात्प्रवर्ग्यकरणिकायां
भावनायामुच्चैस्त्वविधिस्तदंगतानि त्वंगानीत्यतश्चैस्त्वस्यांगप्रधानगर्भता. यथापूर्वक्ष्येन चरंतीत्यु
वंभृथकरणिकायां भावनायां विधीयमानानामपां. न तथेह तृतीयासंयोगोऽस्ति. अतो यथा यज्ञार्थे वै
णवे काम्यात् दृष्टयस्तासु पांशु कर्तव्याउत्य त्र्यक्रतमुपांशुत्वं काम्यशब्दोक्तानां प्रधानानां विधीयमानं ते

यामेव भवति· एवं दीक्षणीयादीनां विधीयमानः स्वरोपि दीक्षणीयादिशब्दोक्तानां प्रधानानामेव भवति·
ऋग्यांस्तु विशेषः। वैशेषिके स्वरे प्रधानमात्रविषये सति काम्येष्ट्यंगेषु दर्शपूर्णमासयोः प्राकृस्वि
ष्टकृतः मध्यमस्थानेन मध्यमेनेडायाः शेषं तूतीयस्थानेन विहितं स्वरवैचित्र्यं बोदकात्प्राप्नोति· दी
क्षणीयाद्यंगेषु तु तदपि बाधित्वा वैशेषिको यज्ञभागस्वरविधिः प्राप्नोतीति। एवं तु प्रवर्ग्यमित्यंग
दीक्षणीयादि प्रधानव्यतिरिक्ते प्रवर्तमानोपि याज्ञायाने ष्यंगेषु प्रवर्तमानो यज्ञभागस्वरविधिः
प्रकृतिविकृतिरूपयाजुर्वैदिकक्रतुगतेषु याजुर्वैदिकत्वोपाधिना प्राप्तमप्युपांशुत्वं स्वरूपेणाप्राप
यन्नपूर्वविधिर्भवति· ऋग्वेदसामवेदविहितक्रतुगतेषु तेषु कथमप्यप्राप्तं तत्प्रापयन्नपूर्वविधिर्भ
वति· यजुर्वेदतद्विनरवेदविहितक्रतुगतेषु पक्षप्राप्तं नियच्छन्नियमविधिर्भवतीति वक्तव्य एवात्रापू
र्वनियमविधिसंकरः। स्यादेतद्दीक्षणीयादीनामंगेषु चोदकानीते नैष्टिकस्वरेण तदुपजीविप्रयो
गवचनात्प्रयस्य वेदस्वरस्यापवादे प्राप्ते तत्प्रतिप्रसवार्थो यज्ञभागस्वरविधिर्न तु याजुर्वैदिकत्वा

© Dharmartha Trust J&K. Digitized by eGangotri

नपेक्षोपांशुत्वविधानार्थः॥ अस्तंनाप्राप्तविधानाल्लाघवप्रतिप्रसवविधानस्य लघुत्वात्: अतएव
कृष्णलेष्ववपणविधिः प्राकृतस्यावपणस्य चोदकाव्याप्तस्य प्रयोजनाभावान्निवर्त्तमानस्य प्रतिप्रस
वार्थोनित्वत्वंताप्राप्तस्यावपणविधानार्थोविधिर्गोदवापत्नीहितिप्राकृतस्यावपणधर्माणांतत्राप्राप्तिरु
50 क्तात्वंत्वरत्वे। नन्वेवंसतियज्ञभागस्वरुविधिरैष्टिककर्ममात्रविषयः स्यात्तत्रैवापदप्राप्तेरग्नी
षोमीयप्राचीनसमस्ताङ्गविषयोनस्यादितिचेत्। माभूद्विधिलाघवानुसारेणतन्मात्रविषयोस्तु·
अंगीकृतंहि निगदाधिकरणेनियमविधिलाघवानुसारात्रूपांशुयजुषेतिवाक्यंनिगदातिरिक्त
यजुर्विषयमिति· अंगीकृतंच पत्नीसंयाजाधिकरणेपत्नीसंयाजांतान्यहानिसंतिष्ठंतइतिद्वा
दशाहिकंवाक्यंनियमविधिलाघवानुसारात्प्रागुक्तमाद्यहः पत्नीसंयाजांतत्वविधायकमिति·
तस्माद्यज्ञभागस्वरुविधिरैष्टिककर्मव्यतिरिक्तेषुप्राप्त्यभावात्तेषुप्रवर्त्तमानेतस्मिन्विधिर्नियु
मलक्षणसांकर्यमित्यक्रमयुक्तमितिचेत्: उच्यते· मार्किंचिदितियद्यदितिशब्दद्वयं हुश्रायत्रोसि ५०

© Dharmartha Trust J&K. Digitized by eGangotri

द्धः। वीप्साव्याप्तसाकल्येन संबंधमिच्छा। तथा च यत्किंचिदिसन्नीषोमीयप्रागभाववर्त्तिनः साकल्यस्या
प्यंगस्योपांशुत्वसंबंधेनाभासये विधीयमाने कथं विधिर्न यतयासंकोचः क्रियते। यद्यप्युच्चैः प्रवर्ग्येण
चरंतीत्यादिनिरवकाशविध्यंतरबलात्संकोचोस्ति तथापि लाघवमात्रानुसारतस्न युक्तः। नहि लाघ
वमस्तीतिश्रुतं हातुं शक्यं। ननु यत्किंचिच्छब्दो वीप्सार्थ इवाज्ञातेपि प्रागभावीमप्रत्ययवत्प्रसिद्धः।
अस्ति वा त्र प्रागभाववर्त्तिनामंगानां विशिष्याज्ञातत्वं। प्राचीनमितिशब्देन प्रागभागस्यैव तद्वर्त्ति
नामंगानामनिर्दिष्टत्वात् तथा च यत्किंचिदित्यस्याज्ञातार्थकत्वोपपत्तेर्न वीप्सानिश्चय इति चेन्न
मैवं। किमिदमित्यादिप्रश्नोत्तरे यत्किंचिदित्यत्राज्ञातत्वबोधने नादरणीयत्ववदत्राज्ञातत्वबोध
नेप्रयोजनाभावेन प्रवृत्तिविशेषकरस्य साकल्यार्थत्वस्यैव ग्राह्यत्वात्। यत्किंचिद्दादीनां साकल्या
र्थकत्व एव यत्किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा। भाष्यांतं कर्म वास्तस्य यत्किंचेह करोति यमि
त्यादौ तत्पदेन प्रतिनिर्देशस्य दर्शनाच्च। विशेष्याज्ञातविशेषणानादरणादिमात्रपरत्वे यत्किंचिदि

© Dharmartha Trust J&K. Digitized by eGangotri

यत्किंचिद्विद्यानयेस्यादेतदप्रयोगात्. अतः प्रवर्ग्यतदंगदीक्षणीयादिव्यतिरिक्तसकलप्रागभाववत्सुंगि
साधारणयाजुर्वैदिकतानपेक्षोपांशुत्वविधिरेवात्रस्तीकर्तव्यः। नचस्त्वेतदेवं तथाप्यस्य विधेः
प्रकृतसन्नयप्रयुक्तमपूर्वविधित्वमेव भवति ननु विकृतिविशेषान्वयप्रयुक्तं नियमविधित्वमपि
प्रकृतिप्रकरणाम्नातस्यास्य प्रकृतिविकृतिभ्यो योविकृतिसाधारणत्वाभवानादिति चेन्न. सत्य
मुपदेशस्तथैवगतिदेशस्तूपकारमुखेनांगवदंगशस्त्राणामपिविकृतिप्राप्तौ विकृतिविधौ सैव
प्रलिप्यमानस्यास्य विधेर्नियमविधित्वमापतत्केवलार्थते. यो हि सौर्यादिषु विकृतिविधिविनिकर्त
व्यताकांक्षयाप्रकृतवच्छन्दः कल्प्याइत्युच्यते. सएवातिदेशाद्वैकृतवाक्यशेषतामापन्नः प्राकृ
तांगशास्त्रसमूहः सएव च लाघवार्थं प्रकृतिवदितिसंग्रहेण निर्दिश्यते. तस्यस्वरूपतः कृप्तत्वे
पितत्तद्दृष्टादृष्टोपकारवाचिपदयोगस्य वैकृतविधिवाक्यशेषतायाश्च कल्प्यत्वेन कल्प्यत्वव्य
पदेशः। अतएवोक्तं तन्त्ररत्ने. सम्मिधोयजतीति व्रीहीनवहन्तीतिप्रकृतावयमर्थः सन्निदुपकृतोव ५९

घातावितुषीकृतव्रीहिसंपादितपुरोडाशसाधनकश्च यागः कार्य इति · न तच्च सौर्येपि तद्वत्कर्तव्य
मित्युक्ते समित्युपक्लृप्तावघातावितुषीकृतव्रीहिसंपादितचरुसाधनकश्च सौर्यः कार्य इत्युक्तं भ
वति · ततश्च समिदादिशास्त्रं सौर्यशास्त्रस्य वाक्यशेषः संपद्यते · अनेनाभिप्रायेण भाष्यका
रेण पौरोडाशिकं ब्राह्मणं सौर्यादीनां वाक्यशेष इत्युक्तं अध्याहाराद्व्यवहितकल्पना ज्यायसी
चेति यद्येवमपि प्रकृतिवद्भूतं प्राकृतांगशास्त्रसमूहादन्य एव समानार्थकः कल्प्यश्चोदनानुस
एवान्यत्र निबद्धस्य श्रुतस्य कार्यमुखेनाप्यन्यत्रान्वयसंभवादिति विचिकित्स्ये न तथापि यज्ञभा
गस्वरविधिराश्रयभेदे सिद्धे पूर्वनियमविधिलक्षणसांकर्येन भवत्युदाहरणं · किंत्वाश्रयभेद
यो वा पौर्वापर्यरहिता पूर्वनियमे विधिसांकर्ये · तथा प्रकृतौ दीक्षणीयादीनामंगेषु बाधकबाध
नेन प्रवृत्तिविशेषकरोपि यज्ञभागस्वरविधिस्तदतिरिक्तेषु प्रावर्तन पदार्थेषु प्रकृतौ न प्रवृत्ति
विशेषकरः · यजुर्वैदिकत्वोपाधिकेन वेदस्वरविधिनैव तेषु पांसुत्वानुष्ठानस्य सिद्धेः॥ किंतु देहं

© Dharmartha Trust J&K. Digitized by eGangotri

लत्रविहितविकृतिगतेषूपांशुत्वस्यापणेन यजुर्वेदवेद्यं तत्रविहितविकृतिगतेषु तन्नियमेन च सफल
त्वमिति अप्रवृत्तिविशेषकरप्राप्तिपूर्वकप्राप्तिनियमयोरिदमुदाहरणं स्यात् । ननु विकृतिगतेषु अपि
कर्मस्वरूपप्राप्तिनियमनाभ्यां नु प्रवृत्तिविशेषलाभः । कर्मस्वरूपसाक्षात्कर्तुरस्यानुष्ठातुमशक्यत्वात् ।
सत्यं तत्राप्यंगतस्तदंगमंत्रावनरणेन सफलता । अत एव प्राग्गृग्वेदयजुर्वेदविहितासु विकृतिषु नि
यमविधिरूपयज्ञभागस्वरविधिमुदाहृत्य तत्राप्रवृत्तिकरनियमपूर्वकप्राप्तिनियमपरिसंख्याः
प्रदर्शिताः । तदेवमाश्रयभेदेन सत्यसति च विधिनियमलक्षणानामाश्रयभेदपौर्वापर्ययोश्च सतो
५ रसतोस्तत्फलानां सांकर्यस्य बहुमूलं भात्यशेषेव प्रागुदाहृतेषु रथंतरादिविधिष्वेकानेकविध्यप्र
वृत्तिभ्यामपूर्वविधिनियमादिलक्षणानां संकरेण दोषाय त्यासंकर्याह-मध्ये कानेकविध्यप्रसक्ति
मुखभवः संकरो लक्षणानामिष्येतान्याश्रयतः प्रथमं वरमतादृष्टस्य सांकर्यमिति त्यां । दृष्टादृष्टाभ्यामपि दंडः
प्रकृतिजुषिभवे स्तोत्रकार्ये प्रशस्तः स्यात् स्तोत्रसाम्नां क्रतुनिकरजुषामुत्तराखवगानं । ८। स ५२

© Dharmartha Trust J&K. Digitized by eGangotri

स्यमेकानेकविधप्रवृत्तिभ्यां लक्षणासंकरापगमे रथंतरपृष्ठ्यादिनियमविधिष्वनिष्टं नापद्यत इति·
द्धविकल्पविदनिष्टमप्यापद्यते। तथा हि दंडी प्रैषानन्वाहेत्यत्र तद्विधिमात्राप्रवृत्तेः परिसंख्याल
क्षणं प्रवर्त्तते· तथा हि क्रीते सोमे मैत्रावरुणाय दंडं प्रयच्छतीति विधिना मैत्रावरुणार्थत्वेन सिद्ध
स्य दीक्षितदंडस्य प्रयोजनाकांक्षायां तदीयानि दंडापेक्षाणि सर्वाणि कार्याणि समुच्चित्य प्राप्नु
वंति· क्रीते सोमे इत्यादिविधेरप्रवृत्तौ न तल्लक्षणं प्रवर्त्तते· तदा दीक्षाव्यंजकस्य दंडस्यावृद्धीक्षानु
वृत्ति दीक्षितेनैव धारणीयत्वप्राप्तेः किं तु तदा नियमविधिलक्षणं प्रवर्त्तते· स्खलितोच्चैरनवानं
कर्त्तव्ये प्रैषानुवचने किंचिदालंबनसौकर्यापेक्षया नियमेन यस्य कस्य चिदालंबनप्राप्तेः। तत
श्च तत्र तद्विधिमात्राप्रवृत्त्यपेक्षया परिसंख्यालक्षणानुगमने दीक्षितदंड एव प्रैषानुवचने योज
नीयः। क्रीते सोम इति विधेरप्यवृत्त्यपेक्षया नियमविधिलक्षणानुगमने निरूढपशाविव दीक्षपशा
वपि दीक्षितदंडादन्य एव कश्चिद्दंडो योजनीयः। न चैतदुपपद्यते· न चोभयमपि विकल्पेन योज

यितुं शक्यमिति वाच्यं। उच्यते। क्रीणीते सोममिति विधिः स्वतेन तद्वशान्मैत्रावरुणार्थत्वेन सिद्धस्य प्र
योजनाकांक्षस्य दीक्षितदंडस्यैव तत्र योजनीयत्वात्। न तस्य तत्र तद्विध्यप्रवृत्तिमात्रापेक्षया परि
52 संख्यैव केवलमस्त्वित्येति। तत्र क्रीणीते सोममिति विधेरप्यप्रवृत्त्यपेक्षयाप्राप्तापत्तिनियमविधिलक्ष
णत्वं कथमतिष्ठमेव। तथा स्त्रीयोनिषु गीयमानानां क्रतुसाम्नामेकं साम सत्त्वेन क्रियते स्तोत्रीय
53 मिति विध्यनुसारेण कयोश्चिदन्ययोरप्यवगाने कर्तव्ये प्राप्ते यद्योन्यां तदुत्तरयोर्गीयते इति
वचनं क्वचिदुत्तरयोः प्राप्त्यर्थं क्वचित्तयोर्नियमार्थमिति प्रागुक्तं। तत्रैकं साम इति विधेरप्यप्रवृत्तौ य
द्योन्यामिति वचनं क्रतुसाम्नां तन्न योनिरच्छिद्योत्तरयोरेवगानप्राप्त्यर्थमिति प्रसज्येत। नचैत
दिष्टं। उच्यते। तस्य योनिगानप्रापकविधिबलाद्यद्योन्यामिति विधानस्य योनेरनाच्छिद्य क्रतुसा
म्नामुत्तरयोरपि प्राप्तिनियमार्थत्वात्। इत्यनुपलक्षणं व्रीहिशास्त्रप्रोक्षणविध्यादावप्रवृत्त्यपेक्षया
मवहननादिविधयोऽर्थकर्मविधयः प्रसक्त्येरन्नीत्यादीन्यपि दूषणानि द्रष्टव्यानि। तस्मादाम्नायमे ५२

© Dharmartha Trust J&K. Digitized by eGangotri

नप्रथमतरमभावेनान्यथाविधिनियमपरिसंख्यालक्षणफलसंकर्षवदेकानेकविधप्रवृत्त्यपेक्षयात
ल्लक्षणासांकर्यं नियुक्तमस्तु परम्नुमितितन्न द्विधप्रवृत्त्यपेक्षयैव लक्षणान्युपपादनीयानि। ननु तथास
तिनियमपरिसंख्यालक्षणयोर्व्रीहिषवसादन्दस्यादिष्वतिव्याप्तिः स्यादिस्कत्त्रू मितिचेन्न : किंकु
र्मस्तत्संग्रहार्थमेकानेकविधप्रवृत्त्यपेक्षायां हि बलवत्त्वनिदर्शनानि · तस्मादपूर्वविधिलक्ष
णस्य स्वर्गकामवाक्याद्यव्याप्तिवन्नियमपरिसंख्यालक्षणयोरपि तदव्याप्तिरुचितैवार्थैव · अतस्त
त्रिसप्तमीपक्षोऽपि न युक्त इति भावः। किं वाप्राप्त इत्यस्य सति सप्तमीपक्षे परिसंख्यानिवर्त्तकत्वं न
लभ्यत इति दूषणांतरमाह · किं वाप्राप्ते सतीति प्रभवति परिसंख्यानिवृत्तिं न कर्तुं निसाप्राप्तां
निवृत्तिं घटयति खलु साप्यत्र कोवा विशेषः। भावाप्राप्तिर्निषेधात्मकविधिनिकरव्यापकाव्याप्तिदुष्टा
सत्यप्यवनिषेधश्रुतिमुखा परिसंख्यास्त्वतिप्रसक्तिः। अप्राप्ते सतीति विशेषणं परिसंख्यानि
वृत्तिं कर्तुं न प्रभवति यतः परिसंख्याप्यत्यंतमप्राप्तामितरनिवृत्तिं प्रापयत्येव · तवेमामगत्याप्रशना

© Dharmartha Trust J&K. Digitized by eGangotri

मन्त्रस्येत्यश्वाभिधानीमादत्त इति परिसंख्याविधिः प्राप्तविषयेऽपि गर्दभरशनातो निवृत्तो मंत्रमप्रा
यान्तस्मादस्त्यप्राप्तिफलकोऽभवतीति कथं विषयसप्तमीपक्ष इव सप्तमीपक्षेऽप्यावृत्तिरप्राप्ति
विशेषणेन लभ्यते। न त्वपूर्वविधितः परिसंख्याविधेरप्राप्तप्राप्तिफलकत्वेऽस्ति कश्चिद्विशेषः।
54 नन्वयमस्ति विशेषः परिसंख्याविधौ निवृत्तिरूपस्याभावस्याप्राप्तस्य प्राप्तिं फलं अपूर्ववि
धौ अनुभावस्येति। भावप्राप्तिरेवेति चेत्। हाप्राप्त इत्यनेन न विवक्षितं नालोके प्राप्तिश्च वृत्त्या निवृत्तिप्र
तिभटवाति येन प्रसिद्धतयाभावस्य शाब्दप्रयोगेऽपि लब्धविषयत्वेलाभादिति चेत्। एवं सति निषेधा
त्मके षु दीक्षितो न जुहोति नौपसद् करोति नातिरात्रे षोडशिनं गृह्णाति इत्यादि सर्वेष्वप्यपूर्व
विधित्वव्याप्तिः स्यात्। तेषां दीक्षामध्यपश्चिमातिरात्राद्यप्राप्तपुरुषार्थहोमाज्यभागषोडशिनि
ग्रहणादिरूपाभावप्राप्तिफलकत्वात्। न च निषेधा विधयो न भवन्तीति वाच्यं। दार्शपूर्णमासिके नानृ
तं वदेदिति निषेधे सूत्रकृतैव विधित्वस्य व्यवस्थापितत्वात्। नन्वनुवादप्रतियोगि विधित्वं तत्र ५४

© Dharmartha Trust J&K, Digitized by eGangotri

तस्याप्रयस्वापितं तन्नहि तस्योस्पर्शश्चिपौर्णमासप्रकरणे क्रतस्यनानन्तं वदेद्विति निषेधस्यस्पालि
दृष्टपुरुषार्थ। निषेधानुवादत्वमाशंक्याक्रत्वंगत्वेनान्यत्र वदनवर्जनविधिरयं तेनक्रतुमध्ये ऽनृतवद
नेपुरुषार्थनिषेधातिक्रमात्क्रतुवैगुण्यं चभवतीत्यर्थः। इहतु निषेधप्रतियोगिविधित्वलक्ष्यरूपमना
नतस्थापनं दोषइतिचेन्न। मैवं। इहाप्यनुवादप्रतियोगिविधेरेवलक्ष्यत्वात्। अपूर्वविध्याक्षराक्षरा
एणतु विधित्वसमर्थनाय प्राप्त्यप्राप्तिविवेचनवज्ञावाभावत्वविवेचनादर्शनान्नः। भवतु वा विधिमुखं
प्रवृत्तापूर्वविधीनामेवात्र लक्ष्यत्वांगीकारेण कथंचिदव्याप्तिपरिहारस्तथाप्युक्तविवक्षायां
निषेधमुखप्रवृत्तपरिसंख्यानिमाप्तिरनिवार्या। तत्राभावस्तेन आपत्नीयाजादुत्तरवित्केभावि
रूपत्वात्। यथाशृश्वं तत्राप्रापत्नीयासंतिष्ठतेनपत्नीः संयाजयंनीति। अत्र प्रायणीयायाः शृश्वं
तसमापनविधानाच्चत्वदीआनां रुद्वेषां अंगानामकरणेप्राप्तेनपत्नीः संयाजयंतीतिवचनेप
त्नीसंयाजानेवनकुर्यादंगांतराणिकुर्यादितिपरिसंख्यारूपेणप्रापत्नीयामंगांतरप्राप्त्यर्थंन्यथा

© Dharmartha Trust J&K. Digitized by eGangotri

शंखस्य तैजसस्य द्रव्यशुद्धिप्रकरणे स्मृतिकौस्तुभे दर्शितस्य सुरामद्यहतस्य च । त्रिः सप्त मार्ज
नाच्छुद्धिर्न तु कांस्यस्य तापनमिति । अत्र मार्जनवत्तापनस्य विधानाभावात्सर्वेषां तैजसानां ता
55 पनाकरणे प्राप्ते न तु कांस्यस्येति वचनं कांस्यस्यैव तापनं न कार्यमन्यस्य तु कार्यमिति परिसंख्या
रूपेण तैजसान्तराणां तापनप्राप्त्यर्थं । तथैव माधवाचार्यपरार्के स्मृतिकौस्तुभादिके सुराव्यापघा
ते यवचूर्णादिभिरेकविंशतिकृत्वो मार्जनाच्छुद्धिर्न तु कांस्यस्य तापनमर्थात्कांस्यव्यतिरिक्तस्य
तापनमपि कार्यमिति गम्यत इति । यद्यप्यत्राद्योदाहरणे वस्तुतः परिसंख्यानेष्यते शास्त्रे तत्सं
स्थायाः परिसंख्यायाश्च विधिद्वयेन वाक्यभेदस्य तुल्यत्वेन विधिद्वयस्योभयोः शास्त्रे तत्संस्था
पत्नीसंयाजवर्जं कृत्स्नसंस्थयोर्विकल्पस्य प्राप्तविषयत्वेन त्रिदोषायाः परिसंख्यायाश्च परि
हाराय न पत्नीः संयाजयंतीति श्रुत्यंतसंस्थाविधेरर्थवादः ॥ पत्नीसंयाजानन्तरं यागेन तत्प्रशंसा
र्थत्वमिति शास्त्रदीपिकायां तद्विकल्पः स्यादिति दाशमिकाधिकरणे निर्णीतत्वात् । तथापि पूर्वपक्षरीत्यात्र तु ५५

© Dharmartha Trust J&K. Digitized by eGangotri

दाहरणं। यत्रैवंविधं तत्र षोडशित्वं न संभवति तत्रैतदधिकरणपूर्वपक्षरीत्या परिसंख्यैवावतिष्ठत इति
तथाभूतमुदाहरणमिहान्वेषणीयं। प्रसिद्धा चान्यत्रापि नलीलञ्जनवसनं धार्यं न नृपालैरनुत्सवेषु
त्यादिषु स्मृतिषु। यज्ञदत्तदेवदत्तविष्णुमित्रान्न भोजनीयाः उत्सवेष्वपि विष्णुमित्रान्न भोजनीय इति
आदिलोकव्यवहारेषु विशेषनिषेधः शेषाभ्यनुज्ञापर इति निषेधमुखपरिसंख्या। अत्र तस्य तत्रा
तिव्याप्तिः स्यादेवेति भावः। एवमप्राप्तविशेषणार्थविचारमुखेन लक्षणस्य दोषाः प्रदर्शिताः। अ
थाप्तं न विशेषणार्थविचारमुखेनापि लक्षणस्य दोषाननुदर्शयति येनातिव्याप्तिभंगः किल नियमवि
द्वा धौ किं तत्संनिकर्षसर्वोद्देश्यानुवृत्तिर्यदि पुनरुदिता व्याप्तयः स्युर्विकल्पप्रसंगे प्राप्तोद्देश्येक
देशगा अपि खलु कुहचिद्व्यावृत्तार्थं भजंते श्रूयंते सार्वकाम्यप्रभृतिषु विधयस्तेषु वाक्यात्मयः।
स्युः॥११ येन विशेषणेन नियमविधौ लक्षणस्यातिव्याप्तिनिरासोभिमतस्तदभ्यपेरात्यंतिकत्वे किं
तामः। यद्युच्येत सर्वोद्देश्यानुवृत्तिरप्राप्तेरात्यंतिकत्वे अवधात्रस्य वनसर्वेषु व्रीहिषु प्राप्तिः के

© Dharmartha Trust J&K. Digitized by eGangotri

56

पुविद्धर्शपूर्णमासप्रयोगगतेषुव्रीहिष्ववघातस्यक्लृप्तत्वएवप्राप्तेरन्येषुविदलनस्यस्वतंत्रं एवं प्राप्ति
स्त्वेववतदप्राप्तिसत्त्वादिति एवं नहि प्रथमपक्षे कोऽपि विनाभ्यासवशः प्राकृतमादिनाः पुनरपि वि
कल्पेनसुरवेनानुषज्जेयुस्तथाहि· सर्वोद्देश्यानुवृत्तिरिति सत्रोद्देश्यपदेन प्रापणीयोद्देश्यविवक्षिते
पक्षे विवक्षितविध्युद्देश्यं वा· आद्यविषयसप्तमीपक्षोऽङ्गाविततवैकृतानाग्न्यादिविध्यव्याप्ति द्वितीये
सप्तिसप्तमीपक्षोऽङ्गावितताग्रताविध्यव्याप्तेश्च पुनरुक्तेन्मेना पातः। श्येनचितिं चिन्वीतस्वर्ग
कामइत्यादिवाक्यैः स्वस्वोद्देश्येषु स्वर्गादिषु श्येनाकृत्यादिगुणानां प्राप्तेस्तस्यामेव स्वर्गा
द्युद्देशेन तेषामनुष्ठानं वैकृतप्रयोगमध्ये परं न प्राप्तमिति विकृत्यग्न्यादिपुनर्विधीनां तत्प्रा
पणं फलमित्थं कल्प्यते· एवमग्रतानाविध्युद्देश्येषु द्वादशाहिकगावामयनिकेष्वाद्यद्वितीयेष्वहः स्व
प्राप्तानामेवाग्रतानां गृहीत्वेतिषु प्राप्तिर्विधिफलमिति कल्प्यते· तत्र विकृतिषु प्रापणीयानां श्येनादि
गुणानां स्वस्वोद्देश्येषु स्वर्गादिष्वग्रतानावधन्वितोद्देश्येषु द्वादशाहिकगावामयनिकेष्वहः सुक्वा ५६

गा० १

© Dharmartha Trust J&K. Digitized by eGangotri

वित्यस्य प्राप्तिर्नास्ति कथं स सार्वत्रिकी समर्थ्येत । अपि चोद्दिश्यैकदेशप्राप्तिमतोपि न देकं देशान्तरेषु
रितार्थता विधयोद्दिश्यन्ते । यथा एकस्मै वा अन्ये यज्ञक्रतवः कामायाह्रियन्ते सर्वेभ्यो ज्योतिष्टोमः सर्वे
भ्यो दर्शपूर्णमासाविति । अत्र ज्योतिष्टोमदर्शपूर्णमासानां स्वर्गार्थत्वं प्राप्तं स्वकविधिना प्राप्त
मिति फलान्तरेष्वेव विधिचारितार्थ्यं । यथा वाभ्युदयेष्ट्यां त्रेधा तण्डुलान्विभजेदिति तण्डुलद्वि
श्रितानां पूर्वदेवतापनयो वक्ष्यमाणदेवताभ्यो विभागो वा मध्यमादिवाक्येभ्यो देवतान्तरविधा
नेनैव प्राप्तः । सुपांशुयाजाज्यं एवं विधिचारितार्थ्यं । तथाहि विवा एतं प्रजया पशुभिरर्धयति
वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेतीति स त्रेधा तण्डुलान्विभजेद्ये मध्य
मास्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं येणिष्ठा
स्तान्विष्णवे शिपिविष्टाय शृते चरुमिति श्रूयते । अत्र चतुर्दश्याममावास्याभ्रान्त्या दर्शपक्रमं कृ
तवतस्तत्प्रायश्चित्तविधाने त्रेधा तण्डुलान्विभजेदिति तण्डुलानां मध्यमादिभावेन त्रेधा विभागो न

© Dharmartha Trust J&K. Digitized by eGangotri

विधीयते येन मध्यमाद्यस्यादिवाक्येस्तन्सिद्धेः किंतु सर्वेषां दार्शिकहविषां पूर्वदेवताभ्योपनयो विधी
यते । विभजेदित्यस्मिंस्त्वयमर्थो विगम्यते यानि संयुक्तानि तानि विभजेदिति । तंडुलादीनां हविषि चेद्देवतासं
57 युक्तानि अतस्तंडुलभ्रष्टे तु विभागकर्मत्वेनार्थप्राप्तं दार्शिकहविर्मंत्रोपलक्षकत्वेन तेषां पूर्वदेवतापनयो
विधीयत इति युक्तं । अथ वामनुः पुत्रेभ्यो दायं व्यभजदिति प्रयोगदर्शनादिहदार्शिकहविषां वक्ष्यमाणाग्न्या
दिलादिगुणकाग्न्यादिदेवताभ्यो विभजनं विधीयते पूर्वदेवतापनयस्त्वर्थात्सिद्ध इत्येवमस्य वाक्यस्यार्थ
द्वयं भाष्यटीकयोर्दर्शितं । तत्रार्थद्वयेपि तंडुलदधिमत्सु पुनर्विधेश्चारितार्थ्यं देवतांतरसंयोजनेन पूर्व
देवतापनयस्य विशेषतो विभजनेन सामान्यविभागस्याप्यर्थप्राप्तत्वात् । किंतु तंडुलशब्देन दार्शिकह
विर्मंत्रोपलक्षकेण लक्ष्यमाणेनोपांशुयाजाज्येनस्य चारितार्थ्यं । उपांशुयाजाज्यस्याग्नेर्देवतांतरसंयो
जनाभावेन पूर्वदेवतापनयस्य सामान्यविभजनस्य चार्थप्राप्त्यभावात् । अत एव पूर्वदेवतापनयपक्षे
उपांशुयाजाज्यस्य पूर्वदेवतायापनयाद्देवतांतरस्य वा विधानाद्देवतांतरेणाप्युमशक्यत्वादुपांशुया ५७

© Dharmartha Trust J&K. Digitized by eGangotri

ऽज्यस्य लोपः । सामान्यविभजनपक्षे तु पांक्तयाज्यस्यापि सामान्येन वक्ष्यमाणाद्देवताभ्यो विभज्यं
दानं तेभ्यो निर्दिष्टत्वाद्यथेष्टं देवतान्तरविशेषस्य वानिर्देशाद्वक्ष्यमाणाभ्यः सर्वाभ्यो देवताभ्यो विभज्य दातव्यमि
ति भाष्यटुप्टीकयोरुपांशुयाजे वचनाद्यथाप्रकृतीत्येतदधिकरणे बद्धवत्वाग्लक्षणानुसारेणाभावा
स्याया जसत्तामभ्युपेत्य निरूपितं । ननु तं तुलक्ष्टतसान्नाय्येष्वपि पूर्वदेवतापनयसामान्यविभागेनार्था
र्थसिद्धौ । त्रेधा तं तुलान्निसेन द्विधस्य भावे दार्शिकद्रविषां प्रकृतदेवतातिरिक्तदेवताविशेषाकांक्षा
विरहेण मध्यमादिवाक्यानि तेषां पूर्वदेवताविशेषसंयोजनपराणीत्यत्र नियामकाभावात् । नहि
तदामध्यमादिशब्दानां प्रकृततं तुलादिपरत्वे नियामकमस्तीति चेन्न । न । यद्वस्तोपबंधबलात्तं तुला
नां प्रकृतानां ग्रहणं तत्समभिव्याहाराद्दधिस्थलयोरपि प्राकृतयोर्ग्रहणमित्युपपत्तेः । न चापनीत
पूर्वदेवतानां तेषां देवताकांक्षाविरहेण तत्संयोजनानुपपत्तिः । पूर्वदेवतापनयाकांक्षाविरहेऽपि
तदपनयवद्देवतान्तरसंयोजनस्याकांक्षाविरहेऽपि तत्संयोजनस्य वचनबलादुपपत्तेः । सामान्यतो वि

© Dharmartha Trust J&K. Digitized by eGangotri

58

भजनपक्षे विनैव पूर्वदेवतापनयं देवतांतरसंयोजनस्य तत एव पूर्वदेवतापनयस्यार्थसिद्धता यास्य संप्रतिपन्ने
श्च । अलस्त्रेधा तंदुलानिति विधेरप्युद्देश्यैकदेश एव चारितार्थ्यं । तस्मात्सर्वोद्देश्यानुवृत्तिप्राप्तिरहितेषु उदाहृ
तविधिषु व्याप्तिः स्यादित्यर्थः ॥ स्यादेतत्सर्वोद्देश्यानुवृत्तिरहितत्व सर्वस्मिन्नुद्देश्यव्यक्तिषु प्राप्तेरनुवृत्तिर्वि
वक्षिता । किंत्वेकस्यामप्युद्देश्यव्यक्तौ सर्वात्मनानुवृत्तिस्तच्चापि तद्रूपा । न चैवं स्नानि सर्वकाम्यविध्यादि
ष्वतिव्याप्तिः । तेषु स्वर्गातिरिक्तफलोपांशुयाजद्व्यादिरूपकिंचित्किंचिदुद्देश्यव्यापकाप्राप्तेः सत्वात् ।
नापि नियमव्यावृत्त्यलाभः । नियमविधौक्तविदप्युद्देश्यव्यापिकाया अप्राप्तेरभावात् । सर्वेष्वपि दर्शपू
र्णमासिकेषु व्रीहिष्वाक्षेपाद्वहननस्य पाक्षिकप्राप्तिसत्वात् । नहि व्रीहीनवहंतीति नियमविध्यभा
वे केषुचिद्व्रीहिष्ववहननं केषुचिद्विदलनादिकं च व्यवस्थितमित्याक्षेप्तुं प्राप्यते । येनोक्तविदप्युद्देश्य
लदप्राप्तिव्यापिकास्यात् । किंतु सर्वेष्वपि व्रीहिष्ववहननं नैवावेतुष्यकार्यं विदलनादिनादेति तदुभय
मपि पक्षे प्राप्यते । न चैकत्रोभयरनुष्ठानस्याविरुद्धत्वादुभयोः प्राप्तिर्नास्तीति शंकनीयम् । नहि प्राप्ति ५८

© Dharmartha Trust J&K. Digitized by eGangotri

र्नामानुष्ठानमेव. तथा सति क्वचिद्दर्शपूर्णमासप्रयोगे विदलनस्याप्यनुष्ठाने नियमविधिविरोधापत्तेः।
किं तु नियमविध्यभावे लौकिकसिद्धवैतुष्यकरणत्वात्तदर्थमेवहननं विदलनादिकं वानुष्ठीयेत तस्येव
मनुष्ठानकरणमात्रं प्राप्तिस्तच्चैकत्रापि न विरुद्धं न ह्यत्र विरोधोऽपि नियमविध्यभावे क्वचित्प्रयोगे वहन
नं प्रयोगान्तरे विदलनादिकं वानुष्ठीयेतेत्येवं तर्कः प्रवर्त्तत इति नियन्तुं शक्यते. किं च प्रयोगविशेषमेवा य ४
मेवाधिकृत्य नियमशास्त्राभावे प्रहावहननं विदलनादिकं वानुष्ठीयेतेत्येवमपि तर्कप्रवृत्तिसंभवात्.
तस्मादुक्तविवक्षायां न कश्चिद्दोष इत्यत आह उद्देश्यव्यापिका सा यदि भवति तदा प्यादिमाव्याप्ति
बंधः स्यादव्यग्निश्च गवामयनिकषडहे पृष्ठसाम्नो विधाने. अन्यार्थप्रापणाद्ध्यनियमहरणायो
रप्यनिव्याप्तिरित्थं तत्रैवैककालिकत्वं ननु विधिरूपवाद्यपवादस्तथा स्यात्. एवं विवक्षायामपि प्रथम
न्म श्लोकोक्ताग्निविद्याद्यव्याप्तिः पुनरुज्जृम्भते रूपः प्रागुक्तदोषः स्यादेव तदुदाहरणेषु क्वचिदपि त
दुद्देश्ये प्राप्तेरभावात्. अन्यत्र वाव्याप्तिरधिका स्यात्. तथा हि द्वादशाहे पृष्ठ्यः षडह उपसन्तः

© Dharmartha Trust J&K. Digitized by eGangotri

59

सर्वत्र क्रमेण रथंतरबृहद्भ्यां स्तुवीरन्नभ्यासाकारैवतारव्यपृष्ठस्तोत्रसाधनवतां पक्षमम क्रतौ समग्रहारः। गवाम
मयने पुनस्तत्स्थूयते पृष्ठ्यः षडहो बृहद्रथंतरसामा कार्य इति तेन गवामयनिक षडहस्य बृहद्रथं
तर एव पृष्ठसामनीति विरूपादि। निनिवर्त्तते। तत्र च षडहे दृष्टेन बृहद्रथंतरविधौ वा यस्याङ्गो रथंत
रसामत्वं द्वितीयस्य बृहत्सामत्वं च द्वादशाहिकषडहे न्यायमि हापि प्राप्नोमिस्युद्देश्यव्यापकाप्राप्ते
रभावाद्व्याप्तिः। नन्विह एकैकस्याङ्गो बृहद्रथंतरसामत्वं विधीयते संसर्गतु मेक कर्माङ्गी सर्वतुम्मेक
र्यादित्यादौ यथा। ननु कश्चिदत्र यद्धि न प्राप्तमिति चेन्न। न प्रकृतौ बृहद्रथंतरयोः परस्परनैर
पेक्ष्ये पृष्ठस्तोत्रसाधनत्वा न तथैव प्राकृतनैरपेक्ष्या बाध्येत क विहृद्बृहद्रथंतरमिति विधानो
पपत्तेस्तद्बाधनायोगात्। न च वाक्यभेदश्च रथंतरं च बृहद्रथंतरसामनी अस्येति बृहद्रथंतरसा
मेति द्वंद्वगर्भेऽत्र बहुव्रीहिस्तत्र च द्वंद्वाद्यगतसाहित्यबलादेकैकस्याङ्गोभयसामत्वं विधेयमि
त्यकृतवैद्वंद्वसमासं बृहत्सामस्य रथंतरसामस्येत्यनेकपदबहुव्रीहिस्वीकारसंभवात्। न च द्वं १०

© Dharmartha Trust J&K. Digitized by eGangotri

द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनमिति कात्यायनवचनादिह द्वंद्वसमासो नियत इति वाच्यं · य
यत्र द्वंद्वतत्पुरुषयोः सतोरव्ययत्वद्रूपमसत्त्वेऽप्यान्यद्वा वलितं तत्र समासकृतरूपनियमार्थत्वाद्वार्त्तिकप्र
प्रवृत्तेः यथा वाकत्वत्वक्प्रियः । पंचगवधन इति · अत्र हि द्वंद्वतत्पुरुषयोरकरणे द्वंद्वाच्चुदषहान्ता
त्समाहार इति गोरतद्धितलुकि इति च समासांतप्रत्यययोरप्राप्तेर्वाक्त्वक्प्रियः पंचगोधन इति रू
पं सिध्येत् · इह तु द्वयोरपि रूपस्याभेदान्नियतोर्थे निर्णेतव्ये प्रत्येकं प्राप्तिर्वादकानुग्रहायानेकप
द बहुव्रीह्याश्रयणमेव युक्तं · यद्यपि द्वंद्वगर्भ एवात्र बहुव्रीहिः स्यात्तथापि प्रकृतितः प्राप्तं नैरपेक्ष्यं
न बाधितव्यं · षड्गवषड्गवापेक्षया साहित्यस्यार्थप्राप्तस्य तद्विषयोपपत्तेः । अन्यथा वृद्ध इत्यं तरयोरेके
कस्मिन्नेवाहनि साहित्यस्य च विधेयत्वेन द्वद इत्थं तरएवास्य षडहसाम नीतिचैकैकस्मिन्नहनि पर
स्परसाहित्ये कर्तव्ये द्वंस्य नेकार्थविधाने न वाक्यभेदप्रसंगात् । न ह्यत्र संसवादिवच्चोदकप्राप्तयोर्वृद्ध
इत्थं तरयोः साहित्यमात्रविधानं शक्यं · तृतीयादिषु ह्यस्कृतयोरपि प्रापणीयत्वात् : तस्मादिह नो

© Dharmartha Trust J&K. Digitized by eGangotri

भयसामत्वविधानं॰ तथैव व्यवस्थापितं पृष्ठस्य युगपद्विधेरेकादशबृहत्सामत्वमिति दाशमिकाधिकर
णेन न्यैर्स्स्यैकस्यान्हए केकसामविधानं तथापि बृहद्रथंतरसामेति पाठक्रमादाद्यस्यान्होऽह्न द्वितीय
स्य रथंतरमित्यनेन क्रमेण बृहद्रथंतरसामत्वं विधेयं॰ ननु क्रविद्वपिनप्राप्तमित्यर्थः दृश्यव्याप्तिकाप्रा
प्तिरस्तीति चेत्॰ न॰ प्राकृतप्राप्त्यबाधेनाद्यस्यान्होरथंतरं द्वितीयस्य बृहदित्यनेन क्रमेण विधा
ने संभवति अन्यात्तरपूर्वनिर्देशार्थत्वप्राप्त्या अन्यथा सिद्धे न बृहद्रथंतरपाठक्रमेण प्रकृतिप्राप्त
बाधना योगात्॰ जगती वृष्ठं दाशि प्रस्यवरोहति आग्रयणाग्रहाः बृहत्पृष्ठानीति गवामयनस्यो
त्तरपक्षसिषाडहिकस्य पंचमस्याह्नोर रहत्पृष्ठत्वलिंगेनाद्यस्य रथंतरं द्वितीयस्य बृहदित्यादिक्र
मस्यैव निर्णयाच्च॰ बृहद्रथंतरसामा कार्य इत्यादि विधयो हि गवामयनस्य पूर्वस्मिन् पक्षे स्थिअवां
तरप्रकरणेन निविशंते॰ पूर्वस्मिन् पक्षस्यानुष्ठितत्वाद्द्वंद्वेनीक पृष्ठसामस्तोमगणास्तु उत्तरप
क्षस्य प्रातिलोम्येनानुष्ठेयाः प्रत्यवरोहिणो मासा भवंति उत्तरपक्षस्यावृत्तागणा इत्यादि दर्श

नात्। ततश्च यदि पूर्वस्मिन्पक्षस्य युग्मस्याह्नो रथंतरं युग्मस्य बृहदिति नियमः स्यात्तदैवोत्तरपक्षस्य यु
ग्मपंचमस्याह्नो बृहतश्च दर्शनमुपपद्यते। तस्माद्बृहद्रथंतरसाम कार्यं तत्राद्यस्याह्नो रथंतरं द्वि
तीयस्य बृहदित्यादिक्रमेणैव षडहो द्वित्वेन बृहद्रथंतरसामत्वं विधीयते तस्य त्व षडहस्योद्देश्यव्या
पिका प्राप्तिर्नास्तीत्यप्राप्तिरनिवार्या। अपि चैवंविधिभिः स्वोद्देश्यविधेयस्याप्राप्तस्य प्रापणं क्रि
यमाणमपि तत्राप्रवृत्तिविशेषकरत्वादन्यार्थत्वं वाच्यमिति तेन कस्य चित्प्रापणं नियमनं परिव
र्जनं वास्मदुदेशितेषां नवमध्ये लोकावनारिकोदाहृतानां मध्ये यावन्यार्थप्रापको नियमपरि
वर्जनविधी साम्नास्कृत्वीन यदि रथंतरसामा सोमः स्यादैंद्रवायवाग्रान्गृह्णीयादिति यो र्विध्योरपि व्याप्ति
रप्येवं स्यात्। विषयस्तु ध्यर्थमन्यदपि नियमाविधिरूपमतिव्याप्तिस्थलमुदाह्रियते। प्रजापति
र्वा इदमेक आसीदित्यादिना प्रजापतिसृष्टाग्निवाय्वादिसंसर्गत्वेन वेदानां प्रशंसयोपक्र
म्य श्रूयते। तस्मादुच्चैरृचा क्रियते उपांशु यजुषोच्चैः साम्नेति। अत्रोपक्रमवेदानां प्रशंसया वे

© Dharmartha Trust J&K. Digitized by eGangotri

वेदविषयाकिंविद्विधास्यतइ॥सवगमात्तदनुरोधेनगर्गादिशब्दाःकगादिप्रायऋग्वेदादिपरास्तथाचऋग्वेदे
नयत्क्रियतेविधीयतेतदुच्चैरित्यादिप्रकारेणऋग्वेदादिविधेयकर्मोद्देशेनोच्चैस्त्वादिविधयइतिसिद्धमुप
क्रमाधिकरणे॰ कर्मस्वरूपसाक्षान्निवेशमुच्चैस्त्वादयोनलभन्ते॰ अतस्तेतदंगमंत्रेष्वेवतरंती ऋग्वेदादिवि
धेयकर्मांगमंत्राणामनियतस्वरप्राप्तौस्वरविशेषनियमार्थाएतेविधयः पर्यवस्यंतितत्तन्मंत्रेषुविधि
61 षुविधेयानामुच्चैस्त्वादीनांपार्ष्टिकात्वयविषयेषुमंत्रेषुपाक्षिकप्राप्तिसत्वेप्युद्देश्येषुकर्मस्वरूपकथमपि
प्राप्त्यभावान्नेषपि [illegible]लक्षणस्यातिव्याप्तिःस्यात्॰ ननुकर्मोद्देशेनोच्चैस्त्वादिविधयोप्राप्तविषयत्वा
दपूर्वविधयएवयुक्ताः॥ कथमतिव्याप्तिरितिचेत्॰ उच्यते॰ यत्रयदनुष्ठानंयस्यविधेःफलंतत्रतद
नुष्ठानप्राप्त्यप्राप्तिविवेचनेनैवनियमापूर्वविधित्वव्यवस्थाकार्या॰ नतुयत्रयद्विशेषत्वंविधिबो
ध्यंतस्यतद्विशेषत्वेप्राप्त्यप्राप्तिविवेचनेन॰ तथासत्यवघातगतापूर्वीयत्वांश[illegible]प्राप्त्यानहिध
रप्यपूर्वविधित्वप्रसंगात्॰ नहितत्रोद्देश्यतावच्छेदकावच्छेदेनाप्राप्तिरिहोद्देश्यस्वरूपएवाप्राप्ति ६२

© Dharmartha Trust J&K. Digitized by eGangotri

रित्येतावताकश्चिद्विशेषोस्ति॰ विवक्षितस्वरूपभेदेनात्यंताप्राप्तेरुभयत्राप्यविशिष्टत्वात्ः ननुकेनापि
रूपेणप्राप्त्यभावएवात्यंताप्राप्तिः स्वर्गादिर्न यागकार्यत्वादेरपिसामान्यतोदृष्टानुमानगम्याप्ति
संभवेनतत्रापूर्वविध्यभावापत्तेः। तत्रश्च यथापूर्वीयोद्देशेनावघातविधानेपि व्रीहिष्ववघातानुष्ठा
नमेवविधेःफलं तत्तुपक्षेप्राप्यतइतिनियमविधिराश्रितःएवमिहकृष्णवर्णादिविधेयकर्मोद्देशेनस्व
रविशेषविधानेपितदंगमंत्रेषुस्वरविशेषानुष्ठानमेवविधेः फलं तत्पक्षेप्राप्यतइतिनियमविधि
रेवाश्रयितुंयुक्तः। अनेनैवन्यायेनपूर्वोदाहृतविध्योरपिनियमपरिसंख्यात्वमुपपादनीयं। ननु
गुणमुख्यव्यतिक्रमेतदर्थत्वान्मुख्येनवेदसंयोगइत्यधिकरणेभाष्यकारेणयाजुर्वेदिकस्याधान
स्यसामवेदेवारवंतीयमंगंविहितं तत्रवारवंतीयस्यकिंस्वरविधिनिबंधनंसामवेदिकमुच्चैस्त्वंकार्य
मुतप्रधानविधिनिबंधनंयाजुर्वेदिकमुपांशुत्वमितिसंदेहेप्रधानविधिनिबंधनस्यप्रधानैकवाक्य
तापेक्षित्वेनविलंबितत्वात्तदनपेक्षतयाशीघ्रंप्रतीयमानमुच्चैस्त्वंकार्यमितिप्रापय्यराद्धांतितंविलं

© Dharmartha Trust J&K. Digitized by eGangotri

तप्रतीतिकमप्युपांशुत्वं प्रधानकर्मत्वाद् दुर्लीयः प्रधाने साक्षान्निवेशमलभमानत्वयाग्यावतीर्णमपि विहित
प्रधानस्यैव धर्मः। अतोङ्गधर्ममुच्चैस्त्वं बाधित्वा प्रधानधर्ममुपांशुत्वं कार्यमन्यथा प्रधानवैगुण्यापत्तेरिति॰
एवं प्रधानकर्मोद्देशेन स्वरविधानान्नोनकेवलं तदङ्गमन्त्रे घनियतस्वरप्राप्तिप्रयुक्तं प्रधानस्वरनियममात्र
62 फलं किन्तु नियतस्वविधिनिबन्धनस्वरप्राप्तिमत्त्वं वारवन्तीयादिषु तदावर्तनेनाप्राप्तप्रधानस्वरप्रापणम
पि फलं॰ अतश्चापूर्वविधिसंयुक्तमिति चेत॰ अस्तु नामैवं तथाप्यनियतस्वरप्राप्तिमत्त्वं त्वाङ्गेनियमविधित्व
मपि वक्तव्यं विनिगमनाविरहात् इ सम्भवति परनिवार्यैव॰ नु ह्यवहननेनियमविधिरेव न परिसंख्येत्यत्राप्य
वहननन्नियमस्य विदलनादिनिवृत्तिप्रत्युपजीव्यत्वमिव शरैर्नादानमन्त्रविधिः परिसंख्यैव नियमविधिरि
त्यत्र गर्दभरशनानिवृत्तेरनन्यलभ्यत्वमिव द्वयविधिरेव न नियम इत्यत्र किं विनिगमकमस्ति॰ उभयत्रयोरुप
जीव्योपजीवकभावाभावाद् द्वयोरप्यनन्यलभ्यत्वाच्च॰ न चैकस्यैव विषयभेदेन विधिनियमरूपत्वं कथं विरु
द्धः। विधित्वेरूपत्वाभावे न पूर्वश्लोकोदाहृतसार्वकाम्यादिकवाक्यानां विध्यनुवादरूपत्ववदेतेषां विधिनि
यमरूपत्वस्याप्युपपत्तेः। अत एव प्रागाश्रयाविषयभेदेन विधिनियमपरिसंख्यानां संकरो दर्शितः स्यादेतन्मा ६२

© Dharmartha Trust J&K. Digitized by eGangotri

भूतसर्वपूर्वदृश्येषु अनुवृत्तिरूपावासर्वत्विनाक्कविद्युद्दृश्येष्वनुवृत्तिरूपावासर्वादृश्यानुवृत्तिरात्यंतिकत्वं
कालिकत्वं तु त्रिकालायामप्राप्तो विधिरिति प्रसिद्धेरिति चेन्न। एवं सत्यपवादापवादो विधिर्न स्यात्। तस्य
प्राप्त्यपोदितत्वपुनःप्राप्त्यर्थत्वात्। तथा हि कृष्णलचरौ श्रपणं भूयते घृते श्रपयतीति। नेदमपूर्वं श्रपणं
विधीयते किंतु दार्शपौर्णमासिकश्रपणं विस्मृतिरूपप्रयोजनाभावान्निवर्तमानं प्रतिप्रसूयते। ततः प्रा
कृतानां श्रपणधर्माः कर्तव्या इति स्थापितं तद्दशमे। ननु तत्र प्रतिप्रसवरूपस्य श्रपणविधेरपूर्वविधित्वं ना
स्तीति अंगीकृतं तुष्टीकां। तस्मात्प्राकांतरं नैतदपूर्वविधिदोषतः। प्रतिप्रसवमात्रं तु लाघवाद्विधि
त्वं वरमिति। सत्यमुक्तं तस्य श्रपणान्तरं न विधेयमत्यन्तमबुद्धिस्थस्य विधौ तस्य बुध्यारोहणकल्पनागौ
रवात्किंतु चोदकानीतया स्वतएव बुध्यारूढमर्थाभावान्निवर्तमानं प्राकृतमेव श्रपणं विधेयमित्यत्र
तात्पर्यं न तु प्रतिप्रसवविधिनापूर्वविधिरित्यत्र तात्पर्यं तदभावे श्रपणस्यापोदितस्य प्राप्त्यसंभवेन
तस्यापूर्वविध्यन्तर्भावोचितत्वात्। अन्यथा नियमपरिसंख्यानन्तर्भूतस्य विधौ तत्त्वापत्त्या विधित्रैविध्यभं

© Dharmartha Trust J&K. Digitized by eGangotri

गप्रसंगात्. एवं पूर्णाग्निपि प्रभागद्वित पोह्नवरो चोदकतः प्राप्यस्य प्राकृतस्य पेषणस्य प्रयोजनाभावा
न्निर्वर्त्तमानस्य विधिरपि प्रति प्रसवविधिः। एतादृशाः प्राप्तस्यापवादे प्रसक्तेन दपवाद्या विधयः एतेषु प्रा
63 क्प्राप्तिसत्वात्त्रैकालिकाव्याप्तिर्नास्तीत्यव्याप्तिः। केचित्तु नः प्रसक्त प्राप्तिकस्य प्रागेवापवादे प्रसक्ते
संति विधयः अपवर्हिषः प्रयाजानूयाजास्यपवर्हिषोनुयाजानित्यादयः। तथा ह्यवभृथस्तावदुक्ततमेधीय
वदपूर्वः। तत्राप्यक्रमंताव ज्यभागौ यजतीत्याज्यभागपुनःश्रवणेनावभृथप्रयोगविधेः न्लेहत्तोप
कारप्राकृताज्यभागनिराकांक्षतया चोदकस्याकल्पनीयत्वात्. नवतदक्तश्रहुपेतस्याक्तमेसोमा
त्र्यग्रवर्हित्यादि याज्यानुवाक्यामंत्रद्वयस्य विधिनार्थं। लिंगक्रमाभ्यामेव मंत्रप्राप्त्यानुवादेन त
स्याज्यभागविधिपरत्वात्. एवं वाज्यभागविधिना चोदककल्पनासंनिबंधेन ततः प्रसक्तायां प्रयाजादि
प्राप्तौ निवारितायां बर्हिर्व्यतिरिक्त प्रयाजादि प्राप्त्यर्थमबर्हिषऽइति श्रवणं. एतादृशेषु नियमविध्य
भावे बहूनन विदलवादीनामाक्षेपादिपूर्वतापराज्यभागादिविध्यभावे प्रयाजादीनां चोदकात्प्राप्तिर्भ
वत्येवांग इति भविष्यत्प्राप्तिसत्वेन त्रैकालिकप्राप्त्यभावाद्व्याप्तिः। एवमथातोग्निमग्निष्टोमेनानुय

© Dharmartha Trust J&K. Digitized by eGangotri

जेत्नीत्यादिविधिष्वप्यव्याप्तिः। दर्शितं नन्दिनवश्लोकावतारिकायामथातोऽग्निमित्यादिविधेरपवादा
पवादत्वं तस्मात्त्रैकालिकत्वमात्यन्तिकत्वमित्यपि न युक्तमिति भावः १२ ननु तर्हि पाक्षिकत्वमात्यन्तिक
त्वमस्तु युज्यते च नियमविधित्वावृत्तसमर्थस्य तस्य तथा निर्वचनं नियमः पाक्षिके सतीति नियमविधिल
क्षणगादित्याशंक्याह युज्येत पाक्षिकत्वं तादृशि यदि निरुच्येत न साक्षिकत्वं प्राप्स्याकि मीशि तत्वं कथि
ति त तदधिकाधिकदूषणं न युक्तं· सक्ताववच्छेदभेदं तदीतु नियमानि प्रसक्त्या निरास्यं तत्रोपायान्तरं तद्दूरद
दूतिलयोऽर्ह्यस्यावच्छेदभेदः १३ युज्येत तथा निर्वचनं यदि तत्सालियोगि पाक्षिकत्वं निरुच्येत प्राप्तिशब
लब्धं पाक्षिकत्वमिति न युक्तं पूर्वश्लोकयोर्दर्शिताभिः सार्वकाम्यादिविधिषु दृष्टः इत्थं तद्रसामलविधौ
व्याप्तिव्याप्तिभिः प्रागुदाहृतेषु उपदेशाभ्यां मन्त्रनिविष्टतिसाधारणेषु द्वादशाहिकगगवामयनिका
ग्रतायज्ञभागस्वरविधिषु व्याप्तिनिष्ठाक्रान्तत्वात्· स्यादेतदवच्छेदभेदं विना प्राप्तिश्चेवल त्वप्राप्तेः
पाक्षिकत्वं सार्वकाम्यादिविधिपुरुषार्थावच्छेदेन प्राप्तिस्तदितरफलताद्यवच्छेदेनाप्राप्तिरित्यवच्छेद

© Dharmartha Trust J&K. Digitized by eGangotri

64

भेदसत्त्वान्नाव्याप्तिरिति चेत्. एवं तर्हि विशेषणफलं नियमविधिव्यावर्त्तनं न लभ्येत एकस्मिन्नपि व्री
ह्यादिद्रव्ये अवहननादीनामुपायान्तरप्राप्त्यवच्छेदेनाप्राप्तिस्तद्भिन्नावच्छेदेन प्राप्तिरिति प्राप्त्यप्राप्त्यो
रवच्छेदकभेदसत्त्वात्. इत्यर्थः।१३ ननु तर्ह्यवच्छेदकभेदे उपायान्तरप्राप्तितद्भिन्नत्वं विशेषणं निवेश्य
ते. तथा चोपायान्तरप्राप्तितद्भिन्नावच्छेदकभेदं विनाप्राप्तिश्च बलत्वं पाक्षिकत्वमिति पर्यव
सानात्पाक्षिकत्वविशेषणेनावहननादिनियमविध्याव्यावृत्तिलाभस्तत्र निरुक्तपाक्षिकत्वसत्त्वात्.
सार्वकाम्यादिविध्यनुगमश्च तत्रोपायान्तरप्राप्तिरन्तद्भिन्नस्वर्गत्वतदितरफलतावच्छेदकभे
देनैव प्राप्त्यप्राप्त्योः कथंचित्तया निरुक्तपाक्षिकत्वाभावसत्त्वादतो नास्ति तत्र कश्चिद्दोषः इत्याशं
क्याह. तद्भिन्नत्वं निवेश्यं यदि खलु तदवच्छेदकभेदे ततोऽनव्यावृत्तिः कापि चोद्धृतः तुगमनवृत्तसं
श्रितायानियत्याः। स्थाने वैकल्पिकोक्तिः क्रियमन इति मतं यद्धि उपायान्तरात्ताद्भिन्नं पाक्षिकत्वं
यातिकरदिति किन्तु वैकल्पिकत्वं १४ एवं विवक्षयोपायविषयनियमविधिव्यावृत्तिलाभेपि कार्या

© Dharmartha Trust J&K. Digitized by eGangotri

द्विविषयतद्व्यावृत्तिर्न लभ्यते । तथाहि पुंध्यान्यां तदुत्तरयोर्गर्भपतीति विधिर्यो निःसमवच्छंदस्कयोरुत्त
रयोर्नियमार्थमित्युपपादितं नवश्लोकावतारिकायां । अयं च कार्यनियम एव क्रत्वोः समसंस्कार्यु
र्ययोस्तत्कार्यत्वात् । तत्रश्चात्रोपायान्तरमापि तत्तद्विरुद्धभिन्नकार्यान्तरप्राप्तितद्विरुद्धरूपावच्छेदभे
देनैव प्राप्तिशुक्लत्वमिति विशेषणाभावप्रयुक्तविशिष्टाभावरूपपाक्षिकत्वस्तत्वात्तेन विशेषणे
नास्य व्यावृत्तिर्न लभ्यत इति नत्रातिव्याप्तिः स्यात् । तथा प्रक्रमस्याभिरात्रेविकल्पितस्य षोडशिग्रह
स्योत्तरेहन्यभिरात्रस्य गृह्यत इति विकृतिविशेषे नियमो ह्युपायद्वयप्राप्तो नियमो न भवति षोडशि
ग्रहाभावेपि क्रतोर्वैगुण्ये षोडशिग्रहोपदेशो निरर्थकः स्यादिति तत्सार्थकत्वाय षोडशिग्रहसाध्यतया कल्प
नीयफलभूम्नि तद्भावस्योपायान्तरत्वाभावात् । अतस्तत्रापि पूर्ववदतिव्याप्तिः स्यात् । क्रतावुपगादिति क्रतु
गमननियमे कदाचिद्वातावनिच्छयाऽनुपगमनमपि प्राप्नुयादिति तदर्थं प्रवृत्तेऽनुपगमनस्योपगमनसा
ध्यं पुत्रोत्पादनं प्रत्युपायान्तरत्वाभावादतिव्याप्तिः स्पष्टैव । तथा ज्योतिष्टोमे बृहत्पृष्ठं भवति रथंतरं पृष्ठं
भवतीति बृहद्रथंतरसाधनके पृष्ठाख्ये हि स्तोत्रे विहिते तयोः स्तकन्यस्याधिकरणन्यायेना हृष्टार्थतया

© Dharmartha Trust J&K. Digitized by eGangotri

65

प्रयाजानुयाजवच्छिन्नकार्ययोरपि ववनवलाहिकयोर्नं ननु व्रीहियवादिवदेककार्यतानुः अत एव व्रीहि
धर्मणामवघातादीनां यवेष्वपि वरहदुर्मावामूहनि प्रसूयमानेसमुद्रमनसाध्यायेदित्यादिनाविहिता
नामर्थान्तरे वार्थान्तरधर्माणामर्थान्तरप्रसूयमाने नेत्रे समीलयेदित्यादिनाविहितानामर्हतिवानसंकरः।
तदेतदेकार्थत्वादविभागः स्यादितिनावश्यिकाधिकरणे प्रपञ्चेन च व्यवस्थापितं। ज्योतिष्टोमविकृतिषु
वेगपहव्यादिषु पृहत्सृष्टनियमः श्रूयते· तत्रापि तत्कार्यमदृष्टमनिरर्थान्तरं पृष्ठस्योपायांतरत्वाभावा
दतिव्याप्तिः। स्यादेतन्नु उपायांतरस्थाने वैकल्पिकविभागे पक्षेनिवेशयिष्यामस्तथावत्रैकल्पि
कप्राप्तिहदिर हभिन्नावच्छेदभेदं विनाप्राप्तिश्च वललपाक्षिकत्वमिति पर्यवसानात्कृताहतनियमवि
धिषु वाप्राप्तेरुक्त रूपपाक्षिकत्ववत्तान्नातिव्याप्तिरिति चेत्· एवं हि वैकल्पिकत्वपाक्षिकत्वानुप्र
वेशादितं निर्वक्तव्यं अन्यथान्योन्याश्रयादिदोषापत्तेः। ननु नसंभवति विधित्सितेन सह पाक्षिकत्वा
पादकत्वमित्यादिरूपेणैव तस्य निर्वक्तव्यत्वादिति भावः। १४ स्यादेतदवच्छेदभेदं विनेतिस्थाने आश्रयभे
दं विनेति करिष्यामः। न तथ्व नियमस्याप्राप्तेरेकस्मिन्नप्याश्रये प्राप्तिकरं विततयापाक्षिकत्वमापा ६५

© Dharmartha Trust J&K. Digitized by eGangotri

क्षिकत्वान्न नियमविधिष्वतिव्याप्तिः। नापि सार्वकाम्यादिविधिष्वव्याप्तिः। ते पुरुषेष्वपि स्वर्गाद्याश्र
यव्यक्तिभेदेनैव प्राप्त्यप्राप्त्योः कथंचित्त्वादित्याशंक्याह॥ यद्यप्येतां तयोरन्त्वधिकरणभेदात्प्राप्तिसं
मेलनं तत्रापि प्रत्यक्षपक्षेष्वपि समुदयेन तावदव्याप्तिरेकाकार्त्स्न्येनैवोपहव्यप्रभृतिहविशेषयो
र्ब्राह्मणोक्तो पूतीकाद्याश्च मंत्राणां तत्र मुख्यनियमातिप्रसक्तिः न तथा स्यात्॥ २५ इत्थं विवक्षायामव्य
व्याप्तिरेको दोषः स्यात्॥ अतिव्याप्तिरन्यो दोषः। तथा ह्युपहव्यनामक्रतावश्वः पुत्रो वा दक्षिणेति
दक्षिणां विधाय श्रूयते स ब्रह्मणे देय इति॥ तथा क्रतपेयक्रतौ औदुंबरः सोमचमसो दक्षिणेति दक्षि
णां विधाय श्रूयते स प्रियाय सगोत्राय ब्राह्मणाय देय इति॥ अत्र क्रतुदक्षिणात्वेन विहितयोरश्वचमसयो
र्ब्राह्मणः संबंधः प्राप्त एव किं त्वन्येषामपृत्विजां तयोः संबंधः प्राप्त इति तदंशे ब्रह्मसंबंधाप्राप्तेः कार्त्स्न्येन ब्र
ह्मसंबंधप्राप्त्यर्थमिदं वचनद्वयं तेनार्थादृत्विगंतरेभ्यस्तयोरपनीतत्वात्तेषामानतिर्विनेवस्तत्त्विसामान्यरूपाये
कारणीया॥ तदेतत्संबंधेनुवश्वस्य दक्षिणेति तथा सोमचमस इति द्वाभ्यामिकाधिकरणाभ्यां निरूपितं॥ एवं चैकस्या
मेवाश्वव्यक्तौ चमसव्यक्तौ च ब्रह्मणः प्राप्त्यप्राप्त्योर्मेलना। नहि ध्योरव्याप्तिः। तथा प्राजापत्यं घृते निर्वपेद्ध

© Dharmartha Trust J&K. Digitized by eGangotri

ऽंशतकृत्स्नत्वमायुःकामइतीष्टिविशेषं विधाय तत्संनिधावाम्नायते· न तत्सर्वं परिहरतीति· अत्र हविःशेषस्य
सर्वेभ्यो ऋत्विग्भ्यो भक्षणापरिहरणीयत्वे प्राप्ते कार्त्स्न्येन तत्र ब्रह्मसंबंधार्थमिदं अतोत्राप्येकस्यामेवह
विःशेषव्यक्तौ ब्रह्मणः प्राप्यप्राप्त्योर्मिलितत्वानु अव्याप्तिः। नन्विडाप्राशित्रं चतुर्धाकरणं चेति त्रिविधम
66 पि हविःशेषं ब्रह्मणे परिहरणीयं तत्र सर्वं युगपदेव परिहरणीयमेकधा ब्रह्मण उपहरतीति वचनात्· यु
गपदुपहृतमपि न तत्सर्वं चोदकप्राप्तं तत्तद्भक्षणकालाद्बाधेन यथाकालमेव भक्षणीयमिति निर्णीतं
दशमे कृत्स्नत्वपेटिकायां· तत्र च कार्त्स्न्येन प्राशित्रे ब्रह्मसंबंधस्य प्राप्तत्वात्कथं तत्र विधानमिति चेन्न· मा
भूदिडार्थं चतुर्धाकरणार्थं च विधानमुपपद्यत एव· तथा च परिहरणीयस्य सर्वकार्त्स्न्येन ब्रह्मसंबंधवि
धिः सार्वकाम्यविधिः स्वर्गइव प्राशित्रेऽनुवादो भविष्यति· तथाप्यव्याप्तिविषयो द्वयोस्सुदृढैव· एकस्या
मेवेडारूपहविःशेषव्यक्तौ चतुर्धाकरणार्थहविःशेषव्यक्तौ च प्राप्यप्राप्त्योर्मिलितत्वात्· एवं सत्यव्या॰
प्तिः समर्थिता॰ अतिव्याप्तिस्तु पूतिकादिनियमविधिषु· कथं यदि सोमं न विंदेत्पूतीकानभिषुणु
यादिति श्रूयते· अयं सोमालाभे सत्यभावे विधिरूपः पूतीकानां यागसाधनत्वविषयको पूर्वविधिर्न भ · ६६

© Dharmartha Trust J&K. Digitized by eGangotri

वन्ति · किंतु श्रुतिप्रमाणत्वान्नूशिष्टाभावेनागमोन्यस्याशिष्टत्वादित्यधिकरणोक्तन्यायेन नित्यस्य प्रार-
ब्धकाम्यस्य च सोमयागस्य सोमाभावेपि यथाशास्त्रं पूर्वमनुष्ठेयतया कर्मचोदनाश्रितत्वे यस्मिन्कस्मिंश्चि-
द्द्रव्ये ऽवश्यमुपादेयत्वे तत्रापि सामान्यं तच्चिकीर्षा हीत्यधिकरणोक्तन्यायेन सोमविधानस्य किंविदनुग्र-
हसिद्धये कतिपयसोमावयवानुप्रवेशवन्ति सोमसदृशद्रव्याण्युपादेयानि तेषु च सोमसदृशद्रव्येषु स-
त्सु नियमविधिरयं यः सोमलतायाअभावे सोमजातिप्रतिच्छिन्नसकलावयवानुपादातुमशक्तस्तत्सदृ-
शेषु स्थितान्नू विकल्पानुपादाय मभिषुणुतिस पूतीकागतानुपाददीतेति · एवं नियमविधिरिति निर्णीतं नि-
यमार्थः पुनः श्रुतिरिति तृतीयाध्यायाधिकरणे वचनाच्चान्याय्यत्वं भवेदिति षष्ठाध्यायाधिकरणे च अ-
यं च सोमलताया सुसदृशानामन्येषां सत्त्वात्तेषामेव च क्रयवानुग्रहानुरोधेन प्रतिनिधित्वयाप्राप्तौ
पक्षे सोमसदृशानां पूतीकानां तत्प्रतिकोटिकतया पाक्षिकप्राप्तिरहितानामेव विधिः । अत एवोक्तं शा-
स्त्रदीपिकायां मुख्याभावे प्रतिनिधेः प्राप्तिस्तस्यां चावस्थायां न्यायेन स्वतःसदृशं नियन्तुमुपक्रम्यते ता-
वद्वचनेन मंदसदृशाः पूतीका नियम्यन्ते ऽतः प्रतिनिधिनियमोयमिति · एवं पूतीकानामप्राप्तेः प्राप्तिक

© Dharmartha Trust J&K. Digitized by eGangotri

67

रं बिनत्वाभावादतिव्याप्तिः। तथा वायव्यपशौ ऽभ्यूयते हिरण्यगर्भः समवर्त्तताग्र इत्याघारमाघारयतीति। अ
यं प्राजापत्ये पूर्वाघारे मंत्रे विधिर्न भवति। किं तैं इत्युत्तराघार इति निर्णीतं दर्शे हिरण्यगर्भे पूर्वस्य मंत्रलिं
गादुत्तरस्य वा मंत्रार्थत्वादिति पूर्वोत्तरपक्षसूत्राभ्यां। तत्रापंसिद्धांतन्याउक्तः। मंत्रविधौ मंत्रजन्यनि
यमादृष्टमपेक्षणीयं। अन्यथा ब्राह्मणकल्पसूत्रोपदेशवचनादिभिरेव्यनुष्ठेयपदार्थस्मरणसंभ
वे मंत्रनियमवैयर्थ्यात्। तत्तु नियमादृष्टं पूर्वाघारे न क्लृप्तं तत्र तस्या मंत्रस्यैकत्वादिति पूर्वाघारे मंत्र
विधिपक्षे ऽत्रैव तत्कल्पनीयमुत्तराघारे तु तत् क्लृप्तं। तस्य प्रकृतावपि समंत्रकत्वात्। अतः क्लृप्ते
नियमादृष्टे मंत्रविशेषमात्रविधानं लघ्विति कृत्वोत्तराघार एव मंत्रविधिर्युक्त इति। उक्तं चतुर्थीकायां।
मंत्रनियमादृष्टमदृष्टं कल्पनीयं पूर्वाघारे। तत्तु क्लृप्तमुत्तराघारे तस्मिन्सति कल्पयितुं शक्य
इति। एवं चात्र नियमविधित्वेनांगीकृते आघारमंत्रांतरविधौ बोद्धकादिं इडुध्वेध्विर इति प्राकृ
तमंत्रस्यैव प्राप्तिरस्तीति न विधेयमंत्रस्य तत्राप्यतिव्याप्तिः। न च विकृतौ मंत्रांतरविधानसमये प्राप्त्य
भावेपि प्रकृताविड उध्वेध्विर इति मंत्रविधानसमये सर्वेषामुपायोलरणां पक्षे प्राप्तिरस्ति सैवार्थ ६७

© Dharmartha Trust J&K. Digitized by eGangotri

तोविकृतावपिप्रजापतिलिंगकस्यास्यप्राप्त्यभावात्‌· नवलिंगमिंद्रप्यविशिष्टमितिभाष्येसमर्थितमि
तिवाच्यं· तत्रहिविहितविनियोगनिर्वाहायैंद्रकथंचिन्मंत्रंयोजयितुंतस्मिन्नपिस्पष्टेः प्रागेक
लेनावरुद्धानंमंत्रांतरंवर्णितमस्तीत्येतावदुदाहृतं ननुहिरण्यगर्भश्चवृस्युत त्रस्वारसिकं लिंगंस
मर्थितं· नवा तत्समर्थनंकर्त्तुंशक्यं तस्यप्रजापप्रजापतावेवरूढत्वात्‌· प्रजापतिर्वैहिरण्यगर्भः
प्रजापतेरनुरूपत्वायेति· वाक्यशेषाच्च· हिरण्यगर्भेपूर्वस्यमंत्रालिंगादितिसूत्रकृतापिप्रजापतावे
वलिंगसद्भावस्योक्तत्वात्‌च· अथेवमन्यत्रापिनियमविधिरेतिव्याप्तिरूहनीया· इयंचाव्याप्तिरति
व्याप्तिश्चप्राचीनैश्चव्यात्संतिकनिर्वचनपक्षेषुसमाना· तस्मादप्राप्त्यांशेतिकेवलयोरनिर्वचनादयु
६४ क्तमपूर्वविधिलक्षणं॥ इतिश्रीमत्कृतविद्याचार्यश्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमद्विश्व
जिद्याजिश्रीरंगराजाध्वरिवरसूनोरप्पय्यदीक्षितस्यकृतौविधिरसायनस्सुखबोधिन्यामपूर्ववि
धिलक्षणाक्षेपः॥ ॥अथनियमविधिलक्षणमाक्षिपति· ननु· कुत्रापिकार्येकचनतदुभयं कुत्र
चिद्विधिषुपात्तंविध्यस्पृष्टं नियम्यं क्वचित्तदुभयविधं पाक्षिकत्वेनदृष्टं· तस्यैवप्रत्यनीकं क्वचिदपि

© Dharmartha Trust J&K. Digitized by eGangotri

स

कुर्वित्याक्षिकं नैव दृष्टं नानारूपं तदित्थं नियमविधिगतं कुर्यदं लक्षणेन ॥ २६ नानाप्रकारस्तावन्नियमवि-
धिर्दृश्यते सर्वत्रापि नियमः पाक्षिके सति त्वनेन लक्षणेन संग्रहीतुं न शक्यः । तथाहि क्वचिदेकस्मिन्कार्ये
नियतानेकोपायप्राप्तावेकोपायनियमो यथा व्रीहीनवहन्तीति · क्वचिदेकस्योपायस्यानियतानेककार्य
नियमो यथा यद्योन्यां तदुत्तरयोर्गायतीति · इदं नवमश्लोके वार्तिकायामुपपादितं क्वचिदुभयनियमो
यथा यजुर्ग्रहाणां गृह्णाति सर्वयाजेभ्यस्त्वदिति · इदमपि तत्रैवोपपादितं · ननु तत्रोक्तरीत्याय द्योन्यामित्यत्रा
प्युभयनियमो लभ्यते · कथं कार्यमात्रनियमेनोदाहरणं यथाहि स्तोत्रांगत्वेनावगतस्य साम्नस्त-
त्संगानिर्वाहाय तत्संस्कार्यत्वेनानियतानेकर्क्प्राप्तावुत्तरयोर्नियमार्थस्तोत्रांगत्वेनावगतयो
रुत्तरयोर्ऋचोः संस्कारकत्वेनानियतानेकसामप्राप्तौ योनिसाम्नो नियम इत्युभयनियमो भवति · स्तोत्रस्य प्र
गीतमन्त्रसाध्यस्तुतिरूपत्वेन सामापेक्षावश्यंभावात्त्र्लिचेत् सत्यं · यत्र साम्न इव ऋचामपि स्तोत्रांगत्वं प्र
करणपाठादिनावगतं तत्र तथैव · यत्र तु विकृतिविशेषे ऋचां बृहद्व्यादिषु विधेः साममात्रस्य स्तोत्रांगत्वं
वगतेस्तत्प्रकरणपाठादिरहितानामपि तत्संस्कार्यत्वेन निःप्रकृतोवृहद्योनिवृद्धेश्यस्तोमे कण्वरथन्तरयोर्निवे ६८

© Dharmartha Trust J&K. Digitized by eGangotri

त्त्वसाम्नस्तोत्रांगत्वनिर्वहाद्यस्त्वयमपितदंगत्वमर्थाद्दाप्स्यतेतत्र तदुत्तयोः प्राकवचनात्स्तोत्रांगत्वं नास्ती
ति तन्निर्वाहायसंस्कार्यकृविशेषनियम इति केवलं कार्यनियम एव। अतोयद्योन्यांतदुत्तरयोर्ग्यमनी
तिअयंयोनिम मध्ये दस्कयोरुत्तरयोरपूर्वविधियोनिसमर्थं दस्कयोस्कक्रमप्रकरणावगतविनियोग
योः कार्यपाय इव यनियमविधिः सामविनियोगाक्षिप्तविनियोगयोः कार्यमात्रनियमविधिरितियु
क्तं कार्यनियमेपितदुदाहरणं। एवं वाजपेयेदक्षिणात्वेनदेयानां रथानां मध्ये इंद्रस्य वज्रोसिवार्त्र
घ्न इत्यादिर्याजुर्वैदिकमंत्रैः सज्जीकृतं रथमधिकृत्य प्रवृत्ते यजुर्युक्तं रथमध्वर्यवे ददातीति वाक्य
यावृष्टिकामाय [illegible] नाद्यकामाय स्वर्गकामः ससोभरेणस्तुवीतेति फलार्थत्वेन विहितं तत्र ससामस्तो
त्राश्रयं सौभरमधिकृत्य प्रवृत्तेषु हीषिति वृष्टिकामाय निधनं कुर्यादूर्गित्यन्नाद्यकामाय ऊ इति स्वर्गका
मायेति वाक्येषु वोभयनियमोऽद्रष्टव्यः। एषूदाहरणेषु समप्राधान्येनोभयनियतो नियमलाभः॥
उपजीव्योपजीवकभावेनापि ससंभवति यथा याजनाध्यापनप्रतिग्रहैर्ब्राह्मणोधनमर्जयेदित्यत्र या
जनादिषु कृष्यादिषु च धनार्जनोपायेषु नियमेन प्राप्तेषु ब्राह्मणस्य याजनादय एव तदुपायानि यम्यंते.

© Dharmartha Trust J&K. Digitized by eGangotri

तेन ब्राह्मणानामेव याजनादयस्तदुपायाद् इत्यतिनियमो लभ्यते॰ एतद्धि ध्यभावेहि यज्ञदानाध्ययनेनावि
धिर्याजकाध्यापकमनियमदीक्ष्माकांक्षेपाल्लिंग्याहिंसमर्थो क्केकचिद्यातकादयश्रोक्रियरन्तुः एतद्धि
धिसत्वेतस्यदृष्टियार्थधनार्जनोपायेषु नियाजनादिषु स्वतएव प्रवृत्तानां ब्राह्मणानां सत्वेननमंत्यनिगु
कांस्तन्मायत्किंचिदनियतयाजकाद्यासेपोनाबनरलि॰ एवं नात्विन्नियम्येत प्रति दंदिभिन्नविदिधवाक्येना
पातक्रविदुपायुनियमः क्वचित्कार्यनियमइतित्रैविध्यं दर्शितं॰ नियम्येतया तिसंबंधिनुभयास्विन्वाद
नुपात्तेपिसहयते॰ तद्यथा॰ पुरोडाशं प्रथयतीत्यत्रानुपात्ते नियम्यपुरोडाशसंबंधिनिमंचे नियमः॥ क्वचिद्वि
र्यजेनेत्यत्र नियम्यः वहूनने तन्मात्संबंधिषु पर्वेषु वानुपात्तेषु नियमः॥ एवमुपात्तमनुपात्तमितिद्विविध
मप्युदाहृतं नियम्यजातं पक्षप्राप्तिमदृष्टं॰ क्वचिन्नियम्यस्य पक्षप्राप्यभावेपि तत्स्तुति दृष्टिनांपस्यवाप्तिमा
त्रेण नियमोदृश्यते॰ यथा यदिसोमं नविंदेत्पूतीकानभिषुणुयादिति॰ अत्रदिसकस्य दर्शनादकूनाम
नियतत्वाचोमं देसदृष्टानांपूतीकानामप्राप्तावेव नियमः॥ क्वचिन्नियमविधिकिमपिपक्षप्राप्तं नदृ ६९

क्वचिन्नियम्यभागमः॥ दृष्टार्थाक्रियमाणस्यवानुपपत्ते

© Dharmartha Trust J&K. Digitized by eGangotri

69

श्रूयते यथा हिरण्यगर्भः समवर्त्तताग्र इत्याघारमाघारयतीति । तत्र नियमतत्स्त्रोदकाहिं इदुध्वेध्व इति मंत्रप्राप्तावैं-
द्रलिंगरहितत्वादृत्संततप्राप्तमेवमंत्रांतरमैंद्राघारे नियम्यते । एतान्युदाहरणानि प्राकृततन्त्रत्र आविष्कृतानीति
नेदृष्टप्रपञ्चितानि । एवं न्याय्यतो त्व्यापादिप्रवृत्तिशाखांछिनत्तिउत्करे वाजिनेमासा इत्यत्र परिधीपशुं नियुंजीते-
ति वाक्ये यद्यपि नियमविधिरंगीकरणीय इत्युक्तिन्यायपि पक्षप्राप्तिरहितो इदृक्तुतानि । यथा खलु हिरण्यगर्भमं-
त्रस्य प्रजापतिलिंगस्यैंद्राघारे स्वयमप्राप्तस्यैव नियोगानंतरं तन्निर्वाहाय कथंचिदिंद्रप्रकाशकत्वस्य क-
ल्पनीयत्वेपि इदृशार्थः तान्नियमाद् एकत्वता वक्ष्यंभावात्तन्नियमविधित्वमभ्युपगम्यते तथैवेतितिमंत्रस्य शा-
खाछेदने तीक्ष्णाग्रस्याकरस्य वाजिनासादने तत्रीयमः परिधेः पशुनियोजने च विनियोगानंतरं मे वतन्नि-
र्वाहाय मंत्रैर्छिनत्यध्याहारस्योत्करे पृथक्त्वस्य परिधौ प्रक्षिप्तप्राप्ततस्य पलेपिन्याय स्याभ्यानिनियम-
विधित्वमभ्युपगंतव्यमेव । इत्थं नानारूपाणि यमविधयः कथमनेन संगृहीतुं शक्याः पाक्षिके इतीतस्यकार्य-
पादुर्यपाक्षिकत्वपरत्वेनैकेक्ति नियमस्याप्तेः । कार्यस्येयपायस्यैववाप्याक्षिकत्वपक्षे तदन्यतरनियमाव्या-

© Dharmartha Trust J&K. Digitized by eGangotri

न्ते:। उपात्तमनुपात्तं वानुगमय्य नियम्यस्य पाक्षिकत्वप्रयुक्तो कोनियम्यप्रतिद्वंद्विनमेव पाक्षिकत्ववति निय
मविधौ अव्याप्तेर्नियम्यस्यान्यस्य वा यस्य विध्याक्षिप्तपाक्षिकत्वप्रयुक्तो कावपि पाक्षिकत्वमात्र दृष्टि तेषु नियमविधिषु व्या
प्तेरित्यर्थः। श्लोके तस्यैव प्रसन्नो कं क्वचिद्दर्पी यत्र पाक्षिकत्वेन दृष्टमित्यनुषंगः। ७६ एवं लक्षणस्याव्याप्ति
मुक्त्वातिव्याप्तिमाह· तच्चातिव्याप्तमग्नेर्विकृतिजुषि विधौ मीलनस्याग्रतायां नैमित्तिकप्राप्तविध्योरुरवि
70 लविधिषु व्यापकावर्त्तकेषु· अप्राप्तांशस्य पूर्त्तिः फलमपि यदि तत्राधिकं योजनीयं शेषांगव्यर्थता
स्यादखिलफलकताविध्यतिव्यापनं च·। ७७। यदि पाक्षिके सती यत्र विधिविषयस्य पाक्षिकत्वं विव
क्षितं तदा वैकृताग्निविधावतिव्याप्तिः। तद्विषयस्याग्नेरुत्तरवेद्यादिकल्पितस्य पाक्षिकत्वात्· यदि विध्यु
द्देश्यस्य तदा रथंतरे प्रस्तूयमाने संमीलयेदिति विधावतिव्याप्तिः। तदुद्देश्यरथंतरस्य ज्योतिष्टोमे पाक्षिकत्वात्·
यद्युभयोस्तदा यदि रथंतरसामा सोमः स्यादैंद्रवायवाग्रान् ग्रहान् गृह्णीयादिति प्रागुदाहृतपरिसंख्यायाम
तिव्याप्तिः। तत्रोद्देश्यरथंतरसामत्वस्य तन्निमित्तकस्य विधेयस्यैंद्रवायवाग्रत्वस्य च प्रकृतौ पाक्षिकत्वा ७०

© Dharmartha Trust J&K. Digitized by eGangotri

त्तु: यद्दिविधेयोद्देश्यसाधारण्येन विध्युपात्तस्य पाक्षिकत्वं विवक्षितं तदोदाहृते पुत्रि ष्वपि विधिघ्वतिव्याप्तिः।
यद्दिविध्युपात्तस्येतदनुपात्तसाधारण्येन नियम्यपाक्षिकत्वं विवक्षितं तदा नियमविधिलक्षणे नियमप्रवे
शे आत्माश्रयापत्तिः। यद्दि नियम्यांशं केवलप्रकृतविधिफलाश्रयमात्रं विवक्षणीयं तथा सत्युदाहृते नैमि
त्तिकाग्नितावि धावतिव्याप्तिः। तत्र विकृतिविशेषव्यावृत्तिफलाश्रयस्यैन्द्रवायवाग्रत्वस्य पाक्षिकत्वा
त्तुः यद्दि नियम्यानियम्यसाधारण्येन यस्य कस्यचित्पाक्षिकत्वं विवक्षितं तदा सर्वेषु पूर्वविधिपरिसंख्या य ५
विधिष्वतिव्याप्तिः। स्यादेतदयस्य कस्यचित्पाक्षिकत्वे सति तदप्राप्तांशपूरणफलको नियमविधिरिति ल
क्षणं योज्यते तथा सति न काप्यतिव्याप्तिरिति चेदेवं तर्हि लक्षणेऽप्रकृतांशोऽव्यर्थः स्यादप्राप्तांशपूरणफ मां ४
लो नियमविधिरित्येतावतैव विशिष्टलक्षणसंभवदत्वात्तु। न चैवमेवास्त्विति वाच्यं। सर्वेभ्यो ज्योति
ष्टोम इति सर्वफलकत्वविधावतिव्याप्तेः। तस्य तदप्राप्तफलांतरांशपूरणार्थत्वादित्यर्थः। ७। स्यादेत
दप्राप्तांशपूरणफलको नियमविधिरिति लक्षणे प्राप्तत्वविरोध्याक्रमणप्रयुक्तं विवक्षितं मतो ना

प्रातिस्विककार्यत्वार्थ...
© Dharmartha Trust J&K. Digitized by eGangotri

क्तातिव्याप्तिः। सार्वकाम्यविधौ स्वर्गान्यफलाप्राप्तेः प्रापकप्रमाणाभावप्रयुक्तत्वेन विरोध्याक्रमणप्रयुक्त
त्वाभावात्। न चासंभवः। नियमविध्युदाहरणे प्रवहननादिप्रापकलौकिकप्रमाणादिसत्त्वेपि तदप्राप्ते
र्विदलनादिविरोध्याक्रमणप्रयुक्तत्वात्। पक्षे प्राप्तानिर्धारितत्वमप्राप्तांशस्य विशेषणं क्रियते तथा च सा
र्वकाम्यविधौ स्वर्गांशः प्राप्तस्तदन्यफलांशस्तु प्राप्त इति निर्धारणासत्त्वान्नातिव्याप्तिर्नाप्य
71 संभवो व्रीह्यादिष्ववहननाद्यप्राप्तांशस्येदं तया निर्धारणाभावादित्याशयं क्वाह अप्राप्तत्वं विरोध्या
क्रमणकृतमिहापेक्ष्यते यद्यथाविस्याद्दोषायं द्विपक्षः पद्दहद्दुतिविधावप्ययं निर्विरोधः। अप्रा
प्तांशो विशेषणं क्रियत इति मतं यद्यनिर्धारितत्वं श्यावाश्वब्राह्मणोक्तिप्रभृतिविधिगणातिप्रस
क्तिस्तथापि ॰१८ प्रथमविवक्षायां कृतायामप्युज्जायितसार्वकाम्यविध्यतिव्याप्तिदोषस्तदवस्थ
एव विश्वजिदधिकरणपूर्वपक्षन्यायफलानामपि प्रापकप्रमाणस्य सत्त्वेन तदप्राप्तेस्तन्न्या
यापवादकस्वर्गकामविधिप्रापितविरोध्याक्रमणप्रयुक्तत्वात्। नन्वप्राप्तिकरंबितविरोध्या ७१

© Dharmartha Trust J&K. Digitized by eGangotri

क्रमणप्रयुक्तत्वं विवक्षितमस्ति व्रीह्यादिष्ववहननाद्यप्राप्तावाक्षेपकृताप्राप्तिकरं बितविदलनादिरूप
विरोध्याक्रमणप्रयुक्तत्वं । एवं तु सार्वकाम्यविधावतिव्याप्तिस्तदभावे स्वर्गान्यफलाप्राप्तेः। स्वर्गकामवा
क्यकृतनियमप्राप्तिकस्वर्गरूपविरोध्याक्रमणप्रयुक्तत्वादिति चेन्न । एवमपि पृष्ठ्यः षडहो बृहद्रथंत
रसामकार्य इति पृष्ठ्यषडहोद्देशेन बृहद्रथंतरपक्षविधावतिव्याप्तिरनिवार्या षडहाङ्गेषु तृतीयादि
दिवसेषु बृहद्रथंतराप्राप्तेरप्राप्तिकरं बितप्राप्तिकवैरूपवैराजादिरूपविरोध्याक्रमणप्रयुक्तत्वात् ।
द्वितीयविवक्षायां यद्यपि नोक्तातिव्याप्तिर्बृहद्रथंतरयोः प्राप्तां शक्तृतीयसुत्यादिरूपद्वितिनिर्धारणासं
भवात्तथाप्यश्वः श्यावो दक्षिणेत्युपहव्यदक्षिणां विधाय श्रुते सब्रह्मणे देय इति विधौ ओदुंबरः सोम
चमसो दक्षिणेति कृतपेयदक्षिणां विधाय श्रुते सप्रियाय सगोत्राय ब्रह्मणे देय इति विरोधौ आयुः
कामेष्टिप्रकरणे श्रुते सर्वं ब्रह्मणे परिहरतीति विधौ चातिव्याप्तिः। सर्वर्त्विक्साधारणेष्वप्यस्य सोम
चमसस्य हविःशेषस्य च ब्रह्मणो ऽन्येषामिति निर्धारणासंभवात् । तस्मादव्याप्त्यतिव्याप्तिग्रस्तत्वा

© Dharmartha Trust J&K. Digitized by eGangotri

नियमविधिलक्षणमपि न युक्तमिति भावः ॥१८ इति नियमविधिलक्षणाक्षेपः ॥ ॥ परिसंख्यालक्षण
माक्षिपति । तत्र चान्यत्र चेति राशिद्वितयमभिहितं लक्षणं परिसंख्यैषा प्रयासस्तत्र लक्ष्योपगतमनुगतं
भिन्नधर्मोपगूढं । पाठप्राप्ताग्रतता विध्यनुगतिः हि तं विध्युपात्तानुपात्तं ग्राह्यं प्रावर्तनीयं तदपि वन
भजसावपंतीति लक्ष्यं ॥१९ तत्र चान्यत्र च प्राप्ताविति परिसंख्यालक्षणमित्थं खलु लक्ष्येषु योज्य
ते । इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त इति लक्ष्ये तत्राश्वरशनाग्रहणेऽन्यत्र गर्द
भरशनाग्रहणे च विशेषिण्येकस्मिन्मंत्ररूपे विशेषे मंत्रलिंगाविशेषात् प्राप्ते सति गर्दभरशनाग्र
72 हणरूपविशेष्ये तत्र परिसंख्या । दंडी प्रैषानन्वाहेति लक्ष्ये तत्र प्रैषानुवचनेऽन्यत्र रात्रिप्रचारादि
के वसिष्ठो होत्रे नवानकरुणायत मोवगाहनादिसोकर्यायचकिंचिदालंबनाक्षेपे मैत्रावरु
ण कार्यविशेषिणि मैत्रावरुणागृहीतदीक्षितदंडरूप एकस्मिन् विशेषे प्राप्ते रात्रिप्रचारादिविशेष्ये तत्र
परिसंख्या । शृंखंता प्रापणीया संतिष्ठते इति लक्ष्ये प्रापणीयायामेकस्यां विशेषिण्यां शयुं तांगक ७२

© Dharmartha Trust J&K. Digitized by eGangotri

लापरूपे तदुपरितनांगकलापरूपे वशेषे प्राप्ते तदुपरितनांगकलापरूपशेषांतरपरिसंख्या॰ ए
वमिडांतातिथ्यासंततिष्ठतइतिआदावपीति॰ एवं चाभ्यग्रहणानाग्रहणेप्रेषानुवचनशब्दितांगकला
पादिकमेकराशिं गर्दभरशनाग्रहणरात्रिप्रचारशब्दितोपरितनांगकलापादिकमपरराशिं
वकृत्वातद्राशिद्वयं लक्षणयातानाभ्यां तदन्यशब्दाभ्यामभिधातव्यं॰ समभिव्याहृतपदस्यापिस
र्वनाम्नस्तेनरूपेणानुगतत्वेनतत्प्रकरणज्ञाने प्रमेसादृश्यविवक्षितविद्रूपकोटीकृतराश्यंतर्गतपरत्वावश्यं
भावात्॰ अन्यथातस्यतत्रव्यवस्थितार्थबोधकत्वानुपपत्तेः। तंतुराशिद्वयंलक्ष्यप्राप्तंसर्वलक्ष्यानुगतं
परस्परव्यावृत्तधर्मावच्छिन्नं नपश्यामः। अथोच्यतेविधृपात्तमश्वरशनादितच्छब्देनाभिधीयतेतद
नुपात्तंगर्दभरशनाद्यन्यशब्देनेति॰ नैतद्युक्तं॰ यदिरथंतरंसामासोमःस्यादैंद्रवायवाग्रान्ग्रहानगृ
ह्णीयादितिपरिसंख्यायामभिव्याप्तिप्रसंगात्॰ रथंतरसामस्वरथंतरसामकज्योतिष्टोमविकृतिपु
चादैकाहैंद्रवायवाग्रतायांशेषतयाप्रसक्तायामरथंतरसाम्नांपरिसंख्यार्थं॰ ज्योतिष्टोमेपाठप्रा

© Dharmartha Trust J&K. Digitized by eGangotri

मायास्तस्यानैमित्तिकत्वकरणमितिहि प्रागुक्तं॰ एवंदीक्षा॰ सोमस्यदक्षिणाः सोमस्येत्यादि परिसंख्या
स्वव्यवाप्तिर्द्रष्टव्या॰ ननु माभूद्विधुपात्तं तदनुपात्तमितिराशिद्वयंग्राह्यव्यावर्त्तनीयमितिराशिद्वयं
तदन्यपशुकृताभिधेयं भविष्यति॰ एतदपिनयुक्तं॰ त्रीणिदैवेयज्ञस्योदराणिगायत्रीबृहत्यनुष्टुप्॰ अत्र
73 स्त्वेवावपंतिअत एवोद्वपंतीति परिसंख्यायामव्याप्तिप्रसंगात्॰ अत्रदिविवृद्धस्तोमक्रतुगतेषु सर्व
का ५ षपिस्तोत्रेषुस्तोमविवृध्यर्थेप्राकृतेभ्योधिकैर्वापप्राप्तेः त्र्यृचेवावपंतीत्यनेन पवमानगतगायत्र्या
दिभ्योन्यत्सर्वं परिसंख्यायतइतिसर्वं प्रागुक्तं॰ अत्रपरिसंख्यायांमावापस्यव्यावर्तनीयेषुस्तोत्रां
तरेष्वेवप्राप्तिरस्तिनतुग्राह्येषुपवमानगतगायत्र्यादिषु॰ यद्यपिस्तोत्रांतरेष्विवपवमानेष्वपि
स्तोमविवृध्यर्थमावापप्राप्तिरस्ति तथापि न सा मांतराणामावापप्राप्तिः किंतु सामस्वाहितानां
मृगंतराणामिव स्तोत्रीयर्क्गतसंख्याधिक्यरूपस्तोमविवृद्धेऋगंतरावापएवातिसामंजस्या
त्॰ येषुतुविवृद्धस्तोमकेषुक्रतुषुप्रत्यक्षविहितानिसामानिसंतितेष्वपितानिकुएवरथंतरन्यायेनस्व ७३

© Dharmartha Trust J&K. Digitized by eGangotri

योनेरस्य योन्युत्तरयोश्चर्गे यानि प्राप्नुवंति न प्राकृतीषु कृत्स्नमुत्तराग्रंथे तत्तद्योनेस्तदुत्तरयोश्च पाठ
स्य कृत्वर्थत्वयाताभिरतिदेशप्राप्तप्राकृतत्वर्ग्बाधानात् । अतस्तेष्वपि तत्तत्साम सहितानामृगंतरा
णामेव प्राप्तिः । एवं च गायत्र्यादिषु प्राप्तिर्नशंक्यैवं का० कृत्वामृगं तरेषां वा पा संभवात् ॥ येषां प्र
त्यक्षविहितानां चैकृतसाम्नामुत्तराग्रंथे योनिर्न पठिता अत एव तदुत्तरे अपि न सन्ति तेषामावाप
स्य प्राकृतत्वर्श्चैविप्राप्तावपि न गायत्र्यादिषु प्राप्तिः किं तर्हि स्वत्व एव ऋगंतूनामंते निवेश इति न्यायस्यां
ते तु बादरायण इति पंचमाध्याय सूत्रेण दर्शितत्वात् ॥ ततस्मात्रस्यैवावपंतीत्येवकारेणाक्षलित्व
लात्पवमानगतगायत्र्यादिभ्योन्यत्र सर्वत्राप्यावापं परिसंचक्षाणेनस्तोत्राणां पवमानगतांस
त्वानां निवृत्तोस्य सामर्थ्याद्वावापः पवमानगतगायत्र्यादिष्वेव व्यवतिष्ठते । स च गायत्र्याद्याधा
रत्वसामर्थ्यात्साम्नामेव न त्वृक्ष्वपि व्यवतिष्ठते । न च गायत्र्यादिभ्योऽन्यत्रावापपरिसंख्यानेपि गा
यत्र्यादिष्वावापाविधाने तास्वावापो न प्राप्नोति स्तोत्रांतरेष्वावश्यकेनाभ्यासेन संख्यापूरणसंभ

© Dharmartha Trust J&K. Digitized by eGangotri

वात्। ० ततश्च गायत्र्यादिच्छापमित्युक्तात् द्विधानार्थमिवेदं वाक्यं न तु स्तोत्रान्तरपरिसंख्यार्थमिति संगीक-
रणीयं ० एकस्य वाक्यस्योभयत्र व्यापारायोगादिति वाच्यं ० एवकारोपहृतविधिशक्तिकस्यास्य प-
रिसंख्यापरत्वावश्यंभावात् ० स्तोत्रान्तराणामगभ्यासेनैव संख्यापूरणेपि पृथक्कनिवेशिन्याः सं-
ख्यायाः संभवत्त्वात् मंत्रस्यापरिसागायत्र्यायप्राप्तस्य क्वचित्क्वचिद्द्वात्रिंशत्त्वमानेनाभिषेचनी-
यदृत्यादौ प्रत्यक्षविहितराज्ञसामाद्यपेक्षितस्यावापस्यार्थज्ञाय त्र्यादिषु अप्रवृत्तेः सिद्धेः। तत-
श्चात्र परिसंख्यैव वाक्यार्थः। इयांस्तु विशेषः। इमामगृभ्णन्नित्यादिपरिसंख्या मश्वरश-
नाग्रहणे मंत्रस्य प्राप्तिः श्रौती ० अर्थगिर्दभरशनाग्रहणपरिसंख्या ० इदन्त्वेवकारश्रवणा-
द्वावापेक्षागृहीगायत्र्याद्यतिरिक्तपरिसंख्या आर्थी तस्य गायत्र्यादिषु प्राप्तिस्तत्सामर्थ्याद्वि-
तस्य क्वचिद्विषयत्वं परिहाप्य सामविषयत्व प्राप्तिः। एवं चावस्तोत्रान्तरपवमानगतां स्तत्र वेषुव्या-
पन्नेनीयेषु इवग्रास्येषु गायत्र्यादिच्छेवत द्वाक्योपजीवनमंतरेणावापस्य प्राप्त्यभावाद्वाक्या ७४

© Dharmartha Trust J&K. Digitized by eGangotri

प्तिरनिवार्या॰ इयं चाव्याप्तिर्विधिरूपातानुपातं गाशिद्वयमिति पक्षे तत्र चान्यत्र चेति पदद्वयस्वारस्या
नुरोधेन राशिद्वयकरणं परित्यज्य द्वयोः समुच्चित्य प्राप्तिभावे तत्र चान्यत्र च प्राप्तद्वत्वेन विवक्षितमि
तिपक्षं तु परिग्रहे चाविशिष्टैव॰ तदेवमत्र ह्येवावपंतीति परिसंख्यायां लक्षणस्याव्याप्तिः स्थिता॰१९
अथान्यत्राव्याप्तिं तत्परिहारार्थं विवक्षान्तरसंक्रामति व्याप्तिं च दर्शयति॰ प्राप्तिः शेषिद्वये वेदिह
विवादिषितांशे षमुञ्जमेकं सा स्याद्व्याप्तिस्त्वाश्रयादिद्वितयजुषिभवे छेषशेषिलतश्चेत्॰ यत्किंचिद्यो
गलभ्ये द्वकुषद्वग्रहणलोकप्यादिविधयाक्रमः स्यात्सर्वत्र ब्राह्मणेगन्ति प्रमुखविधिषु चातिप्रसक्तिः
समाना॰२० यदि तत्र चान्यत्र च प्राप्त इत्यनेन शेषिद्वये एकस्य शेषस्य प्राप्तिर्विवक्षिता तदानी
मेकस्मिन्शेषिणि शेषद्वयप्राप्तौ यापरिसंख्या शाखिषु तेत्तरांगकलापादिविषया तस्यां लक्षणं न
स्यात्॰ यदि त्वेकस्मिन् शेषिणि शेषद्वयप्राप्तिर्विवक्षिता तदा शेषिद्वये एकस्य शेषस्य प्राप्तौ यापरि
संख्या गर्दभरशनाग्रहणादिविषया तस्यां लक्षणं न स्यात्॰ यद्युच्येत भयसंग्रहाय शेषशेषि

© Dharmartha Trust J&K. Digitized by eGangotri

भावसंबंधेनप्राप्तिर्विवक्षितेतितथापितदुभयसंबंधाविवक्षायांगर्दभरशनाग्रहणादिपरिसं
ख्यायामेवलक्षणमव्याप्तंस्याद्वैय्य॰धिकरण्येनान्वयविवक्षायांशंखिडोत्तरंगकलापादिप
रिसंख्यायामेवलक्ष्यातुः॰ प्राप्तिर्हिशेषिणिशेषस्यभवतियतेनतुशेषेशेषिणः।अतएवन्या
यसुधायांतत्रवान्यत्रचप्राप्तत्युत्यस्यशेषांतरपरिसंख्यायांसामानाधिकरण्येनशेष्यंतरप
75 रिसंख्यायांवैय्यधिकरण्येनचयोजनादर्शिता॰एवंयोजनयाहिलक्षणस्यशेषशेषिपरिसं
ख्ययोरननुगमएवस्थापितः।अथाननुगमनपरिहाययसामानाधिकरण्यवैय्यधिकरण्य
योरेकएवपक्षआश्रीयतेनचैवंसतिसामानाधिकरण्यपक्षेशेष्यंतरपरिसंख्यायांवैय्यधिक
रण्यपक्षेशेषांतरपरिसंख्यायांवाव्याप्तिः।नहिप्राप्तिःशेषस्यैवेतिनियमःशेषस्यकिंचिच्छे
षसंबंधित्वेनावगतेरिवशेषिणोपिकिंचिच्छेषसंबंधित्वेनावगतेःप्राप्तिरितिव्यपदेष्टुंशक्यत्वा
तुः॰ तथाचसामानाधिकरण्यपक्षेऽश्वगर्दभरशनाग्रहणयोःशेषशेषिभावेनमंत्रसंबंधित ७५

© Dharmartha Trust J&K. Digitized by eGangotri

याप्राप्तिरविकल्प। वैयधिकरण्यपक्षेपि गृहमेधीयस्य शेषशेषिभावेनाज्यभागतदितरांग
कल्पासंबंधितया प्राप्तिरविकलेति पक्षद्वयेपि न क्षाम्यतीति व्याप्तिरिति चेन्न। अस्कन्नामात्रेवम
व्याप्तिपरिहारस्तथाप्याश्रयांतरनिमित्तांतरपरिसंख्ययोरप्राप्तिः स्यात्। आश्रयाश्रयिणोर्नि
मित्तनिमित्तिनोश्च शेषशेषिभावात्। दर्शितं च नवमश्लोकावतारिकायां वाग्वा एषा यदैंद्रवाय
वायदैंद्रवायवाग्रान्गृह्णातीति विधेराश्रयांतरपरिसंख्यार्थत्वं सायं जुहोति प्रातर्जुहोतीति
विध्योर्निमित्तांतरपरिसंख्यार्थत्वं न। माभूत्तर्हि शेषशेषिभावेनेति विवक्षा प्रयोजनाभावाद्व्या
प्त्यावृत्त्या शेषशेषिभावेनाश्रयाश्रयिभावेन निमित्तनिमित्तिभावेनान्येन वा येन केनचित्संबंधेन त
त्रचान्यत्र प्राप्तस्येतावदेवलक्षणमस्त्विति चेन्न। एवं सति षडुहा भवंति चत्वारो भवंति सातोक्थ्यं भवति
शतान्निष्टोमं भवति सर्वस्तोत्रं भवति सर्वः पंचदशेत्यादिविधिष्वपि व्याप्तिः स्यात्। नन्वेकत्वसमुच्चित्य
प्राप्तिरिह विवक्षिता न चोदाहृतस्थलेषु साप्ति। षड्विधाद्यात्रेत्यादितः षट्त्वस्य षडुहधर्मजातस्यचो

© Dharmartha Trust J&K. Digitized by eGangotri

76

दकाद्याप्तिस्तत्तदनुपूर्वछंदोमधर्मजातस्य॰ नन्वेकत्रोभयोः समुच्चित्यप्राप्तिरस्ति तथाशतोक्थ्ये शताग्नि
ष्टोमे वाद्ये ऽहनि अग्निष्टोमसंस्था या द्वितीयतृतीययोरुक्थ्यसंस्था या इत्येवं प्रकारेण चोदकाद्भिन्न
विषया प्राप्तिः। एवमेकक्रतुषु बहिष्पवमाने त्रिवृत्स्तोमस्याज्येषु माध्यंदिनपवमाने पंचदश
स्तोमस्येति एवंरूपेण चोदकाद्भिन्नविषयैव प्राप्तिरतो न काप्यतिव्याप्तिरिति चेत्॰ न॰ षडहधर्मोक्थ्या
दिसंस्था त्रिवृदादिस्तोमशेषिणामहस्तोत्राणां भेदस्सत्वेप्येकैकस्मिन् षट्त्रिंशद्द्वात्रिंशतोक्थ्यशताग्ना दू. २
ग्निष्टोमे फस्तोमकक्रतुप्रयोगाणामभिन्नत्वेनैकैकस्मिन्क्रतुप्रयोगे षडहछंदोमधर्मादीनां
समुच्चित्य प्राप्तिसत्वान्नेषामहरादिशेषत्वेपि प्रयोगेणापि सहतदंतर्गतत्वलक्षणसंबंधसत्वाच्छे
षशेषिभावसंबंधविशेषस्य वाविवक्षितत्वात्॰ अपि च शेषत्वादिविषयासु सर्वास्वपि विवक्षाकस्य
र्वं ब्राह्मणे परिहरति स ब्राह्मणेदेयुः सप्रियायुस्सगोत्राय ब्राह्मणेदेय इति विधिष्वति व्याप्तिः सम्मा ७६
ना॰ ब्राह्मणस्तदतिरिक्तं ऋत्विग्वर्गस्य चैकस्मिन्हविः शेषभक्षयाचाभ्येहविशेषे सोमचमसेच प्राप्ति

© Dharmartha Trust J&K. Digitized by eGangotri

सत्वात्. एवमग्निषुत्याग्नेयाग्रहाभवंतीति विधौ वाप्ति व्याप्तिः। तस्याग्निषुतौ द्वाख्याद्यनेकदेवता
प्राप्ता वग्निविधानार्थत्वात्. तस्मादृति व्याप्तत्वादपि नेदं लक्षणं युक्तमिति भावः। २० आप्तविषये यद्वि
वपक्षप्राप्तविषयेष्वपि विधिष्विति व्याप्तिरस्तीत्याह. तत्रान्यत्रापि वाप्तिर्नियमविधिषु वास्तीत्यति
व्याप्तिरेव नित्यप्राप्तिर्विवक्ष्यान खलु विरहतः कूर्मकीशगादिभक्षे. नित्यानित्यापि चास्मिन्कथमपिव
समुच्छित्य वेत्ताप्तिरिष्टापत्ती यागांतता यानियमकृति विधौ सा तथाप्यप्रणोद्या.। २१। अवहनना
दिविधयोप्यवहननविदलनादिषु पक्षप्राप्तेषु प्रवर्तंत इति तेष्विति व्याप्तिः स्पष्टे. व. ननु तत्र वा
न्यत्र च प्राप्त इत्यत्र नित्यप्राप्तत्वं विवक्षितमिति वेन्नैवं विवक्षितुं शक्यते. पंच पंच नखा भक्ष्या इति
प्रसिद्ध परिसंख्यासंख्यासंग्रहाभावप्रसंगात्. नहि कूर्मशशशल्यकश्वाविद्गोधानां वा नरस्य गालन
दानां च भक्षणं पुरुषे नित्यप्राप्तं तेषां भक्षणेन वकदाचित्तद्दुर्जनेनापि पुरुषस्येप्सितसंभवे न तद्दुर्ज
नस्यापि क्वचिद्रागतः प्राप्तिसत्वात्. ननु तर्हि नित्यानित्यत्वानादरेण समुच्छित्तप्राप्तिरत्र विवक्ष्य

© Dharmartha Trust J&K. Digitized by eGangotri

तेन तथा सति न नियमविधिष्वतिव्याप्तिरवहननविदलनादीनां परस्परप्रतिक्षेपकत्वेन समुच्चित्यप्रा
प्त्यसंभवात् ॥ ० नाप्युदाहृतपरिसंख्यायामव्याप्तिः कूर्मादिवानरादिभक्ष्ययोः परस्परप्रतिक्षेपक
त्वाभावेन समुच्चित्यप्राप्तिसंभवादिति चेन्न ॥ ० एवमपि पत्नीसंयाजांतान्यहानि संतिष्ठंत इति नि
यमविधावतिव्याप्तिः ॥ इदमिह वाक्यं श चिरंतनवाक्यरीत्या द्वादशाहिकानामह्नां पत्नीसंयाजांत
त्वविधाने तदुत्तरांगकलापपरिसंख्यार्थं नु भवति किंतु द्वादशाहेन प्रजाकामं याजयेदित्यहःश
ब्दोदितानां द्वादशानां यागानां प्रजाकामार्थं न चोदितानामेकफलकत्वेन प्रयोगैक्ये सति तान्नि
वहाय पूर्वमहः क्वचित्पदार्थेष्ववस्थाप्य परं परमुपक्रमितव्यमित्यनियमेन पत्नीसंयाजरूपेण
प्राचीने तदुपरितने वा क्वचिदंगेऽवस्थाने प्राप्ते पत्नीसंयाजेष्ववस्थापननियमार्थमित्युपपा
दितं नवमे पत्नीसंयाजांतत्वं सर्वेषामविशेषादित्यधिकरणे । ततश्च पत्नीसंयाजांतानां तदुपरि ११
तनानां वांगानां कदाचित्समुच्चित्यप्राप्तिरप्यस्तीति अतिव्याप्तिरनिवार्या । एवं यज्ञुरंगाक्लाति

प्रयाजेभ्यस्तदिति नियमविधावव्याप्तिव्याप्तिर्दृष्टव्या। उपपादितं च न्यायोदधावाज्ये प्रयाजानामन्ये
षां च कदाचित्समुच्चित्य प्राप्तिसत्वमथापि नियमविधित्वं न च मम श्लोकावतारिकायां॥२९॥ स्या
देतत्तत्र वान्यत्र च प्राप्ते तदन्यतरनिवृत्तिफलको विधिः परिसंख्येति फलमप्यधिकं लक्षणे यो
जयिष्यामस्तथा चोदाहृतेषु प्राप्तविषयेषु न तु पशुहननादिविधिषु न तत्प्राप्तेरेव फलत्वेन पक्षप्राप्तविषये
षु वहननादिविधिषु तत्र नियमनस्यैव फलत्वेन निवृत्तेरानुषंगिकत्वान्नातिव्याप्तिरित्याशंक्याह। यो
ज्यस्तत्रैव बाधः फलमपि यदि तदर्थ एवावशिष्टस्तस्याप्युक्तानिषेधात्मकविधिनियमातिप्रसक्तेर
रोधात्। प्राप्तं सर्वत्र किंचित्खलु स्फलभतरं वर्जनीयेन साकं गृह्यते तेपि लक्ष्या यदि तदपि विधौ सर्वथा
तिप्रसक्तिः॥३०॥ यदि लक्षणे निवृत्तिफलकत्वमपूर्वं निवेश्यते तर्ह्यवशिष्टश्लोकांशो व्यर्थः विधि
नियमयोः प्राप्तिपूर्तिफलकयोः निवृत्तिफलकत्वाभावेन तावतैव संवलितव्याप्तिनिवारणात्।
स्यादेतन्निषेधात्मका अपि संति विधयो नियमाश्च यथा दीक्षितो न जुहोति न तो पशू करोति नाति

रात्रे षोडशिनं गृह्णाति इत्यादयो विधिप्राप्तानां निषेधा विषयः दीक्षामध्येऽग्निहोत्रहोमानां प
शुवाज्यभागयोरतिरात्रे षोडशिग्रहस्य वर्जनाम संततमप्राप्तत्वात् । न हिंस्यान्नानृतं वदेदित्याद
यो रागप्राप्तानां निषेधा नियमाः हिंसादिनैव कदाचिद्वर्जनेनापि पुरुषस्येप्सितं संभवेन तस्या
78 पि पक्षे प्राप्तत्वादिति चेत् । मेवं । नेष्टलिव्याप्तेस्तस्य विशेषणस्याकृत्या । निरोधासंभवात् । सर्वत्र
वि हि किं किं दृ विदृष्टवर्जनीयं वर्जनीयेन सदसमुच्चित्य प्राप्तं स्फलभमेव यथा दीक्षामध्ये क्रत्वर्थ
होमाः पुरुषार्थहोमैरग्निहोत्रादिभिः सह प्राप्ताः पशुवाज्यभागव्यतिरिक्तांगान्याज्यभागा
भ्यां सह प्राप्तानि अतिरात्रे षोडशिग्रहव्यतिरिक्तांगानि षोडशिग्रहेण सह प्राप्तानि पुरुषभो
जनादीनि हिंसादिभिः सह प्राप्तानि । ननु तत्र वान्यत्र च प्राप्त इत्यत्रैकरूपसंबंधेन प्रा
प्तिर्विवक्षिता अस्ति प्राप्तुराह तेषु परिसंख्योदाहरणेषु शेषत्वे नाश्रयत्वे न निमित्तत्वे न वाये ७८
न केनचिदेकरूपेणोवसंबंधेनोभयोः प्राप्तिस्तथा च दीक्षितान जुहोतीत्यत्रापूर्वविधौ नाति

राम

© Dharmartha Trust J&K. Digitized by eGangotri

व्याप्तिर्दीक्षामध्ये कृतयर्थहोमानां क्रतुशेषत्वेन व्याप्तिः पुरुषार्थहोमानां कालैक्येनेति संबंधभेदात्·
नतो पशूकरोति नातिरात्र इति निषेधयोरुक्तलक्षणानुसारेण परिसंख्यात्वमेवास्तु· नचैवमपि न
हिंस्यादिति नियमविधावतिव्याप्तिः पुरुषप्रतिषेधत्वेनैव भोजनादीनां हिंसादीनां च प्राप्तिसत्ता
दिति वाच्यं· असंतानप्राप्तेनिवृत्तिफलकत्वस्य लक्षणे विवक्षितत्वादिति चेन्न· मैवं· दृष्टार्थानां कं
डूयनादीनां अदृष्टार्थानां हरिस्मरणादीनां पुरुषार्थहोमैः सह क्रतौ कालैक्यसंबंधेन प्राप्तिस
त्वेननुहोतीत्यत्रापूर्वविधावुक्तविवक्षयाप्यतिव्याप्तिनिरासात्· निवृत्तावत्यंतप्राप्तत्वे विशेषण
विवक्षायां शशकादिपंचकव्यतिरिक्तपंचनखभक्षणे निवृत्तेरत्यंतप्राप्तत्वाभावेन पंच पंचनखा
भक्ष्या इति परिसंख्यायामव्याप्तिप्रसक्तात्तस्य विशेषणस्याविवक्षणीयत्वात् न हिंस्यादिति नि
यमविध्यतिव्याप्त्यनिरासाच्च· ननु यद्दीक्षितो न जुहोतीत्यादिषु सर्वेषु निषेधेषु लक्षणमस्तित
दा संजुहोतेपि परिसंख्याविधय इति चेन्न· तथाप्यपूर्वविधावतिव्याप्तिः यदि निवृत्तिफलको विधि

अप्राप्तायानिवृत्तिरितिविधयः ७

© Dharmartha Trust J&K. Digitized by eGangotri

रित्येतावदेव लक्षणं क्रियते यदि वा ऽनेकस्य समुच्चित्य प्राप्ताविति विशेष्यते सर्वथाप्यग्निहोत्रादिविधा
वस्यैवेदं लक्षणं श्रमपरिहाराद्यर्थे लौकिककर्मणामग्निहोत्रादिकर्मणां वा करणयोः समुच्चित्य
प्राप्तो यावज्जीवमग्निहोत्रं जुहोतीत्यादिविधेरग्निहोत्राद्यकरणनिवृत्तिरूपतदनुष्ठानफ
79 लकत्वात्. न चात्र निवृत्तिपदेनाभावरूपैव निवृत्तिर्विवक्षितेति शक्यं वक्तुं. प्रागुदाहृतनिषेधप
रिसंख्यास्वनुष्ठानफलस्याव्याप्तिप्रसंगात्. तस्मात्परिसंख्यालक्षणमपि न युक्तमिति भावः
॥२२॥ इति परिसंख्यालक्षणाक्षेपः समाप्तः॥ छ॥ विलक्षणान्यप्युदितानि लक्षणान्यपूर्वविध्या
दिविभागसिद्धये. भजंति भूम्ना दृष्टांतां पदावलीं परस्परामप्यपरस्परासिमां॥ एवं संक्षिप्तमाक्षेपा
तिदेशमतदप्रासंगवसहेतूपन्यासव्याजेन सामान्यतः प्रदर्शयति. पूर्वाक्षेपप्रकारः परमप्यात्मवश्यं ७८
विधातुं प्रायः सूक्ष्मं विभागं विधिषु गमयतां लक्षणानाममीषां. शंक्यंतं न्यायसाम्यप्रणिहितमति
भिर्बोद्धुमित्य प्रदर्श्यं विषयेष्वेतेषु भिन्नास्थितिषु न नवो वर्णितस्तत्प्रकारः॥२३॥ अपूर्वविध्यादिवि राम

© Dharmartha Trust J&K. Digitized by eGangotri

भाजकानामुदाहृतलक्षणानां मध्ये पूर्वस्या पूर्वविधिलक्षणस्य य आक्षेपप्रकारः स प्रायेणापरं नि
यमविधिलक्षणमप्यास्कंदितुं प्रभवति । न ह्यथा पाक्षिके सतीस्य त्र विधिविषयस्य पाक्षिकत्वं विव
क्षितं यस्य कस्यचिद्विद्धा । आद्ये सर्वत्र पाक्षिकत्वविवक्षायां विकृतिविशेषगतस्वरांतरनियमविधाव
व्याप्तिः विकल्पं तरेऽपि तथैव नियमविधिसत्त्वेन तद्व्यभावे स्वरांतरप्रष्टस्य सावित्रिकपाक्षिकत्वाभा
वात् । प्रकृतविधुद्देश्ये पाक्षिकत्वविवक्षायामपि पुरोडाशीकरणे नियमार्थेऽवघनविधावव्याप्तिः
विधिविषयस्य अवघनस्योद्देश्ये पुरोडाशे नित्यप्राप्तत्वात् । द्वितीये सति सप्तम्या यस्य पाक्षिकत्वमुप
लक्षणत्वेन निर्दिष्टं तन्नियमनफलकत्वपर्यंतलक्षणं विवक्षितं न वा । अंत्ये सांग्राहिण्यां वो
द्दकाङ्क्षी स्यादित्यपक्षप्राप्ते सति महंगानामामनहोमानाम पूर्वविधौ व्याप्तिः । आद्ये मंत्रगत
स्वरनियमार्थे पूपांश्च यजुषेत्यादिषु कर्मगतस्वरविधाने ष्वतिव्याप्तिः । यस्य स्वरस्य नियमावि
धेः फलं न स्योद्देश्ये यजुर्वेदादिविहितज्योतिष्टोमादिकर्मण्यंतराप्राप्तत्वेन पाक्षिकत्वाभावात् ।

© Dharmartha Trust J&K. Digitized by eGangotri

यस्य तत्र विकल्पितस्य दीक्षापरिमाणादेः पाक्षिकत्वमस्ति तन्नियमनस्यैतद्विधिफलत्वाभावात्। एवं
घवद्धनमनियमार्थं व्रीहिभिर्यजेतेति नियमविधौ वाति व्याप्तिः। तत्र नियमस्यावहननस्य प्रकृतावि
धमुद्देश्ययागोपकारकत्वाभावात्। युद्धमेतत्प्रकृतोद्देश्ये पाक्षिकत्वं न विवक्षितं किंतु यत्र क्वचित्
४० धान्वा दृष्टः न्यस्मिन्वा यस्मिन्कस्मिंश्चिद्विधिविषयस्यान्यस्य वा पाक्षिकत्वे सति तन्नियमनफ
लो विधिरिति लक्षणं अतो नोक्ताव्याप्तिरिति। एवमपि मंत्रार्थवादसामर्थ्यादिभ्यः द्रव्यगुण
संस्कारादिनियमफलकेषु नानाशाखागतेषु च नियमविधिषु व्याप्तिः। भूयांसो ह्यजोऽग्नीषो
मीय इत्यादयो मंत्रार्थवादसामर्थ्यादिलभ्यविषयानानाशाखागताश्च नियमविधयः। मंत्रार्थ
वादसामर्थ्यादिकल्पशाखान्तरगतविधीनामप्यप्रवृत्त्यपेक्षया तेषु पाक्षिकत्वसमर्थने दण्डापेक्षा ८०
न न्वाहेत्यादिविधिषु नानेकविध्यप्रवृत्त्यपेक्षया नियमपरिसंख्यालक्षणसांकर्यापत्या। निष्प्रस
न्येतत्फलकं। अपि च पंच नखा भक्ष्या इति परिसंख्यायामतिव्याप्तिः तत्फलभूतायाः शशादिपंचकव्य

© Dharmartha Trust J&K. Digitized by eGangotri

तिरिक्तरूपं चनखभक्षणनिवृत्तेः पक्षे रागत एव प्राप्तिसंभवात् । भावस्य पाक्षिकत्वविवक्षायां नहिंस्यात्
म२ सर्वभूतानीत्यादिनियमविधावव्याप्तिः क्वचिद्व्रतविशेषे कांश्चिन्नियमान्विधाय तद्व्रतोत्तरं व्रतांतरे तन्नि
यमाभावमुक्त्वा पुनस्तद्व्रतकर्तव्यत्वेन विहिते व्रतांतरे विशिष्य किंचिन्नियमाभावो यत्रोपदिश्यते तत्र
परिसंख्याविधया तदन्यनियमाः प्राप्यंत इति तस्यां परिसंख्यायामतिव्याप्तिश्च । तत्र भावरूपनिय
म्यगतपाक्षिकत्वसत्वात् । किंच । किं पाक्षिकत्वं विवक्षितं यदि सर्वोद्देश्यानानुवृत्तमप्राप्तिमत्वं तदा सा
र्वकाम्यविधावतिव्याप्तिः ज्योतिष्टोमप्राप्तेः स्वर्गान्यफलेष्वनुवृत्त्यभावात् । असंभवश्चावहन
ननादीनामुद्देश्येषु सर्वेषु व्रीह्यादिषु प्राप्तेः समर्थितत्वात् । उद्देश्यव्यापकप्राप्तिमत्वं तदिति चेत् । त
दुद्देश्ये च प्राप्तिकरं वितत्प्राप्तिमत्वं तदुद्देश्यप्राप्तिरहितेषु साम्नास्तकवीतेत्यादिनियमविधिष्व
व्याप्तं । उद्देश्यवृत्तिविशेषाविवक्षायामपि पाइहि कृष्टहद्व्यंगरुघष्टत्वादिविध्यातिव्याप्तं । तत्राहम्भे
दादिरूपावच्छेदभेदास्तीति चेत् । किं विनैवावच्छेदभेदं संप्राप्तिकरं विनष्टप्राप्तिमत्वं विवक्षितं । अप्रि

© Dharmartha Trust J&K. Digitized by eGangotri

तिवेन्नह्यसंभवः अथ हननादिशास्त्रप्राप्त्योरुपायांतरतद्विरहरूपावच्छेदभेदनियतत्वात् उपाया
न्तरतद्विरहभिन्नावच्छेदभेदं विनेति विवक्षायामपि कार्यषोडशत्वानुगमनार्थं गगनादिनियमाव्याप्तिः वैक
ल्पिकतद्विरहाभिन्नावच्छेदभेदं विनेति विवक्षायां वैकल्पिकत्वस्य पाक्षिकत्वानुप्रवेशरहितस्यानिर्वक्तु
मशक्यत्वात्तथात्वाश्रयः आश्रयभेदं विनेति विवक्षायामपि श्यावाश्वब्राह्मणलोकिप्रमुखापूर्वविधिष्व
तिव्याप्तिः भूतिकाम्यलिंगमंत्रउत्कर्षपरिध्यादिनियमाव्याप्तिश्च· कदाचित्कप्राप्तिमत्त्वं पाक्षिकत्व
मिति विवक्षायामपि चोदकप्राप्ताप्रोदितहृत्तत्वश्रयणादिविध्यतिव्याप्तिरिति चेत् एवं नियमवि
धिलक्षणे आक्षेपप्रकारः प्रायेण परिसंख्यालक्षणमप्याक्षेप्तुं प्रभवति यथा प्रायणीयादिषू
पायपरिसंख्या रशनादानादिषूपायेषु परिसंख्या हृदयस्याग्रेवद्यतीत्यादिषूपायोपेयपरिसंख्या।
त्रिविधायामप्यस्यां परिसंख्यायां कस्यचिदुपेयस्य कस्यचिदुपायस्य तत्र सत्त्वाति योगिनस्त्वविध्युपा
त्तत्वमस्ति। ननु हृदयस्याग्रेवद्यतीत्यादिषु हृदयाद्येकादश्यातिरिक्तपश्ववयववर्गस्यावदानोपेय

© Dharmartha Trust J&K. Digitized by eGangotri

त्वपरिसंख्यायामेवप्रतियोगिनो वदानस्य विध्युपात्तत्वमस्ति ननु तस्य पशुयागोपायत्वपरिसंख्या
यां प्रतियोगिनश्च पशुयागस्येति चेत् · न तत्रांगवाक्या · नां प्रधानवाक्यैकवाक्यता कल्प्यने सति त
स्य विध्युपात्तत्वलाभात् · क्वचित्क्वचिद्रूपे यतःप्रतियोगिनो रूपायतत्प्रतियोगिनश्च मध्ये एकस्य रूपो
वा विध्यनुपात्तत्वमपि दृश्यते · यथा यदि रथंतरसामा सोमः स्यादैंद्रवायवाग्रान्गृह्णीयादित्य
त्र रथंतरसामा रथंतरसाम्ना विकृतिरूपस्यापेयस्यैकस्य विध्यनुपात्तत्वं · कपालेषु श्रपयतीत्यत्र वि
त्रेष्टिव्रीहिनियमयोरुभयोरपि विध्यनुपात्तत्वं · तदेवमुपात्तानुपात्तरूपे द्विविधेष्वुदाहरणेष्वा
स्य व्यावर्तनीयस्य नियतप्राप्तिरस्ति · क्वचिद्व्यावर्तनीयमात्रप्राप्तावपि परिसंख्या दृश्यते · यथात्र हे
षावपंतीति · क्वचित्तु परिसंख्यायां नियतप्राप्तमेव न दृश्यते · यथा पंच नखा भक्ष्या इति · एवं नानाप्र
कारः परिसंख्याविधिर्नियमविधिवदेव · न लक्षणेन संग्रहीतुं शक्यः · अयं तु प्रकारः परिसंख्याविधि
लक्षणाक्षेपप्रदर्शनप्राय इति नेह प्रपंच्यते · एवमपूर्वविधिलक्षणाक्षेपप्रकारोऽपि परिसंख्याविधि

© Dharmartha Trust J&K. Digitized by eGangotri

ग्राह्यव्यावर्त्तनीययोरुभयोरपि विधिविषयत्वाभावात् २

धिलक्षणमवस्कंदितुं प्रभवति। तथाहि। प्राप्त इति विषयसप्तमीति पक्षे तत्र वान्यत्र वेति सप्तम्योस्त
यासामानाधिकरण्ये लक्षणस्यासंभव एव स्यात्। वैयधिकरण्ये तु सार्वत्रिकोभयप्राप्तिविवक्षायां
गृहमेधीयगताज्यभागपुनर्विधावव्याप्तिः। अवभृथेपि तथैवाज्यभागविधिसत्वेन तद्बुद्ध्यभावे स
८२ र्वविकृतिगताज्यभागनद्विगंतरांगकलापरूपोभयप्राप्त्यभावात्। प्रकृतविधावुद्देश्यत्वेन विधेय
त्वेन वा। न्वयिन्युभयप्राप्तिविवक्षायामपि कपालेषु श्रपतीति परिसंख्याविधावव्याप्तिः। सतिसप्त
मीति पक्षे यस्य ययोरुभयोः प्राप्तिरुपलक्षणत्वेन निर्दिष्टा। तस्य तदन्यतरसंबंधव्यावर्त्तनफल
कत्वपर्यंतं लक्षणं न विवक्षितं चेत्सांग्रहिण्यां चोदकादन्यस्मिन्नंगकलापे प्राप्ते ससामनहोमवि
धावतिव्याप्तिः। यथाविवक्षितं चेत्कपालश्रपणविध्यादावव्याप्तिः। यत्क्वचन प्रकृतविधकपालगतो
भयप्राप्तिर्नविवक्षिता। किंतु यस्य कस्यचिद्यत्किंचिदुभयप्राप्तिः। तथा च तदन्यतरसंबंधनिवृत्ति
फलको विधिः परिसंख्येति विवक्षितत्वान्नोक्ताऽव्याप्तिर्नाप्यतिव्याप्तिरिति चेत्। एवमपि मंत्रार्थवा ८२

द्सामर्थ्यलभ्यप्रयोजनेनानुनाशास्त्रागतेषु च परिसंख्याविधिस्त्वप्राप्तिरित्यादि प्रागुक्तमेषा वर्जित इति॰ ए
वं यद्यपि पूर्वाक्षेपप्रकारः परत्रापि प्रवर्त्तते तथापि सर्वधीमद्भिः संचारयितुं शक्य इति नियमपरिसंख्ययो
र्भिन्नाभिन्न आक्षेपप्रकारो दर्शितः तथा चैते त्रयोपि विधयः फलव्यवस्थिता इति उत्तरोत्तरस्मिन्वर्णिताक्षे
पप्रकारोपि पूर्वपूर्वस्मिन्संचारणीय इति भावः ॥ इति श्रीमद्द्वैतविद्याचार्याप्पयदीक्षितकृतौ विधिरसा
यने फलवयोजिन्यां त्रिविधलक्षणाक्षेपप्रकारातिदेशः ॥ ॥ एवमपूर्वनियमसंख्यानामाचार्योक्तानि
लक्षणान्याक्षिप्य तेषामुदाहरणान्याक्षिपति॰ उत्तरश्यामो न चोदाहरणगणः अपि प्राप्तरूपं विधीनां
प्राप्तं खल्वग्निदीक्षाहवनमभिवहविः प्रोक्षणं मंत्रलिंगाद्॰ नैयत्संसोमपात्रग्रहणं च ततः प्राप्तमेवा
वहंतो प्राप्तं तद्दृष्टकार्यान्वयपरमुसलोलूखलाम्नानतश्च॰ व्रीहीनवहन्तीति विधिरिहोदाहृतं वार्त्ति
क॰ तत्राव दयुक्तं॰ दर्शपूर्णमासप्रकरणे न तद्दृष्टार्थत्वेनावगतस्याग्नये त्वा जुष्टं प्रोक्षाम्यग्नीषोमा
भ्यामिसादिमंत्रस्य देवतार्थद्रव्यप्रोक्षणलिंगबलाद्धविः प्रोक्षणद्वारेण तादर्थ्यं स्यादिति तन्नए

© Dharmartha Trust J&K. Digitized by eGangotri

वहविःप्रोक्षणंकर्त्तव्यताप्राप्नुतेकिमत्रस्त्रीहीन्प्रोक्षतीतिविधिनाऽङ्गीकृतंखलुदशमेषड्डिर्दी
क्षयतीत्यग्निप्रकरणगतविधिनादीक्षार्थत्वयावगतानामाकूतिमग्निंप्रयुजंस्वाहेत्यादिमंत्राणां
स्वाहाकारलिंगबलाद्धोमद्वारेणतादर्थ्यसिद्धेस्ततएवहोमकर्त्तव्यताप्राप्यतइति·तथास्त्रीहीन
83 वहंतीतिविधिर्नियमविधिरिस्फदाहृतमप्ययुक्तं·दर्शपूर्णमासप्रकरणेनतदपूर्वार्थितेनावगतस्या
वरस्तेगदिवःसपत्नंबध्यासमितिमंत्रस्यावहननलिंगबलादवहननद्वारेणतादर्थ्यंस्यादितिततएव
पुरोडाशांशीयद्रव्यवितुषीकरणार्थत्वेनानियतप्राप्तस्यावहननस्यनियमत्वाभावात्·अयमपिन्या
यस्तृतीयेसंप्रतिपन्नः।तत्रहिभक्ष्यानुवाकसमाख्ययाभक्षसंबंधित्वेनावगतयोर्भक्षानुवाकमध्य
पठितयोरश्विनोस्त्वाबाहुभ्यांसंध्यासंनृचक्षसंत्वादेवसोमसुचक्षाअवख्येषमितिमंत्रयोर्ग्रहणावेक्ष
णलिंगबलात्तद्द्वारेणभक्षसंबंधित्वंस्यादितिततएवपरहस्तगतंसोमपात्रमगृहीत्वाप्यनवेक्ष्या ३

© Dharmartha Trust J&K. Digitized by eGangotri

पि भक्षयितुं शक्यते नानियतप्राप्तयोर्ग्रहणावेक्षणयोर्नियमो ऽङ्गीकृतः । किं च वारणो यज्ञावच
रो वैकङ्कतो यज्ञावचर इति वारणवैकङ्कतपात्राणां यज्ञसाधनत्वं विदधता वाक्येनोलूखलमुसल
योरपि वारणपात्रयोर्यज्ञसाधनत्वमवगतं । तच्च तयोरुत्पत्तिशिष्टपुरोडाशाद्यवरुद्धे प्वाग्नेयादिया
गेषु साक्षात्साधनतासंभवात् किंचिद्द्वारेणानिर्वहणीयमिति तद्द्वारत्वेन नित्यकर्तव्यमवहननं प्रा
प्तं । न च वाच्यं स्फ्यश्च कपालानि चेत्यादि अनुक्रम्यैतानि वै दश यज्ञायुधानीति यज्ञसाधनत्वेना
म्नातानां स्फ्यादीनां यज्ञायुधानि संभरतीति सादनविधानात्तद्द्वारतयोलूखलमुसलयोः साद त
नद्वारेणैव यज्ञसाधनत्वं स्यादिति । अथैतयोर्दृष्टकार्याभावेन तस्य तयोः सन्निसंपादकस्य सादनस्या
दृष्टार्थतापत्तेः दृष्टार्थत्वे संभवति तस्यादृष्टार्थत्वकल्पनानौचित्यात् । स्फ्येनोद्धन्तीत्यादिभिरुद्धनना
दिषु विनियुक्तानां सादनं दृष्टार्थमुलूखलमुसलयोस्त्वदृष्टार्थमिति सादनविधिवैरूप्यापत्तेश्चा
तस्तदुलूखलमुसलद्वंद्वं दृष्टकार्यविनियोगसाकांक्षं सत्सामर्थ्यादर्थप्राप्तावहननार्थं संपद्यते ।

© Dharmartha Trust J&K. Digitized by eGangotri

अवहननस्य चूर्णीकरणादिवद्दृषदुपलादिसाधनांतरसाध्यत्वाभावेन नियमनत्त्वभयापेक्षत्वा
दिति नियुवदाम्नातो लूखलमुसलरूपकार्यत्वेनान्वयबलादप्यवहननस्य नियमो लभ्यते किमत्र व्रीही
नवहंतीति विधिना· तस्माद्व्रीहीन्प्रोक्षति व्रीहीनवहंतीति· अपूर्वनियमविध्युदाहरणमयुक्तमिति भा
84 वः· नन्वन्यलभ्ययोरपि प्रोक्षणावहननविनियमयोरभ्युदयार्थत्वेनैतौ विधी स्यातां। गत्यंतराभावात्सर्ग
कामस्यामदृश्यादिविधिवदित्याशंक्य परिसंख्याद्यर्थत्वेन तयोश्चरितार्थ्यमाह· तस्मादत्राभयस्मिन्
यव परिहृतये परिसंख्याविधिः स्यान्नो वत्सास्मे नियत्से कथमपि वभवन्नप्रसिद्धोऽपि स स्यात्· यद्वा
पूर्वविधिः स्यान्नियमपरिद्रूहाध्वर्यत्वं नियच्छन्यस्मिन्द्वंद्वं संपादनविधिवशागते तस्य यच्छन्त्वपूर्वः·
मंत्रलिंगात्साधनुवदाग्नेयाग्नीषोमीयपुरोडाशार्थद्रव्यविषयं प्रोक्षणं मंत्रलिंगो लूखलमुसला
भ्यां प्राप्नुवन्नवहननियमव्रीहीणामिव यवानामपि प्राप्नुयात्· तन्निवर्त्तकतया परिसंख्या
विधित्वेन संभवत्स्तनयोश्चारितार्थ्यान्नान्यगतिकमभ्युदयार्थं पूर्वनियमविधित्वं कल्पनीयं· यदि तु नि ८४

© Dharmartha Trust J&K. Digitized by eGangotri

स्यप्राप्तबाधकपरिसंख्यापेक्षयानित्यप्राप्तमभ्युदयार्थप्रापन्नियच्छन्वाविधिः श्रेयानित्येवं प्रोक्षणावहनन
वाक्ययोरपूर्वनियमविध्यभ्युपगमोऽनन्यगतिकतयेतिमन्यसे। तदानीमश्वाभिधानीमादत्त इत्यत्र प्राप्ति
द्धापि परिसंख्याविधिर्न सिध्येत्। किंतु तत्र मंत्रप्राप्तौ मंत्रनियमे वान्यलभ्येप्यभ्युदयशिरस्कतया मंत्रस्य
प्राप्तिं नियमं वा कुर्वन्नपूर्वविधिर्नियमविधिर्वा स्यात्। शक्यते ह्येवं वक्तुं अश्वरशनाग्रहणप्रकाशने मंत्रं प्रा
पयन्नियमपूर्वविधिस्तत्र कल्प्यः सूत्रोपदिष्टश्च वचनान्तरीयग्रहणकवाक्यरूपानियतानेकोपायप्राप्तौ मं
त्रं नियच्छन्नियमविधिर्वेति। अत्रेदं वक्तव्यं। मंत्रलिंगबलादेव तत्र मंत्रस्य तावत्प्राप्तिर्लभ्यते सा च तस्य नि
सवृत्त्यानबलान्नियतैव लभ्यते। तथा च प्राप्तिनियमयोरन्यलभ्यत्वेनापूर्वनियमविध्योरसंभवात्प
रिसंख्याविधिरभ्युपगन्तव्य इति। कथमेतदुपपद्यते। यद्यन्यलभ्ययोरपि प्राप्तिनियमयोरभ्युदयशिरस्कत्वे
नानन्यलभ्यत्वमुपपाद्य प्रोक्षणावहननविध्योरपूर्वनियमविधित्वमिति परिसंख्यार्थत्वं प्रतिक्षिप्य
म ते। तथा ह्यत्रापि तथैवापूर्वविधित्वं नियमविधित्वं वा संभवतीति परिसंख्यार्थत्वं न सिध्येत्। अथापि तत्र प

© Dharmartha Trust J&K. Digitized by eGangotri

रिसंस्कार्थताभ्युपगमे तथैव प्रोक्षणावहननविध्योरपि तादर्थ्यमभ्युपगंतु युक्तं· अथोच्येत व्रीही
न वहंतीति अयं परिसंख्याविधिरित्यभ्युपगमेऽवहननपरिसंख्या तन्नियमपरिसंख्या वेति निर्धारणं
न संभवति नियामकाभावात्· अतस्तत्र यथाकथंचिन्नियमविधिरेवाश्रयणीय इति अत्रापि बोध्य
प्रसिद्धोप्येवं सति परिसंख्याविधिर्नस्यात्· अत्रापि कथंचिदपूर्वविधिर्नियमविधिरेव वाश्रयणीयः
स्यादित्येवोत्तरं· तत्रापीदमंत्रपरिसंख्या तन्नियमसंख्या वेति निश्चयो न संभवत्येव· यद्युच्येत मं
त्रस्य विधिबोधितेनाश्वाभिधानीग्रहणसंबंधमात्रेण तस्याग्निप्रकरणाम्नानं चरितार्थमिति नैरा
कांक्ष्येणानेनार्गदभरशनाग्रहणसाधारणस्य लैंगिकविनियोगकल्पनस्याप्रवृत्तेर्मंत्रेण गर्दभ
रशनाग्रहणं न स्पृशत्येव· अतो मंत्रपरिपरिसंख्येयं न तत्र नियमपरिसंख्या· अश्वरशनामंत्रनि
यमे विधिना प्रतिपादितस्यन्यत्र तन्नियमपरिसंख्या स्यात्· न तत्राश्वरशनामंत्रेणैव दद्यादि
तिमंत्रनियमो विधिना प्रतिपादितः स तु नियमः परिसंख्यावदर्थाल्लभ्यते· अश्वरशनाग्रहणे

मंत्ररूपोपायसंबंधे विधिना बोधिते तावता नैराकांक्ष्येण पाक्षिककल्पसूत्रादिसाधारण्ये लौकि-
कोपायकल्पनां प्रवृत्तेः किंतु प्रकरणाम्नानाय मंत्रलिंगपर्यालोचनयापि लब्धांशाकांक्षतास्तोऽस्य वि-
धेः फलवत्वेन नादृष्टमिति । सर्वमेतद्ग्रहणविधावपि समानं । अथैतदुक्तमेतत्तत्र चान्यत्र च
प्राप्तौ परिसंख्येति गीयत इति परिसंख्यालक्षणं तत्र चान्यत्र चानिसप्राप्तत्वेवं परं । अन्यथानि-
यमविधिरपि तत्र चान्यत्र च पक्षप्राप्तेवर्त्तत इति तत्रातिव्याप्तिप्रसंगात् । ततश्चरशनाग्रह-
णमंत्रविधेः परिसंख्यात्वं अश्वगर्धकरशनाग्रहणयोर्मंत्रस्य नित्यप्राप्तिमपेक्ष्योपपादनीयं ।
नित्यप्राप्तिश्च तस्य तयोः प्रकरणानुगृहीतमंत्रलिंगकल्प्यविधिलभ्या । तत नियतानेकोपाय-
कल्पना लभ्या । प्रकरणानुगृहीतमंत्रलिंगकल्प्यश्च विधिरश्वगर्दभरशनाग्रहणयोर्मंत्रकल्पसू-
त्राद्यनियतानेकोपायप्राप्तौ नियमविध्यात्मक इति नियमविधिलभ्यामश्वगर्धभरशनाग्रहणयो-
र्मंत्रनियमरूपां प्राप्तिमपेक्ष्य प्रवर्त्तमानो मंत्रनियमपरिसंख्यायां पर्यवस्यतीति गर्धभरशनाग्रहणा-
म न्मंत्रनियमे एव वर्त्तते न तु कल्पसूत्रादिवदनियमेन प्राप्नुवन्मंत्रोऽपि । अत एव वैखानसं पूर्वं हन्तसाम

© Dharmartha Trust J&K. Digitized by eGangotri

भवति षोडश्युत्तरउत्तत्र परिसंख्येति द्विकारपक्षे प्रकृत्यतिरात्रश्चोदकात्साक्षिकी षोडशिग्रहस्य
माप्राप्तिस्तामपेक्ष्य नेयं परिसंख्या॰ परिसंख्यायां नित्यप्राप्तिमपेक्ष्य ताञ्चोदकाधीनपाक्षिकप्रा
प्त्यपेक्षत्वे नियमविधित्वप्रसंगात्॰ किंतु तत्रैहन्द्विरात्रस्य गणस्थत्वात्तदुनिद्विरात्रसामान्यस्यात्रैहनि
86 यः षोडशिग्रहनियमविधिश्चोदकाधीनपाक्षिकषोडशिग्रहप्राप्त्यपेक्ष्यस्तत्कुल्भ्यमंगिरसां द्वि
रात्रस्य द्विरात्रांतराणां चात्रैहनि समुच्चितप्राप्तं षोडशिग्रहं नियममपेक्ष्येयं परिसंख्येति द्वि
रात्रांतराणामुत्तरादन्होनियमविध्यधीनः षोडशिग्रहनियम एवावर्तते। ननु चोदकल
भ्यः पाक्षिकः षोडशिग्रहोऽपीत्युपपादितं तत्र तत्रस्थले॰ ननु सर्वद्विरात्रविषयं प्रत्यक्षं सामान्यशा
स्त्रं प्रथमप्रवृत्तमिति तेन सर्वद्विरात्रेषु प्राप्तं षोडशिग्रहनियममपेक्ष्य द्विरात्रांतरेष्वत्र तत्परिसं
ख्यायुज्यते॰ इह मंत्रलिंगबलादश्वगर्दभरशनादायहणयोर्मंत्रनियमकल्पनं प्रथमं न प्रवृत्त
मिति कथं न त्वभ्यं नयोर्मंत्रनियममपेक्ष्य गर्दभरशनोत्तां मंत्रनियमपरिसंख्या घटते। नववा
ऽन्तत्रापि द्विरात्रसामान्यविषयतया सामान्यद्वारेणाङ्गिरसां द्विरात्रतदितरद्विरात्ररूपेषु वि ८५

© Dharmartha Trust J&K. Digitized by eGangotri

शेषु प्रवर्त्तमानादुत्तरेद्युर्द्विरात्रस्य गृह्यत इति शास्त्रादांगिरसां द्विरात्ररूपविशेषविषयमेव शा
स्त्रं प्रथमं प्रवर्त्तते आहवनीयगुणकाद्यादिवपदशास्त्रपदमिति । सामान्यशास्त्रे द्विरात्रमात्रमपि व
र्तोपात्तमस्ति । तदपि नास्ति योऽदस्युत्तर इति शास्त्रे किंतु प्रकरणपर्यालोचनया तस्यांगिरसां
द्विरात्रसंबंधोऽवगंतव्य इति तत्र सामान्यशास्त्रस्यैव प्रथमप्रवृत्तिमत्वादिति चेन्न । मैवं । योऽदस्यु
त्तर इति शास्त्रे नियमपरिसंख्यायां(त्रिके) परिसंख्येयनियमप्रापकप्रमाणस्य प्रथमप्रवृत्त्यपे
क्षणेऽपि अत्रार्थनियमपरिसंख्यायां तदपेक्षाभावात् । तर्हि तां नियमप्रापकप्रमाणप्रवृत्ति
मपेक्ष्य आर्थनियमशास्त्रप्रवृत्तिवत् तर्हि तां परिसंख्येयप्रापकप्रमाणप्रवृत्तिमपेक्ष्यार्थपरि
संख्याशास्त्रप्रवृत्तिसंभवात् । कपाले श्रपयतीत्यत्र अन्यलभ्यपुरोडाशश्रपणविषयत्तत्सव
स्थीनप्रवृत्तिव्रीहीन्नियमशास्त्रप्रवृत्तिमपेक्ष्य चित्रेष्ठावपर्धाद्व्रीहिनियमपरिसंख्यालाभस्य नव
म्लोकावतारिकायां प्रदर्शितत्वाच्च । तस्मादिह नियमपरिसंख्यायुक्ता न नैवार्थपरिसंख्यामा
त्रस्य नियतप्राप्त्यपेक्ष्यतामंत्रपि परिसंख्या नियमपरिसंख्येव स्यादिति । यत्र नियमप्राप्तस्य नि

© Dharmartha Trust J&K. Digitized by eGangotri

यामकतयाप्रवृत्तंतत्किंतंवाप्रमाणमपेक्ष्यपरिसंख्यातत्रनियमपरिसंख्यपत्रतनियतप्राप्तिरहित
स्यनियतप्रापकतयाप्रवृत्तंतत्किंतंवाप्रमाणमपेक्ष्यपरिसंसंख्यातत्राज्यभागोयजतीत्यादौस्वरू
पपरिसंख्येतिव्यवस्थोपपत्तेः अतःस्वरूपपरिसंख्यानियमपरिसंख्येतिपरिसंख्यायाद्वैविध्यंल
भ्यतएवंनियमेप्येवमेवद्वैविध्यंद्रष्टव्यंतेस्वरूपनियमः परिसंख्यानियमइति· व्रीहिभिर्यजेतेत्यादौ
अनियतप्राप्तस्यव्रीह्यादिस्वरूपस्यनियमः पत्नीसंयाजान्त्यहोतानिसंतिष्ठंतइत्यादावनियत ता ५
८७ प्राप्तायाः प्राकृतांगपरिसंख्यायानियमइति· तस्मादिहनियमपरिसंख्येतिनिर्धारणमुपपद्य
तइति· इदमपिसर्वमवहननविधिसाधारणं। एवमेवहितस्याप्यवहनननियमपरिसंख्यात्वमुप
पद्यते· ननुव्रीहीनवहंतीत्यत्रावहननस्वरूपपरिसंख्यातन्नियमपरिसंख्यात्वेस्युपपन्नेपक्षेस्मिन्न्य
क्षद्वयेप्ययंविधिरनन्यलभ्यांपरिसंख्यामिवान्यलभ्यमपियमंस्पृशत्येव· तत्रावहननस्वरूप
परिसंख्यापक्षेनियमपरिसंख्ययोरेकवृत्तगतफलद्वयन्यायेनपरस्परानपेक्षयाव्रीहिष्ववह ८१
हननसंबंधकरणेनार्थाल्लाभः। तन्नियमपरिसंख्यापक्षेव्रीहीणवहननसंबंधंबोधयन्विधि

© Dharmartha Trust J&K. Digitized by eGangotri

स्तस्य लोकतः प्राप्तिकी प्राप्तिं परामृश्य तन्नियमेऽवघातनियमस्यापि मंत्रसामर्थ्यादिलभ्यत्वं परामृ
श्यनियमपरिसंख्यायां पर्यवस्यतीति नियमत्वपरिसंख्ययोः पौर्वापर्येण लाभकृतो विशेषः एवं पक्षद्व
येपि नियमस्य सर्वविश्वंभरावेसति यव परिसंख्यानसंभवति व्रीहिस्वरूपतं फलवैतुष्यानुपयोगिनो
नियमस्यानर्थक्यपरिहाराय व्रीहिगतापूर्वीयत्वरूपोपयोगितासिद्धये व्रीहिपदेः पूर्वीयत्वरूपलक्ष
णावश्यंभावेनाऽव हनननियमे यवसाधारण्यस्य अवर्जनीयत्वादिति चेत्. इदमपि चोद्यमेवं सति
प्रसिद्धोपि परिसंख्याविधिर्नस्यादित्यनेनैव दत्तोत्तरं. इमश्वाभिधानीमादत्त इति प्रसिद्धपरिसं
ख्याविधिर्मंत्रलिंगप्राप्तं मंत्रादानसंबंधमनूद्य मंत्रस्याश्वाभिधानीसंबंधं प्रापय्यनू गर्दभरश
नात्तस्व्यावर्त्तयतीति हि भाष्यकारेणोक्तं. अयमश्वाभिधान्यां मंत्रनियमम्प्युक्तेन न्यायेन
स्यादेव. ततश्चाश्वाभिधानीतत्स्मरणानुपयोगिनो नियमस्यानर्थक्यपरिहारायाश्वाभिधानी
गतापूर्वीयत्वोपयोगित्वसिद्धयेऽश्वाभिधानीपदे पूर्वीयत्वलक्षणायंद वश्यमापतति अपूर्वी
यत्वं च गर्दभाभिधानीसाधारणमिति कथं ततो मंत्रो व्यावर्त्तितां नहि बृहद्रथंतरयोरिवाश्वगर्दभर

© Dharmartha Trust J&K. Digitized by eGangotri

शनयोर्भिन्नापूर्वानुप्रवेशोऽस्ति। येन व्रीहीणां रथंतरादिवापूर्वीयत्वलक्षणाभ्युपगमेप्यश्वाभिधा
नीधर्माणां गर्दभाभिधान्यां सांकर्यं न स्यात्। यद्यप्यत्र तस्माद्दन्नादत्तद्वयेनद्रूपात्मासात्तमनूद्यतेन
चेस्मश्वाभिधानीमित्येतद्विधीयते। किंतुअश्वरशनामंत्रधात्वर्थैर्युगपत्त्रिभिर्विशिष्टाभावेनैवे
काप्रसत्येनविधीयत इति वार्त्तिकेनोक्तं विशिष्टविधिपक्षमवलंब्य अश्वाभिधान्युद्देशेन मंत्रस्याविधा
88 नान्नाश्वाभिधानीपदे पूर्वीयत्वलक्षणाप्रसक्तिरिति परिहर्तुं शक्यं तथाप्ययं परिहारो नासार्वत्रिकः।
तथैव व्रीह्यवहनने विशिष्टाभावनाविधिरिति प्रक्रमेपि वक्तुं शक्यत्वात्। विशिष्टविधिपक्षेपि फलतः प
रिसंख्या। प्रयोजनं विधेः किं स्यादस्येति तु मिरूपणे। न गर्दभाभिधानीतः फलमन्यदस्तिवर्त्तना
दितत्रत्यवार्त्तिकोक्तयारीत्यापि फलमैव। तस्मात्प्रोक्षणावहनने विध्योर्यवपरिसंख्यार्थत्वेन का
चिदनुपपत्तिः। न चैवं सति व्रीहिभिर्यजेतेति विधिव्रीहिसंस्काराणां यवसाधारण्यापादनार्थ इति
प्राप्तवस्थापितं न सिध्येदिति चेत्। एवं तर्हि प्रोक्षणावहननविधीयवपरिसंख्यार्थेमाभूतां प्रोक्ष
णविधिः ३ प्रोक्षणस्य अध्वर्युकर्तृकत्वं नियमयन्नियमविधिरवहननाविधिरवहननस्यतद्वप्रयत्व ८८

© Dharmartha Trust J&K. Digitized by eGangotri

त्तपूर्वविधिरस्कप्रोक्षणस्य हि मंत्रलिंगकल्प्यश्रुतिविधेयत्वे कल्प्यश्रुत्याध्वर्य्वादिसमाख्याभावनात्मा
वात्तत्रानियमेन यः कश्चिदृत्विक् कर्तृत्वं प्राप्नुयात् । प्रत्यक्षश्रुतिविधेयत्वे तु तत्राध्वर्युसंज्ञककांडाम्नानेना
ध्वर्यवसमाख्यालाभादध्वर्युरेव कर्तेति नियमो लभ्यते । तथा वहननस्य मंत्रलिंगादिकल्प्यश्रुतिसह
ललेद्वंद्वसंपादनविधिवशात्तत्र यजमान एव कर्तृत्वं प्राप्नुयात् । तथा हि यजमानकांडे वत्संचोपावसृ
जत्युखां चाधिश्रयत्यव च हंति दृषदौ च समाहंतीति द्वंद्वान्यनुक्रम्यैतानि वै द्वादश द्वंद्वानि दर्शपूर्णमास
योस्तानि संपाद्य यजेतेति श्रूयते । तत्र द्वंद्वसंपादनं नाम क्रियाविशेषेण द्वयोः प्रत्यासन्नत्वसंपाद
नं यथा वत्सोपावसर्जनक्रियया धेनुवत्सयोर्यथा वहननक्रियया मुसलोलूखलयोस्तांश्च द्वंद्वसं
पादिनो द्वादशापि क्रियाः समाख्यावशाद्यजमानेन कर्तव्याः प्राप्ताः आध्वर्यवकांडेपि वत्समुपा
वसृजत्युखामधिश्रयत्यवहंतीत्यादिश्रवणादध्वर्युणा कर्तव्याः प्राप्ताः । न चासां द्व्याम्ना
तानामपि वाजस्य मा प्रसवेनेति मंत्रोच्चारणवदुभयकर्तृकत्वं संभवति एकेन कृतानामितरेण कर्तु
मशक्यत्वात् । अत एकः कर्तेति स्थिते कः कर्तेति विशेषाकांक्षायामाध्वर्यवकांडमध्ये यजमानकांडाम्ना

© Dharmartha Trust J&K. Digitized by eGangotri

नेनविशेषसमाख्यानाद्यजमानः कर्त्तेति प्राप्तेनासांक्रियाणांस्वरूपेणाध्वर्यवकांडेविधानादध्वर्युरेव
साक्षात्कर्त्तायजमानकांडेद्वंद्वसंपादनात्मनाविधानात्तुयजमानः स्मारकतयाप्रयोजकोभविष्यतीत्य
विरोधइतिसमर्थितं॰याजमानेसमाख्यानात्कर्माणि याजमानानिस्युरितिनार्त्तीयाधिकरणे॰तत्रयथा
ध्वर्यवत्समुपावसृजतीत्यादिविधिवद्व्रीहीनवहंतीतिविधिरपिनोश्रोष्यततदाक्रियांतरेषुविध्यंतरानु
89 सारेणयजमानस्यप्रयोजकत्वेप्यवहननेयजमानविधिस्वारस्यभंगायोगात्तत्रसाक्षात्कर्त्तृत्वमित्येवंप
र्यवसानादपेक्ष्यत॰अतोव्रीहीनवहंतीतिविधिनातत्राध्वर्योः कर्त्तृत्वंलभ्यते॰एवंचप्रोक्षणविधिरन्यल
भ्यप्रोक्षणंद्वारीकृत्यकर्त्तृनियमेपर्यवसानान्नियमविधिरवहननविधिरन्यलभ्यमवहननियमंद्वा
रीकृत्यकर्त्तृप्राप्तौपर्यवसानादपूर्वविधिरितिविशेषपरिगणनम्॰सर्वथापिप्रोक्षणविधिरपूर्वविधि
रवहननविधिर्नियमविधिरित्युदाहरणमयुक्तमितिभावः॰उक्तन्यायेनपरिसंख्योदाहरणमपिकर्त्तृ
नियमार्थमेवस्यान्नतुपरिसंख्यार्थमितितदुदाहरणमप्ययुक्तमित्याह॰एवंचाश्वाभिधानीमहविधिरपि
नकर्त्तृनैयत्यमात्रप्राप्त्यर्थः पर्यवस्येत्प्रथनविधिरिवप्राप्तमंत्रानुवादी॰मंत्रेष्वन्याप्रसक्तेर्विधिमिह ८८

© Dharmartha Trust J&K. Digitized by eGangotri

सगुणप्रकृतांगोक्तरीतिर्नक्षाम्येमंत्रमात्रेसतिविधिविषयेस्याद्विशिष्टानुवादः विध्यंतरावकाशसत्वे
नघन्यपरिसंख्यार्थत्वेनस्वीकर्तव्यमितिप्रागुक्तं॰ प्रोक्षणावहननविध्योस्तुकर्तृनियमप्राप्त्यर्थतया
चारितार्थ्यमुक्तं॰ तेनन्यायेनपरिसंख्योदाहरणेपिकर्तृनियमार्थत्वेवस्यात्॰ अर्थप्राप्तेग्रहणेऽध्व
र्योः पाक्षिकत्वेननियमविध्यवकाशसत्वात्॰ तत्रमंत्रग्रहणंकर्तृनियमार्थंप्रथनविधावेवलिंग
प्राप्तस्यमंत्रस्यानुवादकंस्यात्॰ उरुप्रथस्वेतिपुरोडाशंप्रथयतीतिविधिर्नप्रथनस्यपुरोडाशान्यथा
नुपपत्तिलभ्यत्वात्॰ नापितत्रोरुप्रथस्वेतिमंत्रविधिस्तस्यमंत्रलिंगादेवप्रथनेप्राप्तिसत्वात्॰ किंतु
न्यलभ्यप्रथनविधानद्वाराऽध्वर्युकर्तृकत्वनियमार्थस्तत्रमंत्रग्रहणंलिंगप्राप्तानुवादइतिस्तुक्तं
मंत्राधिकरणे॰ ननुप्रथनविधौलिंगप्राप्तस्यमंत्रस्यविधानेप्रयोजनाभावादस्त्वनुवादः इहतुलिं
गात्प्राप्नुवन्मंत्रोगर्दभरशनायामपिप्रसज्येतेतितन्निवृत्त्यर्थत्वेनमंत्रविधेःप्रयोजनवत्वादिहमंत्रांशे
पिविधिःस्यात्॰ नत्वलभ्यपरिसंख्यायाः समाख्यालभ्यकर्तृनियमाविरोधात्वेन नतदर्थत्वेपरिसंख्यार्थ

© Dharmartha Trust J&K. Digitized by eGangotri

त्वं नाभ्युपगंतव्यमिति निर्बंधाभावादिति चेन्न· सत्यमिदं· परिसंख्यालाभार्थमिंत्रस्यापि तद्विधानं विकृति
षु सगुणस्याम्नांग पुनः श्रवणान्यधिकृतस्य विकृतौ शब्दत्वात् प्रधानस्य गुणानामधिकोत्पत्तिसंनिधा
नादिति दाशमिकाधिकरणे प्रदर्शितन्यायेन सहते। एकादश प्रयाजान्यजतीति हिरण्यगर्भः सम
वर्त्तताग्रेभूतस्याघारमाघारयतीत्यादौ यत्र प्राकृतं प्रयाजाघारादिकमंगमप्राकृतसंख्यामंत्रादि
90 गुणयुक्तं श्रूयते तत्र गुणमात्रविधाने प्रकृतगुणस्थाने वैकृतगुणनिवेशमात्रं लभ्यते· यथेहा
श्वाभिधानीग्रहणमात्रविधाने गृह्णेमेधीयाज्यभागविधानन्यायेन तस्य चोदकलोपकत्वाभ्या
कृतांतरपरिसंख्यापि लभ्यते· यथेहमंत्रस्यापि विधाने गर्दभरशनाग्रहणपरिसंख्यापि लभ्य
ते· अथापि तस्मिन्नधिकरणे विशिष्टविधिगौरवपरिहाराय गुणमात्रविधिमंगीकृत्य प
रिसंख्यानिवारिता· एवमिहापि विशिष्टविधिगौरवपरिहाराय कृतनियमार्थमश्वाभिधानीग्र ८०
हणमात्रविधानमंगीकर्त्तं नितु परिसंख्यार्थमंत्रविधानमपीतितेनैव न्यायेन प्राप्नोति· ननु तर्हिमंत्रसं

© Dharmartha Trust J&K. Digitized by eGangotri

रभ्यावादिवमंत्र एवविधीयतां एवमपिविशिष्टविधिगौरवपरिहारलाभाच्चोदकप्राप्तप्रयाजादिवदर्थप्रा
प्तस्यग्रहणस्यअनुवादसंभवादितिचेन् । किंतदाग्रहणमात्रेमंत्रविधिरभ्याभिधानीग्रहणेवा । आद्येमं
त्रलिंगादेवप्राप्तिसंभवाद्विधिवैयर्थ्यं । द्वितीयेविशिष्टानुवादः स्यात् । तथाचविशेषणांशविवक्षयापुनर
पितद्वविधिवैयर्थ्यं । अभ्याभिधानीमात्रेमंत्रविधिरित्यभ्युपगमेप्युक्तएवदोषः विशिष्टानुवादपरि
हारायतत्राप्यश्वविशेषणस्याविवक्षणीयत्वात् । तस्माद्यस्योभयंहविरार्तिमार्छेत्तरस्मयाः सवनी
याः पुरोडाशाः ऐंद्रवायवाग्रंप्रथममहरित्यादिविधिवाक्यभेदाप्रसंगायविशिष्टानुवादस्यपरिहरणी
यत्वादेकादशप्रयाजान्यजतीत्यादिविधिवत्तत्संभवेविशिष्टविधिगौरवस्यापिपरिहरणीयत्वादिहवा
र्थप्राप्तग्रहणाविधानेनकर्तव्यं नियमार्थतयाविधिवारितार्थ्यसंभवाच्चात्रनियमविधित्वमेवन्याय्यं । न
तुपरिसंख्याविधित्वं । नन्वेकादशप्रयाजान्यजतीत्यादिष्वप्रयाजाद्यनुवादस्याप्तिविधीयमानगुणाश्रय
समर्पकतयोपयोगः इहत्विमामगृभ्णन्नितिमंत्रानुवादस्यनतथाप्युपयोगः नचपरिसंख्यार्थत्वेनाप

© Dharmartha Trust J&K. Digitized by eGangotri

न

योगसंभवे अर्थेमंत्रवर्न्निष्फलानुवादत्वकल्पनंयुक्तमितिचेन्नैवं॰अग्नसाम्न्यालभनइत्यत्र द्रव्यदेवता

विशिष्टयागविधिगौरवपरिहारायतान्मयं ज्ञिनकृतानुत्सर्जतीतिपृथगाख्यातयुक्तस्यवाक्यस्यतद्वाक्यु

विधेयस्याज्ञापस्याश्वालंभनोत्कर्षार्थिप्राप्तंतद्विषयव्यापारोपरमाणुवादत्वकल्पनायाः संप्रतिपन्नत्वे

91 नात्रमंत्रविशिष्टग्रहणविधिगौरवपरिहारायपरिसंख्यापरिहारायचमंत्रपत्नीकोपादानमात्रस्या

नुवादकत्वकल्पनायामनुपपत्त्यभावात्॰ तस्माद्विशिष्टविधिगौरवस्यविशिष्टानुवादस्यचपरिहारा

यरशनाग्रहणविधिरेवतस्याध्वर्युकर्तृकत्वनियमफलकोभ्युपेयादितिभावः॰स्यादेतत्माभूत्मं

त्राश्वाभिधानीविशिष्टग्रहणविधिरश्वाभिधानीग्रहणोद्देशेनमंत्रविधिरश्वाभिधान्युद्देशेनमंत्रवि

धिर्वाऽश्वमात्रोद्देशेनमंत्रविधिस्तुस्यात्॰तत्रविशिष्टविधिगौरवस्यविशिष्टानुवादकृतवाक्यभेदस्य

वाऽप्रसक्तेःरशनाग्रहणप्रकाशकस्यमंत्रस्यसाक्षादश्वार्थत्वासंभवात्तदीयरशनाग्रहणद्वारकत्वंप

र्यवस्यतीसमर्थसिद्धार्थानुवादः परमाश्वाभिधानीमादत्तइति॰फलंवास्यविधेःगर्धभरशनानोमंत्रपरि

© Dharmartha Trust J&K. Digitized by eGangotri

संख्येव रशनाग्रहणप्रकाशनद्वारकमंत्राश्वसंबंधस्य मंत्रलिंगतः प्राप्तुं शक्यत्वेन विधिफलत्वायोगात्
तुल्याशंक्या हेतुद्वयोत्राश्व एवेत्यपि न फलवत्तिस्य फलं स्यैविधेयभावार्थको हि विद्यान्विधिमिहतमुपेक्ष्या
न्यसंक्रांतमिष्टं नु· कर्तुर्नैयत्ये समेत फलमपि परिसंख्यावसाय्यस्त्कमामस्त्वष्टा नैषा हि दोषैर्न्विभवति
विधेर्विधिमनर्हेपि यानं· अयमपिपक्षो न समंजसः समानपदोपात्तत्वात्तथा विधाने श्रुतिप्रमाणकसंभ
वति वाक्यप्रमाणकभिन्नपदोपात्तविध्यंगीकारस्यान्याय्यत्वात् नु· मंत्रविधिफलात्परिसंख्यानाक्रूहण
विधिफलस्य कर्तृनियमस्याभ्यर्हितत्वाच्च· ननु ग्रहणविधिलभ्यः कर्तृनियमोपि परिसंख्यापर्यवसायी
व तथा हि अश्वगर्दभरशनयोर्ग्रहणमन्त्राग्रहीताभ्यां ताभ्यामश्वगर्दभयोर्वंध्रमशक्यत्वादर्थप्राप्तं· ननु
प्रत्यक्षश्रुतिविहितं· अर्थप्राप्तेषु व नाध्वर्यवसमाख्यास्तीति समाख्यातः कर्तृनियमात्लाभाद्ध्वर्योरुभ
यत्रापि पाक्षिकाप्राप्तिरूपानियमप्राप्तावप्राप्तांशपरिपूरणरूपो नियमः कृतिविद्धिप्रमाणः स्वयमेव तावत्
सपरिसंख्यात्मतापर्यवस्येत्तत्र हेतुर्निष्यादिनीपक्षप्राप्तकर्त्रंतरनिवृत्त्यापि परिसंख्यात्मतापर्यवस्येदुभय

© Dharmartha Trust J&K. Digitized by eGangotri

यत्रपदस्थत्वाघ्रातानां कर्तृत्वगणं एकत्रानिबद्धनिरूपत्वादितिचेत्. अस्तुनामैवं कर्तृनियमोपिपरिसंख्यापर्यव
सायी. तथापिसापरिसंख्यानदोषत्रययुक्ता। नापिविध्यनर्हविधिमूला. गर्दभरशनालेमंत्रपरिसंख्यानु
दोषत्रययुक्तेत्ययेदर्शयति. विध्यनर्हविधिमूलेतितुस्पष्टमेव. क्रियामन्त्रलक्षणयोर्मंत्राभिसंबंधस्यविधानु
९२ मयोग्यत्वात्. तस्मादुदाहृतविधेः कर्तृनियमफलत्वमेवयुक्तं. ननुमंत्रपरिसंख्याफलकत्वमितिपक्षावः॰
नन्विमामगृभ्णन्नितिमंत्रस्यआध्वर्यवसमाख्यानेनैवतत्प्रकाशस्यग्रहणस्यअध्वर्युकर्तृकनियमः सि
92 ध्यति. अतस्तदर्थमर्थप्राप्तग्रहणविधेरनपेक्षितत्वात्कथस्यार्थवत्वा. तथापरिसंख्याविधिरेवांगीकरणी
यइतिचेत्. मैवं. अध्वर्युद्वारितमंत्रेणान्यस्याप्यनुष्ठेयार्थस्मरणसंभवेनतावतामाग्रहणस्याध्वर्युकर्तृक
त्वासिद्धेः. अतएवमथनमंत्रस्यआध्वर्यवत्वेपिमथनस्याध्वर्यवत्वसिध्यर्थंमथनेविधिरंगीकृतोमंत्राधिक
रणे. अतएवमंत्रकल्यत्वासूत्रहिनौत्येनोपद्रष्टव्यच तस्यानुष्ठेयार्थस्मरणोपायत्वेनपक्षप्राप्तिरपिदर्शिता.
ननुमाभून्मंत्रयोःसमाख्ययाग्रभनरशनाग्रहणयोःअध्वर्युकर्तृत्वसिद्धिः प्रोक्षणावहननयोस्तुकस्यादेव राम॰

© Dharmartha Trust J&K. Digitized by eGangotri

प्रोक्षणमिवध्यासमित्कन्नमपुरुषेणप्रतीयमानस्यमंत्रोच्चारणयित्कर्त्तृत्वस्य वा बाधकाभावेनस्यागाचो
मादिति चेन्न. एवं तर्हि प्रोक्षणावहननविध्योः प्रथममुपपादितं यवपरिसंख्यार्थत्वमेवास्तु माभूत्नि
यमापूर्वविधित्वं. ननु तथा सति व्रीहिशास्त्रं व्यर्थं स्यात्. प्रोक्षणावहननविध्योर्व्रीहिपदस्यापूर्वीयल
लक्षणया यावत्साधारण्यापादने नैव तस्य फलवत्त्वादिति चेन्न. तस्याश्वशफपरिमाणपुरोडाशोत्सादनसम
र्थत्वेन व्रीहिलाभे प्रतिनिध्यनुपादानार्थतया चारितार्थ्यसंभवेन यवसाधारण्यापादनफलकत्वस्यानभ्युप
गंतव्यत्वात्. अपि च. व्रीहिशास्त्रेणापि प्रोक्षणावहननयोर्यवसाधारण्यं कर्तुमशक्यमिति तस्य फलकत्वा
भ्युपगम एव न युक्त इत्यभिप्रेत्याह. यद्यपि हि प्रोक्षणादेर्यवमपि विषयं मन्यते तत्रापि संयुक्तापूर्वेणाद्ध्यान
यनविधिनार्थवत्त्वाद्विधीनां. नो चेन्नैमित्तिकोपि प्रतिनिधिवदित्याद्यो मध्यमोपदेशान्नच्छेत्संमीलनादी
नपि च पृहद्विकृत्यपूर्वाविभेदात्. व्रीहीन्प्रोक्षति व्रीहीनवहंतीति अपूर्वनियमविधुदाहरणायो च व्रीहि
हूशेन विधीयमानं प्रोक्षणं. अवहननं च यवसाधारणं. व्रीहिपदस्यापूर्वीयपरत्वादिति सिद्धांतमर्यादाप्य

© Dharmartha Trust J&K. Digitized by eGangotri

नुपपन्ना। व्रीहिपदस्य मुख्यार्थपरत्वं परित्यज्यापूर्वीयाकारलक्षकत्वं किमर्थं कल्पनीयं· न तावत्तदर्थस्य अ
द्वितीयाश्रुत्यवगतप्रोक्षणावहननसाध्यत्वनिर्वाहार्थं व्रीहीन्प्रोक्षति व्रीहीनवहन्तीति लौकिकप्रोक्ष
९२ णावहननविषयपौरुषेयवाक्य इव तस्य जलसंयोगतुषविमोकरूपलौकिकफलविशिष्टतया साध्य
त्वोपपत्तेः नापि तस्य प्रोक्षणजन्यादृष्टसंस्कारावहनननियमसाध्यत्वनिर्वाहार्थं· तत्साध्यत्वस्याश्रु
तत्वात्· क्रियासाध्यत्वरूपमात्रं हि द्वितीयाश्रुत्यवगतं कर्मत्वं ननु क्रियाजन्यातिशयनियमसाध्यत्वप
र्यन्तं· ननु तथापि प्रोक्षणजन्यसंस्कारावहनननियमयोर्विकल्पपरिहाराय तत्साध्यत्वं व्रीहिश्रुत्युस
93 मर्पितस्यैव वक्तव्यमिति तदर्थमपूर्वीयाकारलक्षणेति चेत्· यद्यपि व्रीहयस्तस्मिन्नपूर्व एव तयोरप्युप
योगसंभवात्· प्राङ्मुखोऽन्नानि भुञ्जीतेत्यत्र हि प्राङ्मुखत्वनियमो भोजनस्यापूर्वार्थत्वाभावेन न क्रत्वपू
र्वीयत्वरूपोपयोगी सन्नपि समर्थयितुमशक्यः सन् लौकिकापूर्वोपयोगी कल्प्यते· इह तु दर्शपौर्णमासि
कप्रकरणान्यपूर्वे विपरिवर्तमानेन तयोस्तदुपयोगित्वं कथं न कल्प्येत· ननु प्रोक्षणावहननयोरपूर्वी ९३

भोजनस्वरूपानुपयोगी २

© Dharmartha Trust J&K. Digitized by eGangotri

यव्रीहावर्थलाभावेन तद्वाक्ययोर्व्रीहिपदं लौकिकापूर्वीयसाधारण्येन व्रीहिमात्रपरं वा स्याल्लौकिकव्री
हिपरं वा॰ आद्ये विधिवैरूप्यापत्तिरपूर्वीयव्रीहिषु प्रोक्षणावहननयोर्विनियुक्तसंस्कारत्वेन गुणकर्म
त्वस्य लौकिकव्रीहिषु भूतभाविविनियोगरहितेष्वर्थकर्मत्वस्य च प्राप्तेः द्वितीये द्वितीयाश्रुतत्वव्यगतद्र
व्यप्राधान्यभंगापत्तिः॰ तस्माद्विधिवैरूप्यपरिहाराय श्रुतगुणप्रधानभावनिर्वाहाय प्रोक्षणावहन
योः सामवायिकांगत्वलाभाय च व्रीहिपदस्यापूर्वीयव्रीहिपरत्वावश्यंभावे सति तत्र लौकिकव्रीहि
व्यावर्तकस्यापूर्वीयत्वस्यावश्यं विवक्षणीयत्वाद्व्रीहित्वस्यापि विवक्षायां विशिष्टानुवाददोषापत्तेर
पूर्वीयत्वस्य च यवसाधारण्यात्प्रोक्षणावहननयोर्यवसाधारण्यमवर्जनीयमिति चेत्॰ मैवं॰ व्रीहि
पदस्य व्रीहिमात्रपरत्वेपि तत्र लौकिकव्रीहिव्यावर्तकस्यापूर्वीयत्वस्यार्थाल्लाभसंभवे न विशिष्टा
नुवाददोषप्रसंगात्॰ तथा हि अधिकारवाक्यस्य प्रकाराकांक्षायामवहननवाक्यस्य फलाकां
क्षायां वावहननवाक्यस्यापि सन्निधादिवाक्यवदधिकारवाक्येनैकवाक्यता कल्पनीया। ततश्च तस्मै

© Dharmartha Trust J&K. Digitized by eGangotri

वमर्थः संपद्यते । अवहननेन व्रीहिद्वारेण स्वर्गार्थदर्शपूर्णमासयागापूर्वं प्रति व्याप्रियेतेति । न चावहननसा
५४ धनभूतव्रीहिद्वारा तत्प्रति व्यापर्तुं शक्यते । तेनार्थाद्यत एव यागार्थं निरूप्ता व्रीहयस्तेषामेवावहननमिति
व्यवस्थासिद्धिः । एतेन प्रोक्षणमपि व्याख्यातं । एवमर्थाल्लभ्ये प्रोक्षणावहननयोरपूर्वसाधनव्रीहिवि
न ५ षयत्वे व्रीहिपदस्य सकलव्रीहित्वपरित्यागेनापूर्वसाधनत्वेन लक्षणा कल्पयितुमुचिता । अवश्यं च लौकिकस्या
धारण्येनाकारेण शब्दसमर्पितस्यैवापूर्वीयपदार्थसंस्कारकर्मान्वयबोधेन सति तदनंतरं तस्यापूर्वीयत्वा
९५ वगतावर्थात्संस्कारस्यापूर्वीयविषयत्वपर्यवसानमिति स्वयं न्यायपरिप्लवेऽपि प्रसिद्धमानयनीसत्रांगीक
रणीयः । तत्र हि पयःसंस्कारतया दध्यानयनं विधीयते । न चैतद्धि किं कर्मत्वेन पयसः कर्मत्वावश्यंभावात् ।
पयोऽदध्यानयनेन व्याप्यं प्रधानकर्मेति तत् । तस्य दध्यानयनाधारत्वस्य सप्तम्या निर्देशः । ननु दध्यानय
नयनसंस्कृतं पयः सा वैश्वदेव्यामिक्षेति तदनंतरवाक्ये प्रधानपरामर्शिना तच्छब्देन परामृश्य देवतासं
युक्तं क्रियते तद्वाक्यसिद्धेन च द्रव्यदेवतासंयोगेन यागोऽनुमीयते । तत्र संस्कारवाक्यप्रवृत्तिवेलायां ५४

© Dharmartha Trust J&K. Digitized by eGangotri

पयसोऽनुमास्यमानयागापूर्वार्थत्वानवगतेः पयस्त्वेनशाब्दसमर्पितएव पयसिसंस्कारधर्मध्यानयना
न्वयबोधः तदनंतरंसंस्कृतस्यपयसोदेवतासंयोजनेमतिद्रव्यदेवतासंयोगानुमितयागापूर्वार्थत्वा
वगतेसंस्कारस्यार्थादपूर्वीयविषयत्वपर्यवसानं· एवमिहापिप्रोक्षणावहननवाक्यश्रवणादशायां
केवलंव्रीहित्वेनसमर्पितेषुव्रीहिषुप्रोक्षणावहननान्वयः· तदनंतरंतद्वाक्ययोरधिकारवाक्यैकवा
क्यतादशायांप्रोक्षणावहननयोरपूर्वार्थत्वावगतेतयोरर्थादपूर्वीयविषयत्वपर्यवसानमितियुज्य
तएव· अपिचतयोरपूर्वार्थत्वावगत्यनपेक्षायामप्यपूर्वीयव्रीहिविषयत्वमर्थाल्लभ्यते· यस्योभावनुगता
वग्नीनिम्लोचेदप्युदिवाद्यापुनराधेयंतस्यप्रायश्चित्तिरित्यत्रहविरार्त्यधिकरणन्यायेनश्रुतस्याग्न्युभय
त्वस्याविवक्षयान्यतराग्न्युन्मनेऽपिपुनराधानप्रसक्तौश्रौतान्वयबोधवेलायामुभयवत्प्रहारेणाग्न्यनुगम
नुग २ मात्रस्यनिमित्तत्वावगतावपिनिमित्तविधीयमानसमाधानंसमुदितयोरग्न्योरुत्सादनक्षणमंतरेणैकैकस्या
यनेदितिविधेयसामर्थ्यादुभयाग्न्यनुगमस्यनिमित्तत्वलाभः· तथेहापिद्वितीयाश्रुतिनिर्दिष्टव्रीहिषु

© Dharmartha Trust J&K. Digitized by eGangotri

एतत्पाविधीयमानं प्रोक्षणमवहननं च भूतभाव्युपयोगरहितलौकिकव्रीहिविषयं भवितुं न योग्यमिति
८५ विधेयस्य सामर्थ्याद्वाक्यान्वयबोधानंतरमपूर्वीयव्रीहीणां विषयत्वलाभः संभवतीति किमनुपपन्नं· अवश्यं
चात्राप्येवमेवोपपादनीयं· अन्यथा प्राग्वाक्यान्वयबोधावेलायामपूर्वीयत्वविवक्षायां तस्य जुह्वादिसाधा
95 रण्याजुह्वादिष्ववहननस्य कृष्णलश्रपणवद्दृष्टार्थताया वक्तव्यत्वाद्विधिवैरूप्यापत्तिस्तंडुलश्रपणा
दिकापूर्वीयत्वविवक्षायां विशिष्टानुवाददोषापत्तिं वा को वारयिता· अपि च यद्व्रीहिषु विहितमवहनना
दिकमपूर्वीयत्वलक्षणयाप्ययेष्वपि स्यात्· न ह्येवं सोमे विहितं क्रयादिसंस्कारजातं फलचमसेऽप्युपदेशत ए
व स्यात्· हविः प्रकृतित्वेन सोमयागापूर्वसाधनत्वस्य तत्रापि सत्त्वात्· ननु निसस्य क्रयादिसंस्कारजातस्य अ
धिकारान्वये निमित्तत्वादनिसः फलचमसोद्धारं भवितुं नार्हतीति स्वयं च विशेष्यतया तेनान्वेतुं नार्हतीति· न च
त्वभिषवेण निसंज्योतिष्टोमस्यापकर्षादिनिसफलचमसद्वारेति युज्यते· नापि निसाभिषवविशिष्टे न फ
लचमसमेलाकारेणासवाक्यार्थान्वयी स्यात्· सोमं क्रीणातीत्यादिना निमित्तवाक्येनेति युज्यते· तस्मान्नि

८५

© Dharmartha Trust J&K. Digitized by eGangotri

त्यानित्यसंयोगविरोधान्न फलचमसस्य सोमसमानविधत्वमिति चेत्स्यादेवं यदि फलचमसत्वाकारेण
सवाक्यार्थान्वयी स्यात्· सोमं क्रीणातीत्यादिसंस्कारवाक्येषु सोमपदलक्षितापूर्वसाधनत्वाकारेण
सवाक्यार्थान्वयी विकृः प्रसंगो नित्यानित्यसंयोगविरोधस्य· सर्वत्रापि ज्योतिष्टोमप्रयोगे हविः प्रकृति
त्वेन तदपूर्वसाधनभूतः फलचमसः सोमो वास्त्येव यद्येवमपि फलचमसस्यासाधारणरूपेणानित्य
त्वमालोच्य नित्यानित्यसंयोगविरोधः शीकेयत तदा व्रीहिसोमादिश्रुतिनिधिनीवारपूतीकादीनामपि त
त्संस्कारोपदेशेषु सामानविध्यं न सिध्येत्· ननु व्रीहिसोमादिमुख्यालाभे नीवारपूतीकाद्याः स्वयमे
व तत्स्थाने नोपादीयंते ये न तदुपादानस्य मुख्यालाभे निमित्तकत्वेनानित्यत्वान्नित्यसंस्कारान्वये
नित्यानित्यसंयोगविरोधो भावेत्· किंतु व्रीह्यादिसदृशेषु नीवारादिषु ये व्रीह्याद्यवयवास्त एवोपा
दीयंते· ते च व्रीह्याद्यनुप्रविष्टतत्तदवयववत्तू व्रीह्यादिशास्त्रमुख्यार्थ एवेति न नित्यानित्यसंयोगविरोध
प्रसक्तिरिति चेत्· एवं तर्हि मुख्यप्रतिनिधिभयलाभे कदाचिदिच्छयाप्रतिनिध्युपादानमपि प्रसज्येत· व्री

© Dharmartha Trust J&K. Digitized by eGangotri

स्यादिशास्त्रमुख्यार्थताविशेषात्. ननु मुख्यप्रतिनिध्यो व्रीह्याद्यवयवभूयस्त्वाल्पताभ्यामस्ति विशेषः.
तथा च व्रीह्यादिगतसमग्रावयवोपादानसंभवे नीवारादिगतविकलावयवोपादानं प्रसज्यत इति चेत्:
तर्हि व्रीह्यादिगतसमग्रावयवालाभनिमित्तमेव नीवारादिगतविकलावयवोपादानमिति कथं नित्या
नित्यसंयोगविरोधो न भवेत्. किंच सोमाभावे पूतीकानभिषुणुयादिति विधिनाप्येवमेव पूतीकानां
सोमाभावनिमित्तकत्वमवसीयते. नन्वत्र सोमाभावे निमित्ते पूतीका न विधीयन्ते किं तु सोमाभावेन
सुसदृशानामन्येषामेव बह्ववयवलिप्सयोपादाने प्राप्ते तेन मंदसदृशाः पूतीका नियम्यन्त इति स्थली
यपष्ठयोरुक्तमिति चेत्. किं ततस्तेनापि नैमित्तिकत्वमेवायातमिति सप्तमीश्रुतिप्राप्तं सोमाभावस्य नि
मित्तत्वं पूतीकानां तत्कृतसोमावयवानां साधनत्वे किंचिदपि भिद्यते. तस्मात्तत्रैवं नित्यानित्यसंयोगविरो
धः परिहरणीयः. यद्यपि नीवारपूतीकादिगतव्रीहिसोमाद्यवयवास्तदाधाररूपेण मुख्याल्पत्वनि
मित्तकत्वादनित्यास्तथापि प्रोक्षणादिशास्त्रगतव्रीह्यादिपदतात्पर्यविषयेण साधारणरूपेणानित्या

© Dharmartha Trust J&K. Digitized by eGangotri

एवेति· अयं परिहारो नैमित्तिके फलचमसादावपि समानः एवमेव हि यदाहवनीये जुहोतीत्यादिष्वपि
नित्यानित्यसंयोगः परिहरणीयः· अन्यथा लब्धाप्याहवनीयस्येष्टिकसोमिकाद्यपूर्वार्थत्वं निरसिष्येत्
सर्वदाम्नानान्नारिष्टहोमादिद्वारे वस्याहुतिभेदनादिनिमित्तकहोमानामाहवनीयासाधारणत्वं निरसि
ष्येत्· क्वचित्तर्हि नित्यानित्यसंयोगविरोधः यत्रानित्यमेकमेव द्वारं भवतीति नैव· यथाभिन्ने जुहोती
ति· अत्र हि होमो भिन्नाधिकरणकस्तत्संस्कारश्चेति पूर्वपक्षे भिन्नद्रव्यस्य संस्कार्यपरत्वया निमि
त्तपरत्वाभावेन होमो नित्यः स्यात्· द्वारं तु भिन्नमनित्यमेवेति नित्यानित्यसंयोगविरोधस्तस्मात्प्रति
निधीनां मुख्यसामान्यविधर्म्य। नैमित्तिकानां नित्यसामानं विधर्म्यभावं च व्यवस्थयाभ्युपगच्छन्ति मीमां
सकैः संस्कारवाक्यगतव्रीहिसोमादिपदानामपूर्वीयत्वलक्षणां परित्यज्य मुख्यार्थपरत्वमेवाभ्यु
पत्यातिनिधिगतमुख्यावयवानां व्रीह्यादिगततदवयवानामिव व्रीह्यादिपदमुख्यत्वान्मुख्यसामानवि
धं· फलचमसस्य सोमपदविषयत्वाभावान्न सोमसामानविध्यं इत्येव साध्यमाव्यवस्थापपादनीया·

© Dharmartha Trust J&K. Digitized by eGangotri

प्रतीयतेचतत्तद्धिकरण्यपर्यालोचनयातथैवाभ्युपेत्यसाम्यवस्थापपादितेति· कथमितिचेत्‌·उच्यते·
नैमित्तिकमतुल्यत्वादसमानविधानंस्यादितितत्रीयाधिकरणेयदिराजन्यं वैश्यंवायाजयेत्सयदिसोमं
८१ विभक्षयिषेन्यग्रोधस्तिभिनीराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मैभक्षं प्रयच्छेन्नसोममितिवाक्यमुदा
हृत्याग्नेयात्रैजन्यवैश्यनिमित्तेनसोमस्थानेविधीयमानः फलचमसः संस्कारवाक्येषुसोमेनसमानवि
९७ धानोनवेतिसंशयापूर्वीयत्वाविशेषात्समानविधानइतिपूर्वपक्षंकृत्वानित्यमविकृतेनज्योतिष्टोमे
स्योपकुर्यान्नैमित्तिकफलचमसद्वारेणेवमन्येयनित्यानित्यसंयोगविरोधादसमानंइति सिद्धांति विधा६
तं· अनेनापूर्वीयत्वमर्थाल्लभ्यंनसोमपदविषयइतिपूर्वपक्षबीजमाभासंमत्वाफलचमसस्यफल
चमसत्वाकारेणसंस्कारवाक्येषुसोमपदविषयत्वंनसंभवतीतिदूषणंचस्पष्टत्वादुपेक्ष्यतस्यतथा
तद्विषयत्वसंभवेपिनित्यानित्यसंयोगविरोधादुपदेशातःसंस्कारान्वयोनयुज्यतइतिप्रतिपादितमित्य
वसीयते· अन्यथापूर्वीयत्वाकारेणफलचमसस्यसंस्कारवाक्यानुप्रवेशमाशंकितंप्रतिफलचम ८१

© Dharmartha Trust J&K. Digitized by eGangotri

सत्वाकारेणानित्यानित्यसंयोगविरोधोद्भावनायोगात् . तथा प्रतिनिधिश्च न तद्वदिति तदनंतराधिकरणे
व्रीह्यादिप्रतिनिधयोपि व्रीह्यादिभिर्न्नसमानविधानाः व्रीह्याद्यभावे निमित्तेनोपादीयमानत्वेन नैमि
त्तिकत्वया फलचमसतुल्यत्वादिति पूर्वपक्षं कृत्वा मुख्याभावे नीवारादीनां यागसत्वेनोपादीयत्वेन तत्कृ
ताव्रीह्यवयवा एवानुसक्तत्वासंभवाद्धि कलत्वाउपादीयंते . नीवारावयवोपादानं त्वनुषंगादपर्जनीय
तया । व्रीह्यवयवाश्च व्रीहिगता इव नीवारगता अपि व्रीहिधात्वेव विषयतया संस्कारविधिरन्विताएवातः
समानविधानाइति न तद्वत्स्ययोजनैकत्वादिति सूत्रेण सिद्धांतितं . अनेनापि संस्कारवाक्येषु व्रीह्या
दिशब्दानां मुख्यार्थविवक्षास्य एवावसीयते . अपूर्वीयत्वविवक्षायां नीवारादिकस्याप्यपूर्वीयत्वे
न संस्कारत्वे विध्यन्वयस्य स्वरूपपादनया तेषां साधनत्वनिराकरणस्यानुपयोगप्रसंगात् . स्यादेत
न्नैमित्तिकप्रतिनिध्यो नित्यानित्यसंयोगविरोधप्रसंगतदप्रसंगेन मूलयुक्तित्वेनासमानविध्य
श्वस्यापको । किं बुद्धिस्थकेप्रसंगतदप्रसंगो . तथाहि . नित्यं नैमित्तिकं च न युगपद्विधेयं . किंतु नित्यं

© Dharmartha Trust J&K. Digitized by eGangotri

सोमादि इत्यंसामान्येनविधाय सर्वत्रतस्यैवप्राप्तौराजन्यादिनिमित्ते सतिविशेषरूपेणनैमित्तिकंफ
लचमसत्वादिविधेयं· नद्यस्यांवेलायांस्वाभाविकनित्यांगंविधेयंतस्यामेवसंस्कारविधयस्तन्मात्र
विशेषणत्वेनस्वार्थंविधायनिरतत्वापारानभूयः शक्नुवंतिनैमित्तिकविशेषणत्वेनापिस्वार्थविधानु
मात्रप्रसंगात्· इत्येवं द्विरुक्तिप्रसंगोनैमित्तिकस्यासामानविध्यव्यवस्थापकः॥ नहिसामान्यविशेषरू
पेणभिन्नविधिविषययोर्नित्यनैमित्तिकयोरिवमुख्यप्रतिनिध्योर्व्रीह्यादिपदविषयत्वाविशेषात्व्री
हिभिर्यजेतेत्याद्येकविधिविधेययोर्विधानायोगपद्यमस्तियेनद्विरुक्तिराशंक्येत· एवंद्विरुक्त्यापाद
कंविध्ययौगपद्यमेवातुल्यत्वादितिनैमित्तिकाधिकरणसिद्धांतेहेतुपरत्वेननविवक्षितं· द्विरुक्तिरू
पापनायकंविधानैक्यमेवतत्प्रयोजनैकत्वादितिप्रतिनिध्यधिकरणसिद्धांतेहेतुपरत्वेननविवक्षि
तं· विधानंहिवाक्यस्यप्रयोजनमितिवेदेउच्यते· एवमपूर्वीयत्वविवक्षाविरोधानापेतत्वयस्यां
वेलायांव्रीहिभिर्यजेतनिशाऽत्रप्रवर्ततेतस्यामेववेलायांव्रीह्यादिविशेषणत्वेनसंस्कारवाक्येरवह

© Dharmartha Trust J&K. Digitized by eGangotri

ननादीनि समर्थ्यमानानि व्रीहित्वादिनैव तदन्वयं लक्षेरन्नापूर्वीयत्वेन । तस्य व्रीहिशास्त्रादिप्रवृत्तेः पूर्व
मनवगमात् । ननु तर्हि व्रीहिशास्त्रादिप्रवृत्त्यनंतरमेवावहननादीनां तदन्वयोस्तु । तथा व्रीहिशास्त्रा
द्यवगतापूर्वीयत्वाकारेण तेषां व्रीह्यर्थानां त्वन्वय उपपद्यते । यवशास्त्रस्याप्यनैमित्तिकत्वेन व्रीहिशास्त्रे
ण समकालप्रवृत्तिकतया यवानामप्यपूर्वीयत्वेन क्रोडीकाराद्यवसाधारण्यमपि तेषामुपपद्यते । नै
मित्तिकशास्त्राणां तु निमित्तशास्त्रप्रवृत्त्यनंतरभावित्वेन संस्काराणां तिस्रान्वयवेलायां नैमित्तिकगतापू
र्वीयत्वानवगत्यात्तत्साधारण्याभावश्चोपपद्यत इति सर्वं समंजसमिति चेत् । एवं ह्यनैमित्तिकत्वेन यवशा
स्त्रवदेव व्रीहिशास्त्रसमकालं प्रवृत्तियोग्यानामवहननादिशास्त्राणां यवसाधारण्यार्थमिव यवशा
स्त्रस्यापि प्रवृत्त्यनंतरं प्रवृत्तिरभ्युपगम्यतां तस्मात्तेषां नित्यधर्माणां नैमित्तिकसाधारण्यार्थं नैमि
त्तिकशास्त्रस्यापि प्रवृत्त्यनंतरं संस्कारवाक्यानां प्रवृत्तिरित्यपि कुतो नाभ्युपगम्यते । वस्तुतस्तु व्रीहिभि
र्यजेतेत्यादिशास्त्रे मुख्यानां व्रीह्यादीनामिव नीवारादिगत व्रीह्याद्यवयवानां तदपूर्वीयत्वं सिध्यति । व्री

© Dharmartha Trust J&K. Digitized by eGangotri

९९ हिलादिजातिविशिष्टानां व्रीह्यादिशब्दानां तदवच्छिन्नव्रीह्यादिलक्षकत्वस्यैव न तदनवच्छिन्ननीवा
रादिगतव्रीह्यादिभावयोग्यावयवलक्षकत्वस्यासंभवात्। किंतु व्रीहिशास्त्राद्यनुसारेण मुख्येष्वेव
व्रीह्यादिष्ववश्यमुपादानत्वेषु नित्यमारब्धकाम्यकदाचिद्व्रीह्याद्यलाभेप्यवश्यमनुष्ठेयमिति प्रधा
नानुसारेण यत्किंचिद्द्रव्याक्षेपे च प्रसक्ते व्रीह्यादिजात्यनवच्छिन्नेपि तदवच्छेद्यत्वयोग्यतया मुख्यसं
निकृष्टानां नीवारादिगतव्रीह्यादिभावयोग्यावयवानां संभवेपि प्रकृष्टद्रव्यान्तरोपादानायोगात् ए
वोपादेयमित्येवंरूपादाक्षेपात्तेषामपूर्वीयत्वं सिध्यति। सोमाभावे तु पूतीकस्य यवालिप्सया स्वसदृशा
क्षेपप्रसक्ते पूतीकोपादानमाक्षेपवत्स्यापवादकेन वचनान्तरेण सिध्यति। एवं तत्र यदि मुख्यशास्त्र
प्रवृत्त्यनंतरमेव संस्कारशास्त्राणि प्रवर्तेरंस्तदा मुख्याभावनिमित्तेसत्याक्षेपवचनान्तरावगम्यापूर्वी
यतोभावानां प्रतिनिधीनामुपदेशतः संस्कारान्वयो न सिध्येदिति न सिध्यन्मुख्यशास्त्रप्रवृत्त्यनंतरभा
विनामाक्षेपवचनान्तराणामपि प्रवृत्तिमपेक्ष्यैव संस्कारशास्त्रप्रवृत्तिरेष्टव्या। तथा तैः सति वै नैमित्तिका
नामपि नित्यसामान्यविध्यमापतितानां निवारयितुं शक्यते। नन्वेवं सत्यपूर्वीयत्वलक्षणाक्षेपनैमित्तिकानां नित्य ९९

99

सामानविधंस्यादिति दूषणमिव मुख्यार्थविवक्षापक्षे प्रतिनिधीनां मुख्यसामानविधानं स्यादिति दू
षणमापन्नम्॰ व्रीहिसोमादि विधायकशास्त्रस्थितानामिव तत्संस्कारविधायकशास्त्रस्थितानामपि
व्रीहिसोमादिशब्दानां मुख्यमात्रपरत्वेन प्रतिनिधिसारूप्याभावादिति चेत्॰ उच्यते॰ व्रीहिसोमादिसं
स्काराणां द्वितीयाश्रुत्यादिभिर्व्रीह्याद्यर्थत्वेनावगम्यमानानां प्रकरणप्रकरणत्वं तन्त्रदधिकारापूर्वा
र्थत्वस्य व्रीह्यादिद्वारैव निर्वहणीयत्वाद् अपूर्वसाधनेतरव्रीह्यादीनां वतत्र द्वारत्वायोगात्॰ अपूर्वसा
धनव्रीह्यादिगवेषणायां व्रीहिभिर्यजेत सोमेन यजेतेत्यादिशास्त्रे व्रीह्यादियदृच्छ न्यायेन वच नांतर
पात्तनीवारपूतीकादिभावयोग्यावयवा अपि तत्साधनत्वेनावगम्यन्त इति तेषामपि संस्कारान्वयि
त्वद्वारत्वनिर्वाहाय संस्कारवाक्यगतव्रीह्यादिशब्दानां व्रीहित्वादिजातिवाचिनां साक्षात्तत्तदवच्छि
न्नव्यक्तिमात्रलक्षणामपहाय साक्षात्परंपरया तदवच्छेद्यत्वयोग्यमात्रेण लक्षणा कल्प्यते। नीवा
रादिगतव्रीह्याद्यारम्भकावादि योग्यावयवास्य व्रीह्यादिगतावयवाइव व्रीह्यादिव्यक्तिव्यवहारात् तदवच्छेद्यत्व

© Dharmartha Trust J&K. Digitized by eGangotri

योग्याएवेतिप्रतिनिधीनांमुख्यसामान्यविधेनकदाचिदनुपपत्तिः यद्यपिप्रथमोपस्थितव्रीह्यादि
१०० द्वारैवसंस्काराणामधिकारपूर्वार्थित्वंनिर्वहतितथापिपश्चादपिन्यायादिनापूर्वसाधनत्वेनावगम्यमा
नानांनीवारादिगतव्रीहित्वाद्यदियोग्यायवानामवहननादिनियमेसंभवत्यनियमस्यान्याय्यत्वाद
100 वहननादिनियमाकांक्षायांतत्साधारणलक्षणयातेषामपिसंस्कारान्वयः कल्प्यते यथाप्रथमप्रवृत्तो
पदेशात्वद्धमप्रकृत्यन्वयनिराकांक्षाणांप्रयाजादीनांसौर्यचर्वाकांक्षानुसारात्याश्चायेनातिदेशोनतद
न्वयोकल्प्यते नचैवंयवफलत्वमसाद्याकांक्षानुसारात्तत्साधारण्याव्रीहित्वसामादिसंस्काराणां
तदन्वयोपिकल्प्यःस्यादितिवाच्यं व्रीहित्वसामादिशब्दानांनीवारपूतीकादिगतव्रीहित्वसोमाद्यवयवे
ष्विवयवफलत्वमसादिलक्षणाहेतोःप्रसिद्धसंबंधस्याभावात् यथाकथंचिदप्रसिद्धेनसंबंधेनल
क्षणाल्पनादृत्तिर्यतोलौकिकसिद्धावहननमखविदलनादिभिस्तदाकांक्षापूरणसंभवमुक्तत्वात् अतएव
वनास्मिन्नपीदृग्भूतेतप्रतिषव्रीहीणांमेधसुमनस्यमानन्नतिपुरोडाशप्रतिष्ठापनमंत्रगतव्रीहिपदस्यव्री
१००

© Dharmartha Trust J&K. Digitized by eGangotri

हि प्रतिकृतपुरोडाशेषु लक्षणाहेतोः प्रसिद्धसंबंधस्य सत्वात्तस्य मंत्रस्य प्रवृत्तिर्ननु यववमयपुरोडाश
इति तस्मिन्ननु छेयार्थप्रकाशनमनियते न लौकिकोपायेनेत्यंगीकृतं· धान्यमसि धिनुहि देवानिति
९२ मंत्रेण वसंतुषद्रव्यवाचिनो धान्यशब्दस्य वितुषावस्थायां प्रसिद्धसंबंधसत्वे न लक्षणायाः प्रवृत्तिमं
गीकृत्य श्यामाकचानामयनेतरस्मिन् यपुरोडाशेषु प्रसिद्धसंबंधाभावाल्लक्षणा न संभवतीति मांसम
सीमूह एवोक्तः· अयाजादीनामपि प्रसिद्धदर्शपूर्णमाससंबंधवत्कसोपविवादिष्वेवान्वयः कल्प्य
ते· ननु नद्धहितेषु दर्वीहोमादिष्वपि यथाकथंचित् प्रसिद्धसादृश्यान्वेषणे न· दर्वीहोमादीनामि
तिकर्तव्यताकांक्षा त्वर्थलभ्यस्वरूपानिष्यादिनैव पूर्यते· तस्मादवहननादिवाक्यगतव्रीह्यादि
शब्दानां व्रीह्यादिस्वरूपपरत्वपक्षे प्रतिनिधिनैमित्तिकयोः सामान्यविध्यासामान्यविध्यवस्थापनं के
षांचिन्मीमांसकानां प्योपपद्यते· तेषामपूर्वीयत्वलक्षणापदेनु कथमपि सा नोपपद्यत इति शेषो विद्व
द्भिः परिभावनीयः· अपि च· यदग्नौ हि वृत्तिव्रीहितं प्रोक्षणावहननमपूर्वीयत्वलक्षणायायवेष्वपि स्या

© Dharmartha Trust J&K. Digitized by eGangotri

न्नदृष्ट एककृत्स्नपूर्वसाधने रथंतरे विहितं मीलनादिकं तदपूर्वसाधने बृहत्यपि प्रसज्येत · ननु रथंतरे प्रस्तूय
१०९ माने संमीलयेद् इति प्रस्तूयमाने समुद्रं मनसा ध्यायेद् इति मीलनादिषु समुद्रध्यानादिषु रथंतरबृह
न्निर्देशभेदान्मीलनादयो रथंतरस्यैव धर्माः समुद्रध्यानादयो बृहत एवेति धर्मव्यवस्था भवति · उक्तं च
101 नवमे सूत्रकृता । निर्देशाद्व्यवतिष्ठेरन्निति · न तथेति व्रीहीणां यवानां च व्यवस्थया धर्मविधानमस्ति ·
येन व्रीहिधर्मा यवेषु न स्युरिति चेत् · मैवं · निर्देशभेदे सत्यपि न वापूर्वीयत्वलक्षणावश्यंभावेन मील
नसमुद्रध्यानादिधर्मसांकर्यस्य प्रतिक्षेप्तुमशक्यत्वात् · तत्र निर्देशभेदस्यासारस्य निर्वाहार्थमपूर्वीय
त्वलक्षणं विनापि धर्मविधानोपपादने तथैव प्रोक्षणादिविधानस्याप्युपपादनसंभवेन व्रीहिपदा
नां मुख्यार्थत्यागायोगात् · न चापूर्वीयत्वलक्षणाया सत्यामपि निर्देशभेदनिर्वाहार्थं रथंतरत्वादिक
मपि विवक्षितुं शक्यं · वाक्यभेदाद्वहस्य विशिष्टानुवाददोषस्यावश्यपरिहरणीयत्वात् · स्यादेतद् यद
ग्नये च प्रजापतये च सायं जुहोति यत्सूर्याय च प्रजापतये च प्रातर्जुहोतीति निर्देशभेदादेव सायंप्रा
१०९

© Dharmartha Trust J&K. Digitized by eGangotri

नहोमयोरग्निसूर्यव्यवस्था दृष्टा· नहि तत्र होमयोः सायंप्रातर्विशेषणे विवक्षितुं शक्ये विशिष्टानुवा
ददोषापत्तेः॰ न च सायंप्रातःशब्दाभ्यां लक्षितयोर्होमयोस्तत्राग्निसूर्यविधानं जुहोतीति तल्लक्षितहोमा
नुवादमात्रं नोद्देश्यसमर्पकं· तथा च सायंप्रातःशब्दौ स्वार्थसंबंधिनोरेव होमयोर्लक्षकौ भवतो ननु
होमांतरयोरिति नाग्निसूर्ययोर्व्यवस्थाप्रसंग इति वाच्यं· सायंप्रातःकालयोरेकस्यैव होमस्याभ्य
स्यमानतया होमभेदाभावे न सायंप्रातःकालोपलक्षितस्याग्निहोत्रहोमस्य प्रातःसायंकालेऽप्यु
नपायितया· नपायतोहि कालस्य लक्षणंहि पुरोडाशाविति न्यायादापत्तेरग्निसूर्यसांकर्यस्यानिवार्यत्वा
त्· सायंप्रातःकालविशिष्टहोमलक्षणायामपूर्वीयत्वे हि लक्षणायामपि विशिष्टानुवाददोषाप
त्तेः तस्मान्निर्देशभेदमात्रमेवावलंब्य तत्र व्यवस्थाप्युपपादनीया एवमिहापि भविष्यतीति चेत्· मै
वं· न ह्यग्निसूर्यवाक्ययोरग्निसूर्यविधानं तत्र प्रजापतेरेव विधेयत्वात्· अग्निर्ज्योतिरग्निर्ज्योतिरग्निः
स्वाहेति सायं जुहोति सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातरिति च तत्र विनियुक्तमंत्रवर्णप्राप्ताग्नि

© Dharmartha Trust J&K. Digitized by eGangotri

सूर्यानुवादेन प्रजापतिमात्रविधाने संभवति तयोरप्यत्रैव विधानस्वीकारे गौरवात्· तथा च प्रजाप
१०२ तेः कालद्वयेपि सत्वेनाग्निसूर्ययोः कालव्यवस्थाग्निं नपेक्षणाग्निं दर्शनव्यवस्थायां नैतदुदाहरणं
न च वास्यं होममात्रानुवादेन प्रजापतेरेकस्यैवात्र विधीयते वाक्यद्वयं व्यर्थमिति· अग्निवाक्येन प्र
102 जापतिविधानेन त्वग्नेः सायंकालसंबंधेन प्रजापतिकृत्यर्थतावत्सूर्यवाक्यस्यापि सूर्यप्रातःका
लसंबंधेन तत्त्वसमर्थितोपपत्तेः एवमपि सूर्यवाक्यमर्थवादरूपमनर्थकं प्रायेस्यादिति चेत् न· अग्निसूर्य
धा र्यवाक्याभ्यां सायंप्रातर्होमयोर्व्यवस्थाग्निसूर्यविधानेऽग्निसूर्यमंत्रो लिंगादेव सायंप्रातः कालयो
र्व्यवतिष्ठेते इति तद्व्यवस्थापकवचनयोरनपेक्षणात् तयोरुभयोरप्यर्थवादो वेति मंत्राधिकरणसूत्रोक्त
रीत्यार्थवादतान्युपगमस्यैव युक्तत्वात्· न च वाक्यमग्निर्ज्योतिः ज्योतिः सूर्यः स्वाहेत्येव सायंहोतव्यं सू
र्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातरिति मिश्रलिंगपर्युदस्तयोः शुद्धलिंगमंत्रयोः प्रतिप्रसवार्थं तद्विधा
यकवचनद्वयमिति· अग्निवाक्येनाग्नेः सायंहोमे सूर्यवाक्येन सूर्यस्य प्रातर्होमे च व्यवस्थया विधाने सति १०२

© Dharmartha Trust J&K. Digitized by eGangotri

शुद्धलिंगवचनमेवसायंप्रातर्होमयोर्लिंगाद्व्यवस्थयाप्राप्नोति· ननुमिश्रलिंगवचनद्वयंलिंगाविशे
षादित्यपेक्षितंतद्व्यवस्थार्थत्वेनसप्रयोजनस्यमिश्रलिंगविधिद्वयस्थानेपठितेअग्निहोत्रप्रकरणा
म्नानावगतंतदंगभावस्यशुद्धलिंगमंत्रद्वयस्यपर्युदासेव्यापारेभावेतस्मातिप्रसवानपेक्षणात्·
एवंतर्हिमिश्रलिंगमंत्रविधिद्वयंशुद्धलिंगमंत्रविधिद्वयंवतत्रोदाहरणंस्यादितिचेन्न· मैवंतेषां
मंत्राणांस्वाहाकारलिंगेनहोमांगतयावगतानामाज्यभागक्रमाम्नातानांयाज्यानुवाक्यानामि
वकेवलंकालयोरेवव्यवस्थापनस्यापेक्षितत्वेनतस्माद्वार्त्रघ्नीपौर्णमास्यामनूच्येतेवृधन्वतीअ
मावास्यायामितिवन्नमिश्रलिंगशुद्धलिंगमंत्रविधीनांतत्कालसंबंधमात्रपरतयाततएवमंत्र
लिंगव्यवस्थासिद्धेः। तस्माद्विशिष्टानुवादानपेक्षायाव्यवस्थायानिर्देशभेदमात्रात्सिद्धौनेदम
प्युदाहरणं· ननुनिर्देशभेदमात्राद्व्यवस्थासिद्ध्यसंभवेपिअपूर्वभेदाद्धेतुद्वयंतद्धर्माणांव्यव
स्थासिध्येत्· अपूर्वभेदश्चहस्तदृष्टंभवतिरथंतरंदृष्टंभवतीत्यत्रनिवाक्यभेदेनश्रूयत्वविकल्पा

© Dharmartha Trust J&K. Digitized by eGangotri

दिस्कलि प्रकारभेदेन बृहद्रथंतरसाधनपृष्ठस्तोत्रभेदसत्वात् अपूर्वसाधनकभेदसत्त्वपूर्वभेदावश्यं
भावात् । नचैवं सत्यपूर्वार्थयोर्बृहद्रथंतरपृष्ठयोः प्रयाजादिवत्समुच्चयापत्तिः । वचनबलाद्विकल्पोपप
त्तेरिति चेन्न । मैवं । पृष्ठैः स्तुवत इत्येतदेवमाहेन्द्रादीनां चतुर्णां स्तोत्राणामुत्पत्तिवाक्यं । बृहद्रथंतर
103 वाक्यद्वयं तु माहेन्द्रस्तोत्रे साधनमात्रविधायकमित्यपपन्नो विशिष्टविधिगौरवस्य माहेन्द्रस्तोत्रतद
पूर्वभेदकल्पनागौरवस्य वाभ्युपगन्तुमयुक्तत्वात् । ननु पृष्ठैः स्तुवत इत्येतदुत्पत्तिवाक्यमंगीकृत्य
माहेन्द्रादीनां चतुर्णां स्तोत्राणां पृष्ठशब्दवाच्यत्वमुच्यते चेत्प्रकृतोपपृष्ठबहुत्वं नास्तीति साप्तमिक
सूत्रभाष्यविरोधः प्रसज्येत । अतो बृहद्रथंतरवाक्यद्वयमिवोत्पत्तिवाक्यं तदुत्पन्नं वचनवशाद्विक
ल्पितं स्तोत्रद्वयमेव पृष्ठशब्दवाच्यमित्यंगीकर्तव्यं । पृष्ठैः स्तुवत इति मैत्रावरुणस्तोत्रादिसाध
र्ण्येन प्रयोगप्राप्तत्रिवदजहल्लक्षणयानुवादरूप इति चोपपादनीयमिति चेन्न । मैवं । यथा खल्वा
ज्यैः स्तुवते पंचदशान्याज्यानि पंचदशं होतुराज्यं सप्तदशं मैत्रावरुणस्यैकविंशं ब्राह्मणाच्छंसि १०३

© Dharmartha Trust J&K. Digitized by eGangotri

नः पंचदशमच्छावाकस्येत्यादिप्रयोगा दृष्टिः पवमानानंतरभावीनि चतुर्थान्यपि स्तोत्राण्याज्य
शस्त्रवाच्यानि एवं पृष्ठैः स्तुवते ममसदृशानि पृष्ठानि एकविंशं होतुः पृष्ठं त्रिणवं मैत्रावरुणस्य सप्त
दशं ब्राह्मणाच्छंसिनः पंचदशमच्छावाकस्येत्यादिप्रयोगान्माध्यंदिनपवमानानंतरभावीनि चतुर्था
न्यपि स्तोत्राणि पृष्ठशस्त्रवाच्यानि · क्वचित्क्वचित्कण्वरथंतरं पृष्ठसदो विंशीयं ब्रह्मसामेत्यादौ होतुः
पृष्ठे विशिष्य पृष्ठशब्दप्रयोगस्तु कथमिन्द्रव्यशब्दप्रयोगवदर्जुने पार्थिवशब्दप्रयोगवदायोवाकृत्य
मार्छ्चतावांसां वायुः पृष्ठेष्ववर्तत इत्यादिश्रुतौ पृष्ठशब्दस्य प्रवृत्तिनिमित्तं तेन विवक्षितमपां पृष्ठ
त्वमिति प्रवहितां वामदेव्ये वामदेव्यानुष्ठाने नप्रवहितां रथंतरादिषु प्रदर्शयापि तदनंतरं पिता
वै वामदेव्यं पुत्राः पृष्ठानीति रथंतरादिष्वेव पृष्ठशब्दप्रयोगवत्सनिरूढिवशादिति कल्प्यते नो चित्येन
पृष्ठैः स्तुवत इति श्रुतेरनुवादत्वलाक्षणिकत्वकल्पनस्य च ह इत्यंतरवाक्ययोर्विधिद्वावैय्यादि
कल्पनस्य वायुक्तत्वात् · प्रकृतौ पृष्ठबहुत्वं नास्तीति साग्निमिकस्य व्यवहारस्य विश्वजिति विधानयो

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रंथे चोदकाभावात्पृष्ठबहुत्वं नास्तीत्येव मर्यतोपपन्नेः ॥ अत एव मंत्रज्योतिष्टोमिकपृष्ठचतुष्टयस्य
चोदकप्राप्तस्यानुवादे ~ वैयर्थ्यमपि ग्रंथकारैर्दर्शितं · वैयर्थ्यमप्यविगणय्यं तं प्रतिरथंतरं पवमा
ने कुर्यात् ॥ आर्भवे बृहन्मध्यतउत्तमानि वैरूपं होतुः · पृष्ठं वैराजं ब्रह्मसाम शाक्वरं मैत्रावरुणसाम
रैवतमच्छावाकसामेति षाडहिकपृष्ठविधितज्ज्ञापकलिंगाविरोधोऽपि सूत्रकारेण दर्शितः · ननु पृ
ष्ठस्तोत्रभेदाभावे विकल्पवचनवैयर्थ्यं स्यात् · बृहद्रथंतरवाक्ययोरेकस्मिन्पृष्ठे बृहद्रथंतरसा
मविधायकतायां तयोरक्षराभिव्यक्तिरूपपृष्ठयोजनेन निर्वर्तनेन परस्परनिरपेक्षयोर्न्यायत एव विक
ल्पप्राप्तेः ॥ विकल्पवचनं च बृहद्रथंतरं वा पृष्ठं कार्यमित्येवरूपमस्तीति ग्रंथकारा व्यवहरंति । अतस्त
स्यार्थवत्त्वाय बृहद्रथंतरवाक्यविधेयं पृष्ठं पृष्ठसमंगीकर्तव्यमिति तत्पूर्वभेदो वक्तव्यं भावी निश्चेत् ॥ मैवं · पृ
ष्ठैः स्तुवत इति विहितेषु स्तोत्रेषु रथंतरं पृष्ठं वामदेव्यं नौधसं कालेयानां पंचानां साम्नामुद्देशात्पृष्ठैः स्तु
वत उत्तमस्य त्रपंचस्तोत्राणि विहितानीति शंकावारणार्थमेकस्मिन्नेवमाध्यमिके पृष्ठस्तोत्रे रथं १०४

© Dharmartha Trust J&K. Digitized by eGangotri

तरयोर्विकल्प इति वचनस्यापेक्षितत्वात्। द्वादशस्तोत्राणि द्वादशशस्त्राणि तस्य नवतिशतं स्तोत्रीया
इति आदिलिंगादधिकस्तोत्रसद्भावशंकानिराकरणसंभवेप्यधिकसाम्नानादरप्रसंगात्तत्र च विकल्प
नीयस्य विकल्पस्य च बृहद्रथंतरयोरेव नियमार्थतया वचनस्यार्थवत्त्वोपपत्तेः। अन्यथा बृहद्रथंतरवा
क्यविधेयपक्षद्वयाभ्युपगमेपि उक्तलिंगादेव तत्समुच्चयनिराकरणसंभवे विकल्पवचनवैयर्थ्या
पत्तेरपरिहार्यत्वात्। तस्माद्रप्रमाणको बृहद्रथंतरसाध्यपृष्ठस्तोत्रापूर्वभेदः। ननु तथापि बृहद्रथं
तरगतस्तोभापूर्वभेदः स्यादेव। स्तोभा हाउ इत्यक्षराभिव्यक्तिरूपदृष्टफलाभावाददृष्टार्थाः। न तस्य स्तो
भापूर्वभेदाद्बृहद्धर्माणां व्यवस्थासिद्धेः स्यादिति चेन्मैवं। धर्माणां बृहद्रथंतरयोर्वाचकऋगक्षराभिव्यं
जकगीत्यर्थत्वेन तेषामुक्तरूपगीत्यंगस्तोभानां च गुणानां च पदार्थत्वाद्दसंबंधः समस्ताप्स्यादिति न्या
येनांगांगिभावात्। तेषां साक्षाद्बृहद्रथंतरान्वयसंभवे नारुणैकहायनीन्यायलभ्यपार्ष्णिकस्तो
भान्वयकल्पनस्याप्यनपेक्षणात्। न च स्तोभानामपूर्वार्थिकल्पनमपि युक्तं। तेषां गीतिकालपरिच्छे

© Dharmartha Trust J&K. Digitized by eGangotri

105

द्रूपादृष्टप्रयोजनसंभवात्. ननु माभूदपूर्वभेदाद्धर्मणां व्यवस्था। स्तुतिप्रकारभेदात्तु भविष्य
ति. चित्रत्वादिप्रकारिका हि बृहत्साध्या स्तुतिः रथंतरसाध्या तु शूरत्वादिप्रकारिका. सत्यं न चित्र
वज्रहस्तश्चस्तुया अभित्वा शूर णोनुमतं इत्याद्यृगनुरोधादिति चेन्नैवं. स्तुतिप्रकारभेदसत्वेपि
धर्मविधिषु बृहद्रथंतरपदयोरपूर्वसाधनत्वलक्षणाभ्युपगमे बृहत्साध्यं पृष्ठस्तोत्रापूर्वं प्रतिसा
धनत्वस्य बृहति चाविशिष्टत्वे न धर्मसांकर्यस्यानिवार्यत्वात्. न च तद्धर्मविधौ विचित्रत्वशूरत्वादिप्रका
रकस्तुतिजन्यापूर्वसाधनत्वविवक्षायां विशिष्टानुवाददोषापत्तेः। चित्रशूरत्वादिप्रकारकस्तु
ध गं त्योः पुनानः सोमधारयेत्यादौ तत्तारूढकण्वरथंतरादिष्वभावेन तेषु बृहद्रथंतरधर्मातिदेशा
भावरूपदोषप्रसंगात्. न चेष्टापत्तिरस्माकं ते तद्धिकारविरोधाद्भवति ष्वरन्निति नावमिकाधिक
रणे भाष्यकृता कण्वरथंतरे समुच्चितबृहद्रथंतरधर्मप्रापकत्ववार्त्तिककृता च विकल्पितत्वद्धर्मप्रा
प्तेर्व्यवस्थापितत्वात्. ननु तत्र नावमिके कण्वरथंतराधिकरणे भाष्यकारसिद्धांतितासमुच्चित १०५

© Dharmartha Trust J&K. Digitized by eGangotri

धर्मप्राप्तिमुच्चैर्गेयमिति बृहद्धर्मस्य नोच्चैर्गेयमिति रथंतरधर्मस्य च विरोधात्समुच्चयो न संभवतीति
हि प्रतिक्षिप्य वार्त्तिककारो विकल्पितधर्मप्राप्तिं सिद्धां तयामास । तथैव प्रकृतावपि बृहद्रथंतर
धर्माणां व्यवस्था भविष्यति । प्रकृतावप्युच्चैस्त्वतदभावयोर्मेलनासंभवस्य तुल्यत्वादिति चेत् । न । अपू
र्वीयत्वलक्षणया धर्माणां साधारण्ये सत्यपि तिरात्रे षोडशिग्रहणातदभावयोरिवाधाने सामग्रा
नतदभावयोरिव च बृहद्रथंतरयोरुच्चैस्त्वतदभावयोर्वैकल्पिकत्वांगीकारेण समाधानुमुचितत्वा
त् । कण्वरथंतराधिकरणे तु वार्त्तिककृता विरोधमूलमुक्तित्वे नोक्तः किंतु तद्विकारादिति हेतु
रेव । तस्य चायमर्थः ज्योतिष्टोमविकारो हि वैश्वस्तोमः तत्र प्रकृतिवद्बृहद्रथंतरं सामद्वयस्य
विकल्पेन प्राप्तौ तदुभयकार्ये विधीयमानं तत्र तदुभयस्थानापन्नं कण्वरथंतरं एकस्मिन्नेव प्र
योगे तदुभयस्थानापन्नं न भवति । तस्य प्रयोगभेदेनैव प्राप्तेः । किंत्वेकस्मिन्प्रयोगे बृहत्स्थाना
पन्नं प्रयोगांतरे रथंतरस्थानापन्नं च भवति । अतः प्रयोगभेदेनैव तस्योभयधर्मग्राहित्वमि

© Dharmartha Trust J&K. Digitized by eGangotri

ति । विरोधस्त्वभ्युच्चयत्वेन सूत्रवार्त्तिकयोरुक्तः । तस्माद् दृष्टार्थान्तरदृष्टस्तोत्रापूर्वभेदाभ्युपगम
स्य गौरवपराहतत्वात् स्तोभापूर्वाणामपूर्वीयत्वलक्षणायामप्रवेशात् कृतिप्रकारभेदस्योद्गेय
त्वादिधर्मविरोधस्य चापूर्वीयत्वलक्षणापतनमीलनसमुद्धृतानादिसंकरनिवारणाक्षमत्वाच्चा
पूर्वीयत्वलक्षणां परित्यज्यैव धर्मव्यवस्थोपपादनीया । न ह्यदिहाप्यपूर्वीयत्वलक्षणापरित्यक्त
106 व्येति भावः । एवमपूर्वनियमविध्युदाहरणयोरपूर्वीयत्वलक्षणया सवस्राधारण्याभ्युपगमः
प्रतिक्षिप्तः । इदानीं परिसंख्योदाहरणे त्रैदोष्याभावसमर्थनमाक्षिपति । मंत्रेणाश्वस्य रज्ज्वा
ग्रहणाविधिफलं मंत्रबाधोन्यरज्जौ त्रैदोष्यं प्राप्तबाधे प्रसरणाभयत्वेन नत्विहेत्यप्युक्तं कास्मे
यीन्यायतस्तामपि पुनरुपन्यस्केन मंत्रेणैव निवार्यस्त्रैदोष्यं वाऽन्यकार्यान्तरमुखपरिसंख्यास्फकेनो
पपाद्यं । स्वार्थत्यागः परार्थग्रहणं प्राप्तबाधइति परिसंख्याक्रमप्रसिद्धं दोषत्रयमप्राप्तपरिसंख्यास्क
नभवति । किंतु प्राप्तपरिसंख्यास्विति मीमांसकप्रवादः यथेमामगृभ्णन्रशनाम् तस्येत्यश्वा १०८

© Dharmartha Trust J&K. Digitized by eGangotri

भिधानीमादत्त इति तावदप्राप्तपरिसंख्या: अनयाप्रसक्तस्याश्वरसामंत्रस्याश्वाभिधान्यां प्रवृत्तिर्वि
नियोगे कृते सति तावन्नामंत्राम्नानस्य चरितार्थतयाश्वगर्दभरशनासाधारणविनियोजकश्रुति
कल्पकस्य लिंगस्याप्रवृत्त्या फलतो मंत्रस्य गर्दभरशनातो व्यावृत्तिलाभात्. ततश्चानेन मंत्रस्याश्व
रशनायां विनियोगरूपः स्वार्थो न सकृत्यः तद्विधानात्प्रागप्रवृत्तेः तस्य गर्दभरशनातो व्यावृत्तिरूपः
परार्थश्च न न्याय्यः अर्थाल्लभ्येन कश्चिद्व्यापारानपेक्षणात्. प्राप्तं च किंचिन्न बाधितव्यं प्रत्यक्षश्रुतेः
प्राग्गर्दभरशनासाधारणविनियोजकलिंगाप्रवृत्तेः। एतावद्दृष्टोपूदाहरणेषु निर्दोषापरिसंख्याप्रवर्त्त
ते. प्रपंचितं चैतद्वार्त्तिककारैः। सामान्यप्रापणाशंकावाक्याद्यत्रानुमानिकात्. श्रुत्याप्राप्तिविशि
ष्टपरिसंख्या तदाश्रया. निर्दोषत्वं हि तत्रास्याविधाने सति लभ्यते. रूपप्रकरणद्वाराश्रुतिर्यत्कृतुकः
ल्प्यते. तावत्प्रसक्तस्याश्रुत्याविधिः शीघ्रं समाप्यते. अप्राप्तविधिरेवायतो मंत्रस्य निश्चितः। परिसंख्या
फलेनोक्तानविशेषपुनः श्रुतेः अश्वश्रुत्येव शीघ्रमान्मंत्रे प्राग्विहिते सति. निराकांक्षीकृताम्ना

© Dharmartha Trust J&K. Digitized by eGangotri

यतथाप्रकरणान्यपि· लिंगप्रकरणद्वाराश्रुतिर्नैवानुमीयते· तस्मामप्रमितायांच मंत्रप्राप्तिर्निर्दिश्ये·
सोयमाभाणको लोके यदश्वेन हृतं पुरा· तत्पश्चाद् दृढं ईक्षः प्राघुंकेनोपायेन शक्यकुर्यात्· प्रयोजनं विधेः
किंस्यादस्येति तु निरूपणे· न गर्दभाभिधानीतः फलमन्यन्निवर्त्तनात्· यद्यश्वरशनाप्राप्तिं केवला
मानुमानिकी। प्रत्यक्षश्रुतिवत्कुर्यात्ततः शास्त्यादनर्थिका· लिंगानुमितयाश्रुत्याप्राप्तु यादृशनाद्
ति· ये· समाप्राप्तप्रयत्नेवं प्रत्यक्षात्तरतः श्रुतिर्ध्य यस्य विनियुक्तस्यो प्राप्तपरिसंख्यायां त्रिषदोषानि
107 यमश्च वार्त्तिककारेणैवोदाहरणेस्थितला घ्वनिरकमुखेन प्रदर्शितः। यद्यस्य विनियुक्तस्य प्रत्य
क्षास्यात्पुनः श्रुतिः। तत्र परिसंख्यानात्प्रसज्येत त्रिदोषता· यद्दिनु प्रतिबद्धतत्त्वसामान्यविनियो
गकृत् नैवास्ति श्रुतिरत्रेति न प्राप्नोति त्रिदोषतेति· षोडशग्रहण इत्येतत्परिसंख्योदाहरणं। अत्र हि
स्वार्थबोधनं नापेक्षितं· अंगिरसां द्विरात्रस्योत्तरे हनि षोडशिग्रहणनियमरूपस्य तदर्थस्योत्तरे हनि द्वि १०७
रात्रस्य गृह्यत इति द्विरात्रमात्रस्योत्तरे हनि तन्नियमं बोधयता प्रत्यक्षशास्त्रेण प्राप्तत्वात्तस्मिन् द्विरा

© Dharmartha Trust J&K. Digitized by eGangotri

विधू २

त्रांतरेभ्यो निवृत्तेर्वेधिनं त्वपेक्षितं सामान्यशास्त्रेण द्विरात्रमात्रे प्राप्तस्य तस्य निवर्त्तकशास्त्रं विना
विशिष्य द्विरात्रे संबंधबोधनमात्रेण द्विरात्रांतरेभ्यो निवृत्त्यलाभात्. अतः षोडश्युत्तरद्व्यस्य केनां
गिरसां द्विरात्रे षोडशिग्रहनियमरूपः स्वार्थः परित्यक्तव्यः द्विरात्रांतरेभ्यस्तन्निवृत्तिरूपः परार्थश्च
परिगृहीतव्यः द्विरात्रांतरेषु सामान्यशास्त्रेण प्राप्तश्च षोडशिग्रहनियमो बाधितव्य इति दोषत्रय
मनिवार्यं अत एव परिसंख्यासूत्रे दशनादानपरिसंख्यामंगीकृतवतापि भाष्यकारेण षोडश्युत्तरद्व
त्यत्र वृत्तिकाराभिमता परिसंख्या दोषत्रयापत्त्या दशमे प्रतिक्षिप्ता. इत्थं सिद्धांतसंप्रतिपन्नाप्राप्त
प्राप्तपरिसंख्ययोरन्यत्रैदोष्यतदभावव्यवस्थेह शिक्ष्यते। अप्राप्तपरिसंख्योदाहरणे त्रैदोष्यं न प्रसज्यत इ
ति तावदनुपपन्नं अश्वरशनायां विनियोगेन मंत्रस्य निराकांक्षत्वेपि गर्दभरशनायां मंत्राकांक्षायां तत्रापि
मंत्रसंबंधस्य निवर्त्तकशास्त्रं विना वारयितुमशक्यत्वात्. इदं चाग्न आ याहि वीतय इत्यादीनां ज्योति
ष्टोमप्रकरणाम्नातानामाग्नेयीनामृचां स्तोत्रादिषु विनियोगेन निराकांक्षत्वेपि आग्नेय्याग्नीध्रमुपति

© Dharmartha Trust J&K. Digitized by eGangotri

ष्ठतद्भतिविहितस्याग्नीध्रोपस्थानस्याग्नेय्याकांक्षयातत्संबंधः। नचगर्दभरशनाग्रहणानुष्ठानंध्यानोप
दृष्टवचनादिनापिसंभवन्नमंत्राकांक्षमितिवाच्यं आग्नीध्रोपस्थानमप्यप्रकरणाम्नायेतेकिंचिदाग्ने
यीसंबंधेनसंभवन्नप्रकृताग्नेय्याकांक्षमितिवक्तुमशक्यत्वात्। अथोच्येताग्नेय्याग्नीध्रमित्यत्राग्नेयी
पदलेनस्याः क्लृप्तपूर्वसंबंधेतद्वारभूताग्नीध्रोपस्थानसंबंधेचविधिव्यापारः कल्पनीयइतिगौरवं। प्र
108 कृताग्नेयीपरत्वेतुनस्याः क्लृप्तपूर्वसंबंधस्यकृप्तत्वादग्नीध्रोपस्थानसंबंधमात्रेविधिव्यापारः कल्पनी
यइतिलाघवमस्ति। अतोलाघवानुसारादाग्नेयीशब्दोनिराकांक्षामपिप्रकृतामेवाग्नेयींगृह्णातीति
कल्प्यतइति। एवंतर्हिगर्दभरशनाग्रहणेतन्त्रसुरुषवृध्यादिसंबंधानाद्यनियतत्वेनैकोपायग्रहणेगौर
वाल्लाघवानुसारेणनिराकांक्षमपिमंत्ररूपंएकमेवोपायंलिंगसमर्पितंगर्दभरशनापिगृह्णातीति
तुल्यं। अतएववैकृतःसोयादिविधिः प्रकृतिद्रव्यतदवघातादिजन्योपकाराकांक्षःसंनिधपतच किंचि १०८
त्प्रकृतिद्रव्यंगृह्णात्किंचित्तुषविमोकादिसाधकजन्योपकारग्रहणेननिराकांक्षीकर्तुंशक्योपिनियम

© Dharmartha Trust J&K. Digitized by eGangotri

२७००

संभवस्यानियमगौरवमयुक्तमिति दार्शपौर्णमासिकमिति कर्त्तव्यताकलापं दर्शपौर्णमासापूर्वसंबं
धेन निराकांक्षमपि स्वप्रकरणाम्नानेनाकृत्तपूर्वसंबंधमपि गृह्णातीत्यंगी क्रियते· तस्मादर्थाभि
धान्यादानवाक्यं स्वार्थपरं तस्यान्यतः प्राप्तिसंभवं गर्दभरशनातो मंत्रनिवृत्तिमेव स्वप्रवृत्तिफलं
चालोच्य स्वार्थविधानपरत्वेन तत्फलं लंघयितुं न शक्यं तथ चेत्स्येतदप्यालोच्याविलंबितप्रवृत्तिकेना
पि लिंगेन कर्त्तव्यंमा मान्यविनियोगं परीक्ष्य ततो विधिरूपमर्थं परित्यज्य प्राप्तनिषेधरूपमर्थं गृ
ह्णातीत्येवं वक्तव्यं· अतः कथमिहापि त्रैदोष्यं नापद्यते· यद्युच्येतान्यतः संभवत्प्राप्तिकस्याश्वरश
नायां मंत्रविनियोगस्य विधिरनर्थकः सन् गर्दभरशनातस्तस्य निवृत्तिं ज्ञापयेदिति· एवं तर्हि षोड
श्युत्तरकृत्यत्रापि तथैवद्धिग्राह्यांतरेभ्यः षोडशिग्रहनियमनिवृत्तिज्ञापनं भविष्यतीति तत्रापि त्रैदो
ष्यं नापद्यत इति स्यात्· तस्माद्वाक्यस्य स्वार्थपरतया मानर्थक्यमिति तन्मात्रेणाभिमतार्थांतरला

© Dharmartha Trust J&K. Digitized by eGangotri

भान्तत्र वाक्यस्यैव स्वार्थं विहायाभिमतेऽर्थांतरे प्रवृत्तिरिष्येति नियमे माभूदित्यैव षोडशिग्रहणं न्यायत्रै
दोष्यमापादनीयं॰ तथासति तस्यैवाव्याप्ति तदापत्तिर्निवारयितुं न शक्यते॰ न चैवं सत्यन्यलभ्यप्राप्तिप
रिसंख्याद्वारतत्तदर्थप्राप्तिनियमपरिसंख्यानां लाभे प्रागुद्धृतान्युदाहरणानि प्रत्युद्धृतानि स्युः।
109 तदुदाहरणेष्वन्यलभ्यं स्वार्थं विहायाभिमतार्थांतरेषु प्रवृत्तिप्रसंगादिति वाच्यं॰ येषु वाक्येष्वन्यलभ्य
स्यापि स्वार्थस्य प्रतिपादन एवाभिमतार्थप्राप्त्यादिकं लभ्यते न त्वन्यथा तथाभूतवाक्यानामेव तदुदाह
रणत्वात्॰ तथाभूतानामेव सांग्रहण्यादिवाक्यानां प्रागुदाहृतत्वात्॰ तस्मादप्राप्तपरिसंख्योदाहरणे
त्रैदोष्यं नापद्यत इति तावदनुपपन्नं। तदुदाहरणेऽप्राप्तपरिसंख्यातुस्यैवानुक्तित्वात्॰ तथाप्राप्तपरि
संख्यायां त्रैदोष्यं नियतमित्येतदप्यनुपपन्नं। यत्तु ह्वांग ह्वाति प्रयाजेभ्यस्तत्र घृतु प्रभृति प्रयाजानुया
त्रै॰ जेभ्यस्तदिस्यविशेषमवहत्तेन प्रत्यक्षप्रशास्त्रेण सर्वेषां प्रयाजानां जोहवो प्रभृताज्यकार्यत्व प्राप्तावतिहा ॥१०९॥

© Dharmartha Trust J&K. Digitized by eGangotri

येऽङ्गुल्यादयोऽप्रमत्ताऽन्यसमानकालविध्यधीनायां जोहवोऽप्रमत्ताऽन्याभ्योऽमुपरितनप्रयाजद्वयप्राचीन
प्रयाजत्रयपरिसंख्यायां प्रायणीयातिथ्ययोश्चोदकादविशेषेणेष्टिकाङ्गकलापप्राप्तौ शंय्वन्ताः प्रा
यणीयासंतिष्ठन्ते इडान्तातिथ्यासंतिष्ठते इति शंय्विडान्तोपरमविध्यधीनायां शंय्विडोपरितनाङ्गपरिसंख्या
विध्यर्थ यामन्यस्याप्येवंविधायां जन्यैर्लभ्यमानपरिसंख्यायां त्रैदोष्यासंस्पर्शात् । एवं सर्वविधीनां लक्षणान्यु
दाहरणानि चासमञ्जसानीव प्रतिभान्ति ॥ ॥ इति श्रीमद्वेत अपूर्वनियमविध्युदाहरणाक्षेपपूर्वप
क्षः समाप्तः ॥ ॥ एवमपूर्वविध्यादिलक्षणोदाहरणगणमाक्षिप्य प्रदर्शितिथपके विदाक्षेपाः शा
स्त्रमर्यादामात्रमाश्रित्य प्रदर्शिताः । ननु न्यायमनाश्रित्य न्यायान्वेषणे तु तेऽपि शिथिला इत्याक्षेपाक्षेपव्या
जेन तत्तदाक्षेपोपजीव्यशास्त्रमर्यादाक्षेपं कृत्वा स्यापि शास्त्रस्य परस्परविरुद्धार्थत्वशंकावद्दस्याल्लीपुला
कन्यायेन प्रदर्शयिष्यामीति प्रतिजानीते । अत्राप्याक्षेपवर्गे कति च न शिथिलाः शास्त्रमर्यादया ते दोषाः

© Dharmartha Trust J&K. Digitized by eGangotri

स्युः लक्षणोदाहरणगणश्चेति प्रतिपाद्यं तत्पूर्वं । तत्र स्थालीपुलाकप्रतितेन यदिशा केषुचिद्दर्शयामः । शेषि
लं तद्धि रुद्धं सकलमिव भवद्योमदृश्येत तंत्रं । तत्र तावदपूर्वविधिलक्षणस्य वैकृताग्निविध्यव्याप्तिरूपं प्रथ
110 माक्षेपमाक्षिपति । पश्वाद्यर्थो हि नैव प्रकृतिषु विकृतिषु भ्योऽग्निरंगं कात्तत्रामूलभग्नावकाश्यविकृति
षु प्राप्तिर्वास्तीति देशात् । अग्निष्टोमादिवाक्यानि तु फलजननायाश्रयार्थानि लिंगान्न प्राप्तिर्न प्रकृत्यां
न च विकृतिषु सा तद्धि द्योतनप्रवृत्तेः । प्रकृतावंगस्याग्नेर्विकृतिष्वतिदेशतः प्राप्तिसंभवात्तास्वग्निविध
यो न तत्प्राप्त्यर्थाः किंतु तदाश्रितपश्वादिफलार्थगुणप्राप्त्यर्था इति दशमाध्याये व्यतिग्राह्य
स्य विकृतावुपदेशादप्रवृत्तिः । ग्रहणे समानविधानं स्यादिति पूर्वोत्तरपक्षसूत्राभ्यां व्यवस्थापितम
र्थमुपजीव्यते ऽपूर्वविधिलक्षणस्याव्याप्तिरिति यत्तावदुक्तं तदयुक्तं फलार्थगुणप्राप्त्यर्थानां वैकृता
ग्निविधीनामेव प्राशस्त्यं गाम्यमाणत्वात् । तथा हि पशुकाममग्निं चिन्वीतेत्यादिवाक्यैरग्निः फलार्थ ११०

© Dharmartha Trust J&K. Digitized by eGangotri

द्रुस्यर्थवादादधिकरणेऽभागिप्रतिषेधसूत्रे वार्त्तिकन्यायस्कन्धयोरुक्तं । न तथा च फलार्थस्याग्नेः प्रक
तिरूपेषु त्वङ्गानुषङ्गत्वमेव नास्तीत्यतिदेशमूलाङ्गत्वाभावे नातिदेशानुमेयादतिदेशतो विकृतिष्वपि न
प्राप्तिसंभव एवासिद्धः तस्मादतिदेशेन संभवत्प्राप्तिकाग्निविधयः फलार्थगुणत्वाच्च समर्था इति द
शमाध्याये व्यवस्थापितमप्युक्तं । ननु यद्येवं विधानाग्निं विनु तद्गुलिवाक्योत्पन्नस्याग्नेः पशुकामादि
वाक्यैः फलार्थत्वेप्यग्निहोमादिवाक्यैः क्रत्वर्थत्वमपि स्यात् । ऐन्द्रवायवं गृह्णाति मैत्रावरुणं गृह्णा
तीत्यादिवाक्योत्पन्नानामैन्द्रवायवादिग्रहणामैन्द्रवायवाग्रान्गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः
कल्पेरन्निति फलार्थत्वेपि वाग्वा एषा यदैन्द्रवायव ऐन्द्रवायवाग्रायं गृह्णीते वाचमेवानुप्रयन्तीत्यत्वा
कयेन क्रत्वर्थत्वमिति चेत् । न । सिद्धरूपस्यानारभ्याधीतस्याग्नेः स्वतः फलार्थत्वासंभवेनाग्निहोमा
या१ दिवाक्यानां तदपेक्षिताश्रयत्किंसमर्पकतयानपेक्षितक्रत्वङ्गतापरत्वायोगात् । ऐन्द्रवायवादिग्रह

© Dharmartha Trust J&K. Digitized by eGangotri

एगं तु ज्योतिष्टोमाप्रकरणादेवाश्रयो लभ्यत इति युक्तं वाग्वाण्णैत्यस्य स्यक्रत्वं गतापरत्वं॰ स्यादेतदग्नेः प्र
करणाभावेपि दीक्षणीयादिसोमप्रयोगसंकीर्णसावित्रहोमोस्यासंस्मरणाद्दीक्षणीयावैषयिकगुणस्त
न्यप्रतिमोचनादिकांगकलापवत्स्वरूपाल्लिंगादाश्रयो लभ्यत इत्यत आग्निष्टोमादिवाक्यानामपि क्र
त्वं गतापरत्वमिति चेत्॰ नयुक्तमिति ब्रूमः कथं॰ लिंगात्स्वाधिष्ठान्न नारभ्याधीतोग्निः सामान्यदृश्यन्यायेन
विकृतिष्वेवमाप्नुयान्न प्रकृतौ उभयत्र विरोधात्॰ अतो वाऽग्निमोक्ष्यातिरात्रवाक्यानि तावदग्नेः
प्रकृत्याश्रयत्वमात्यर्थान्येव लभ्यंते आ॰ग्निष्टोमादिशाखानां प्रकृतिविकृतिसाधारणत्वेपि विधेर
प्राप्तपक्षपातित्वेनात्र प्रकृतिपरत्वौचित्यात्॰ एवं वशीघ्रप्रवृत्तवचनसमर्पितप्रकृतिरूपाश्रयेण तद्वाक्यो
क्ताश्रांते दीक्षणीयासंबंधलिंगाद्विकृत्याश्रयत्वकल्पनानप्रवर्त्तत इति ज्योतिरात्रादिवाक्यान्यर्पितस्वा
श्रयत्वमात्यर्थान्येव पर्यवस्यंति॰ आश्रयप्रापकविधिप्रायपाठादिति कुतोत्र क्रत्वर्थतापरत्वकल्प ११९
नाप्रांकावकाशाद्युतिभावः। यद्यप्यग्निष्टोमादिवाक्यानां फलार्थ्यग्न्याश्रयसमर्पणार्थत्वेस्तीति द्वि

© Dharmartha Trust J&K. Digitized by eGangotri

रात्र्यादिवाक्यानां तदीयक्रत्वर्थतापरत्वेपि प्रकृताग्नेरंगत्वाभावेन तेषामतिदेशासंभवात्काम्यासिका
ग्निविधित्वाभावाद् व्याख्याक्षेपोऽभवेदेवं तथापि प्रायपाठानुरोधेनोपविसमनुसरतां तेषामाश्रयविधि
परत्वयुक्तमिति द्रष्टव्यं स्यादेतल्लिंगादेवाग्नेः प्रकृत्याश्रयत्वमपि प्राप्नोति पुरुषार्थसमासत्तेः का
म्यं नित्यस्य बाधकमिति न्यायेन फलार्थत्वया बलवतस्तस्योत्तरवेदिबाधकत्वात् पुरुषार्थप्रयुक्ता
हि सर्वस्य प्रवृत्तिरतः काम्योऽग्निः फलस्य प्रत्यासन्नः शीघ्रं प्रयुज्यते उत्तरवेदिस्तु क्रत्वर्थविलंबेन॰
अतश्चोत्कटप्रवृत्तिविषयः स तस्या बाधकः॰ नैवं चमसगोदोहनवदेकप्रत्यकरणगतयोरेव नित्य
काम्ययोः काम्यबलवत्त्वन्यायः प्रकरणाम्नातानारभ्याधीतयोस्तु तयोर्नित्यमपि प्रकरणाम्ना
तमेव बलवत् अनारभ्याधीतस्य विकृतिष्वपि सावकाशत्वेन दुर्बलत्वादिति वाच्यं सामान्यतऽ
प्यधिकृतमात्रविषये चमसः विशिष्य(चमस) पशुकामविषयं गोदोहनमिति सामान्यविशेष
न्यायेन पशुकामातिरिक्तविषये चमसः सावकाशो गोदोहनं निरवकाशमिति सावकाशनिरव

© Dharmartha Trust J&K. Digitized by eGangotri

काशान्यायेन बलवतो गोदोहनस्यासंकीर्णकाम्यबलवत्त्वन्यायानुदाहरणतया सामान्यविशेषभा
वादिन्यायाविषयस्याग्न्यादेरेव सकलमीमांसकप्रसिद्धकाम्यबलवत्त्वन्यायोदाहरणत्वौचित्यात्।
अपि च काम्येनाग्निनोत्तरवेद्याबाधेपि नात्यंतबाधः उत्तरवेद्यां ह्यग्निश्चीयत इति श्रुतिबलादुत्तरवे
द्येकदेशस्थंडिलयोरग्निनिधाने वेद्यां हि वींष्यासादयति बर्हिषि हवींष्यासादयति इति श्रुतयोर्वेदि
112 बर्हिषोर्हविरासादने इव समुच्चयावगमात्। तस्मात्फलार्थस्याग्नेराश्रयाकांक्षायां लिंगादेव वि
कृतिवत्प्रकृतावेव प्राप्तिसंभवादग्निष्टोमादिवाक्यानि सर्वाण्यपि क्रत्वंगत्वपराण्येव वाच्यानि
तेषु वैकृताग्निविधीनामतिदेशानैः संभवत्प्राप्तिकविषयाणां श्येनाकृत्यादिफलार्थगुणप्रापणार्थ
त्वस्यावश्यवाच्यतया युक्तैव प्राग्गुरुक्ता विताव्याप्तिः। ननु तथाप्येतान्यग्निष्टोमादिवाक्यानि परिसंख्या
र्थानीति युक्तमनारभ्याधीतेषु काम्यगुणेषु पर्णतादिष्विव प्रकृतौ वा द्विकृतफलादिति न्यायानव
तारणाग्नेः समुच्चित्य प्रकृतिविकृतिरूपेषु सर्वेषु सोमेषु प्राप्तिसत्वादिति चेन्मैवं। तेषां प्राप्त्यापो ११२

© Dharmartha Trust J&K. Digitized by eGangotri

दितक्रत्वंगत्वप्रतिप्रसवार्थस्यैव लाघवेन युक्तत्वात्॥ न चाहि॥ यएवं विद्वानग्निं चिनुत इत्यनारभ्या
धीतवाक्येनाग्नेश्चयनसंस्कार्यत्वं विहितं। न च चयनप्रकरणोक्तचयननिर्वर्त्यस्थंडिलोपरिदेशस्याप
नद्वारकं पर्यवस्यति॥ स्थंडिलनिर्वर्त्तकेन चयनेन साक्षादग्नेः संस्कार्यत्वासंभवात्॥ तेन संस्कार्य
त्वं वाच्यं न विशेषनिहितेषु संभारेषु निधानरूपेणाधानेन संस्कार्यत्ववदग्नेराहवनीयात्मनोऽसा
धारणरूपं न भवति॥ आधानपवमानेष्टिभ्यामेव तदुत्पत्तेः॥ अन्यथा चयननिर्वर्त्तितस्थंडिलेऽग्नि
स्थापनाभावे नित्येषु अग्निहोत्रदर्शपूर्णमासादिष्वग्निमति क्रतौ स्थंडिलनिवृत्तेः प्राचीनेषु प्र
क्षणीयादिषु वाहवनीयाभावप्रसंगात्॥ एवं चाहवनीयस्य सतश्चयनसंस्कारस्य कैमर्थ्याकां
क्षायामाहवनीयः सामान्येन क्रत्वर्थतया यदाहवनीये जुहोतीति वाक्येन सिद्धो विशिष्य यस्य
क्रत्वपूर्वस्योपयोगी स्थंडिले निधीयते तादर्थ्यमेव तद्द्वारा पर्यवस्यति॥ किंच॥ सोमप्रयोगसंकी
र्णप्रयोगस्य चयनस्य सोमप्रयोगाद्बहिरनुष्ठातुमशक्यतया तन्मतेषु वानुष्ठानमेते पाशुकथ

© Dharmartha Trust J&K. Digitized by eGangotri

र्जगतस्याग्नीषोमीयपश्वंगत्वमिवानुष्ठानसारेऽप्यरूपेणस्थानप्रमाणेनापि क्रत्वर्थत्वं प्राप्नोति॥ ए
वं प्राप्नुवतश्च क्रत्वर्थत्वस्य पशुकामादिवाक्येष्वयनसंस्कृतस्याग्नेः फलसंयोजनं कुर्वद्भिरपवादः
113 प्राप्नोति॥ वाचनिकफलेन फलाकांक्षाशांत्या क्रत्वरूपकारस्य फलस्याकल्पनीयत्वात्॥ एवं क्रत्वर्थ
त्वापवादे प्राप्ते न्यातिप्रसवार्थान्यग्निष्टोमादिवाक्यानीति युक्तं॥ प्रतिप्रसवोऽपि विधिलाघवस्य प्रागु
पपादितत्वात्॥ तस्माद्यथा य एवं विद्वान् षोडशिनं गृह्णातीति ज्योतिष्टोमप्रकरणाम्नातवाक्यो
त्पन्नस्य षोडशिना वीर्यकामः स्तुवीतेति फलविनियोगवचनापादितप्रकरणलब्धज्योतिष्टोमांग
भावस्य षोडशियागाभ्यासस्याप्याऽग्निष्टोमे जेऽतोऽस्य गृह्णीयादृष्ट्युक्थ्ये ग्राह्योऽतिरात्रे ब्राह्मण
स्यान्तरे ह न द्विरात्रस्य गृह्णीयान्मध्यमत्रिरात्रस्य चतुर्थे चतुर्थेऽहन्यहीनस्य गृह्णीयादिति वाक्यैः क्रत्वर्थ
तासिद्धेरेवमग्नेरप्यग्निष्टोमादिवाक्यैः क्रत्वर्थतासिद्धिः स्यादेवेत्याशंक्याह॥ नित्यात्काम्यस्य
वृ॰ घ्यात्मकातमपि समाप्यन्तांलिंगतोऽग्निं सांगमन्याद्य वाक्यैः प्रकृतिविकृतिषु स्यादिहिरात्रा ११३

© Dharmartha Trust J&K. Digitized by eGangotri

दिंगोपि॰ तद्वाक्यान्यायबाक्यैस्तीभिरपिनिखिलाहर्गणान्प्रापितेग्नेोकिंवाकुर्वंतिगत्याप्रकृतवन्नि
हविधिप्राप्तमग्नेरुक्तवंतु। एवमग्निष्टोमादिवाक्यानांकृतत्वर्थत्वविधिरूपतामुपपादयताकस्मि
न्विधावप्राप्तिरिष्यते। नतावदग्निष्टोमेनानुयजतीतिविधौतस्यप्रकृत्यग्निष्टोमेग्निप्राप्त्यर्थ
त्वात्॰ नचवाच्यमग्निष्टोमशब्दोविकृत्यग्निष्टोमस्यापिसाधारणः। अतस्तत्प्रातिदेशतोऽग्निप्रा
प्तिःसंभवतीतितदीयाग्निविध्यंशेप्राप्तिरिति। प्रकृतिविकृत्यग्निष्टोमयोर्विधेरेकत्वेनेतद्विर
ध्यप्रवृत्तावग्नेःप्रकृत्यग्निष्टोमांगत्वसिध्यान्यत्रतदतिदेशस्यासंभवात्॰ नापितमुक्थ्यंनत्वमतिरा
त्रेणेतिविध्योरप्राप्तिःतयोरप्यग्निष्टोमवाक्यवत्प्रकृतिविकृतिसाधारणत्वात्। ननुप्रकृतिभू
तयोरप्युक्थ्यातिरात्रसंस्थावतोःक्रत्वोःअग्निष्टोमविकारत्वान्ततश्चोदकात्संभवत्प्राप्तिक
स्याग्नेःतयोःपुनर्विधानंगुणकामप्राप्त्यर्थमितितद्विध्योरप्राप्तिःस्यादेवेतिचेदुच्यते। नताव
दग्निष्टोमविकारौ। तयोरप्यग्निष्टोमवत्प्रकृतिभूतज्योतिष्टोमात्मकत्वात्॰ ज्योतिष्टोमस्यैवस्व

© Dharmartha Trust J&K. Digitized by eGangotri

त्वग्निष्टोमोक्थ्यषोडश्यतिरात्रसंज्ञकाश्चतस्त्रः संस्थाः। तत्राग्निष्टोमसंस्थावश्यकर्तव्या।
उक्थ्यादिसंस्थास्तु पशुकामेन उक्थ्यं गृह्णीयात् षोडशिना वीर्यकामस्य स्तवीतातिरात्रेण प्रजाकामं
याजयेदिति ज्योतिष्टोममाश्रित्य फलार्थतया विहिता गोदोहनवत्पुरुषार्था इति विशेषः। अ
114 ग्निष्टोमादिसंस्था इति अग्निष्टोमादिसंज्ञकैः स्तोत्रैः क्रतोः समाप्तत्वात् अंते संपूर्वस्य तिष्ठतेर्धा
तोः समाप्तिवाचित्वात् तत्र यथा फलाय गोदोहनग्रहणेपि तदाश्रयो दर्शपूर्णमासो प्रकृतिभू
त एवं फलार्थमुक्थ्यादिसंस्थानुष्ठानेपि तदाश्रयो ज्योतिष्टोमः प्रकृतिभूत एव भवति। प्रकृतौ
च तत्र नातिदेशादग्नेः आप्तिर्नाप्यग्निष्टोमवाक्यरूपादुपदेशात्। तेनाग्निष्टोमसंस्थावत्येव हि
तस्मिन्नग्निः प्राप्यते। न तु संस्थांतरवत्यपि। यथाग्रवतीर्बृहत्पृष्ठस्येति वाक्येनाग्रवतीर्बृहत्सा
म्न्येव तस्मिन्प्राप्यते न तु रथंतरसाम्न्यपि। तत्रश्चोक्थ्यसंस्थस्यातिरात्रसंस्थस्य वा ज्योतिष्टोमस्यां
गत्वेनाप्राप्तोऽग्निरुक्थ्यातिरात्रवाक्याभ्यां विधीयते। उक्थ्यातिरात्रशब्दयोरुक्थ्यातिरात्रसंस्थ ११४

© Dharmartha Trust J&K. Digitized by eGangotri

विकृतिसाधारण्येप्यग्निष्टोमवाक्योक्तन्यायेन विकृतिष्वप्यग्नेः प्राप्तस्तु विधौ भवत इति तन योज्या
प्तिशंकावकाशः नापि द्विरात्रादिवाक्येषु व्याप्तिः। द्विरात्रादिष्वग्निष्टोमोऽवश्यातिरात्रसंस्थाना
मन्तांसत्वेन तेषु प्रकृतिविकृतिसाधारण्याग्निष्टोमादिवाक्यैरेवाग्नेरौपदेशिकत्वस्य तदधीनगुण
कामप्राप्तेश्च संपन्नतया तेषां गुणकामप्राप्त्यर्थाग्निविधिरूपत्वस्य वक्तुमशक्यत्वात्। नच तेषु
षोडशिसंस्थस्याप्यह्नः संभवेन तस्मिन्नहनि षोडशिसंस्थे प्रकृतिभूतज्योतिष्टोम इवाग्नेरौपदे
शिकत्वं तेभ्यो न लभ्य इति तदर्थं द्विरात्रादिवाक्यं स्यादिति वाच्यं। तेष्वग्निष्टोमादिसंस्थानामप्य
न्तांसत्वेनाग्निस्तेषामप्यंगं स्यादिति तदंगभूताग्न्याश्रितगुणकामप्रवृत्त्युपपत्त्या षोडशिसंस्थेऽप्य
ग्नेरौपदेशिकत्वसंपादनस्य निष्फलत्वात्। औपदेशिकांगानुष्ठानमेव हि तदाश्रितगुणकामप्रवृ
त्तिप्रयोजकं नतु पञ्चत्वस्यांगस्योपदेशेन न परस्तित्स्तदुपकारत्वाभावोपि गौरवात्। किं तर्हि द्विरात्रा
दिवाक्यानि कुर्वंतु। अग्निष्टोमादिवाक्यैः सर्वेष्वहर्गणेषु प्राप्तस्याग्नेर्द्विरात्राद्यनतिरिक्तेभ्यः प्रति

© Dharmartha Trust J&K. Digitized by eGangotri

परूपां परिसंख्यां कुर्वंतु । षोडशिग्रहविषयहिंसान्त्रादिवाक्यानी वाहरं तेभ्यः प्रतिक्षेपरूपां परिसंख्यां ।
अत एव षोडशी नो वै कृतलं तंत्र कल्पविधानादित्यधिकरणे षोडशिग्रहस्याग्निष्टोमादिष्वंगत्वेन
115 विधानादतिदेशतः संभवत्याप्तिकस्य हिंसान्त्रादीनां तत्र तत्राह पुनर्विधानं परिसंख्यार्थमित्युक्ते
आम्नानं परिसंख्यार्थमिति मिश्रेण । ननु षोडशिग्रहणवाक्येष्वग्निष्टोमादिशब्दानां प्रकृतिमा
त्रपरत्वात् हिंसान्त्रादिष्वतिदेशतः प्राप्ति सत्कर्णमात्रमिति भवतः प्राप्तिपरिसंख्याइदत्वग्निवाक्य
श्रुतेषां प्रकृतिविकृतिपरत्वाभ्युपगमादुपदेशान एव हिंसान्त्रादीनामहंतरेष्वपि प्राप्तिरस्तीति प्रा
प्तपरिसंख्यायां त्रैदोष्यं स्यादिति चेन्न हि तत्र हिंसान्त्रादिवाक्यानि समनंतरविधीनां स्फूर्तिं कुर्वंतु ।
एवमेतेग्निष्टोमादिष्वग्निविधयः प्रयाम्नायन्ते स्वग्निविधानमात्रेण हिंसान्त्राद्यहरगणेष्वप्यादि
र्ऽभ्य तदुक्तिडुत्थमेव ह्यांगिरसां हिंसान्त्र षोडश्युत्तराइति वचनमुक्तरेह तु हिंसात्रस्य गृह्यत इति हिंसा
त्रसामान्यवचनप्राप्तस्य षोडशिनो हिंसात्रांतरेभ्यः परिसंख्यार्थमिति वृत्तिकारमते प्राप्तपरिसंख्या ११५

© Dharmartha Trust J&K. Digitized by eGangotri

र्थत्वेन तत्रैव दोषः स्यादित्यपरितुष्यता भाष्यकृता तस्य वैश्वानरसंपूर्वेहून्सामभवतीति समनंतरवि
धिस्नावकत्वमुक्तं पूर्वस्याह्नो वैश्वानरसारव्यवैशेषिकगुणविधियुक्तः यत्तूत्तरस्याप्यन्हः षोडश्या
ख्यावैशेषिको गुणो वर्त्तितद्वयो विंत्यनस्तीति। तस्माद्द्विरात्रादिवाक्येष्वपि न व्याप्तिशंकावरका
शादुतिभावः। नन्वत्राग्निष्टोमादयः षोडशियुक्ताग्निष्टोमादिवाक्येष्विव प्रकृतत्वएव नत्वहंतान य
विकृतत्वेयापि। न तथा द्विरात्रादिगतेष्वग्निष्टोमोक्थ्यातिरात्रसंस्थेष्वहःसु प्रकृतिभूतेभ्योऽग्नि
ष्टोमादिभ्यस्त्वोदकात्संभवत्प्रापिकस्याग्नेर्विधानं गुणकामप्राप्त्यर्थमेव भवेदित्युक्तमर्थप
रिसंख्यार्थं वा सत्वतेषां मर्थप्राप्यतावत्। आतिदेशिकपरिसंख्यायाश्चाप्राप्तविषयत्वेन तत्रैव दोषा
भावेऽप्यग्निप्रकरणे संनिहितगुणकामप्राप्त्यर्थत्वसंभवेऽसन्निहितद्विरात्रादितद्व्यतिरिक्तानेका
काहर्गणप्रकरणगततन्त्रचोदकवाक्यानुसंधानलभ्याग्निव्यावर्तकत्वकल्पनस्यायुक्तत्वात्।
तर्हि षोडशिग्रहविषयद्विरात्रादिवाक्यान्यपि पूर्ववाक्यसन्निहितराजन्यादिनिमित्ततयारसर्था

© Dharmartha Trust J&K. Digitized by eGangotri

न्येवमस्तु। ननु द्विरात्राद्यहर्गणं तस्य चोदकपर्यालोचनालभ्यषोडशिग्रहपरिसंख्यायतनीति चेन्न तथै
116 वसंतु। अत एव शास्त्रदीपिकायां षोडशिग्रहविषये द्विरात्रादिवचनमनैमित्तिकत्वार्थमित्यु
क्तं तस्माद्युक्तमिह द्विरात्रादिवाक्येषु व्याप्तिकथनमित्याशंक्याह। अग्निष्टोमादयश्चेत्यत्र कृ
तयद्रुह तस्यात्समानं विधानं संकेतश्च विधीनां कवननयविदानि निमित्तोनयुक्तः। तस्मादत्रा
पि सर्वे विधिषु न घटते वर्णितावैकृतेषु चित्याक्षेपभिन्नत्र वक्तुं नयसरणि च नेशः कश्चमेतावदिव-
यद्यत्राग्निष्टोमादिशब्दाः प्रकृतिमात्रपराः स्युस्तदा यद्गुणे समानविधानं स्यादिति सूत्रा
र्थः प्रकृतिविकृतिष्वग्नेः समानविध्यं न सिध्येत्। एकविधिविधेयत्वं हि समानविध्यं। नन्वत्रा
पदेशानुपपत्त्यैकत्वेऽपि विधिभिः विधेयत्वमात्रं तावद्विवक्षितं तावतैव विकृतिषु गुणकामप्राप्तिफ
लस्य लाभात्। नन्वेकविधिविधेयत्वपर्यन्तं विवक्षितं तावत्पर्यन्तविवक्षायां फलाभावात्। अ ।११६

© Dharmartha Trust J&K. Digitized by eGangotri

पि वाहर्गणेषुग्निवृत्समानं स्यादिति दशमाध्यायसूत्रेण तथैव तत्तात्पर्यस्पष्टीकरणाच्च । नन्वाहि
द्वादशाहे ऽप्यनीकायां रथंतरबृहत्साम्नोराद्ययोरुक्तो ऽश्वोदकादिं द्वावायतश्रुकागृत प्राप्तिसंभ
वे किमर्थं तयोः पुनर्विधानमित्याशंकायां समानविध्यार्थमिति तत्फलमुल्काग्निवदिति दृष्टां
तउपन्यस्तः । तत्र दार्ष्टान्तिके प्रकृतिविकृत्योर्नीविध्यैक्यमस्ति । प्रकृतौ यादृशं तत्सामास्तोम
इत्यादिविधिर्विकृतावेद्वावायवाग्रं प्रथममहरित्यादिविधिरिति तद्भेदात् । किं तूपदिशन्नूपतया
प्राकृतवैकृतविध्योरैकरूप्यमात्रं तथैव तत्र दृष्टान्ते नाम्नापि सामानविध्यं भवितुमर्हतीति चेत् ।
भवत्येवमस्त्यतिव्याप्त्यधिकरणसूत्रसंगतिस्तदीयत्वं त्वस्त्वसंगतिरुक्तनस्या । तत्र यदि वैकृताग्नि
विधीनां परिसंख्यात्वमाशंक्य सामानविध्ये ननिराकृतं । तदस्माभिः प्रथमश्लोके ऽयमुपात्तस्पष्टी
कृतं । तन्नु तदासंगते यस्मिन्प्रकृतिविकृतिष्वग्नेरेकविधिविधेयत्वं स्यात् । भिन्नविधिविधेयत्वेऽहिथा

© Dharmartha Trust J&K. Digitized by eGangotri

कृतविधिनाकृष्णोपकारस्याग्नेर्विकृतिविशेषेषुपुनर्विधानंगृह्मेधीयाज्यभागविधानवत्परिसं
ख्यार्थमस्तितिशंकायाःसामान्यविधिनैवनिराकर्त्तुमशक्यत्वेनवस्यात् । अतएवास्माभिः पूर्वश्लोकेप्राकृ
117 ताग्निविधिभ्योभिन्नानांहिराव्यादिष्वग्निविधीनांपरिसंख्यात्वपक्षोदाहृतिः ॥ नन्वस्त्वेवंकृता
ग्निविधीनांपरिसंख्यातनिराकरणेहेतुविशेषनिर्देशाकृतंतत्रतन्त्रमात्रस्यासंगतिस्त्वयापिसूत्रा
दिसामंत्रस्यावैकल्यादग्निष्टोमादिशब्दानांप्रकृतिमात्रपरत्वाभ्युपगमेकोदोषइतिचेत्तथाम
प्र विशेषैस्तत्स्तुतिनिरूपाणांनिर्निमित्तःप्रकृतिषुसंकोचएवदोषः । नंहि न्यायविदोनानुमन्यन्ते नहि
योऽश्विनग्रहवाक्यगताग्निष्टोमादिशब्दानांज्योतिष्टोममहाप्रकरणाभिवाभिकामंजुहोतीत्यत्र
जुहोतेरितिकर्तव्यताकांक्षयाश्रयाजावांतरप्रकरणमिववा । हानारभ्याधीताग्निष्टोमादिश
ब्दानांकिंचित्संकोचमस्तिसंकोचकाभावेचयथाहवनीयेजुहोतीत्यनारभ्यवादगतजुहोतेः ११५

१
२६

© Dharmartha Trust J&K. Digitized by eGangotri

प्राकृवैकृतसकलहोमपरत्वमिवेहाग्निष्टोमादिशब्दानां प्रकृतिविकृतिरूपसकलाग्निष्टोमादि
परत्वमेव न्याय्यं। तस्मात्प्रकृतिविकृतिसाधारणैरग्निष्टोमादिवाक्यैरेव विहिताग्न्यादिष्वग्निप्रा
स्याः प्रकृतिवत्तेष्वपि तदाश्रितगुणकामलाभात् हिरण्यादिवाक्यानां पूर्वश्लोकोक्तरीत्यापरिसं
ख्यार्थत्वं कृत्स्यर्थत्वं वा नन्वगत्या स्वीकरणीयमिति तेष्वपि नास्त्यव्याप्तिः अतो विषयसप्तमीप
क्षे वैकृताग्निविधिष्वव्याप्तिरित्युक्तिर्निरालंबनेत्यलमेव माक्षेपमीमांसान्यायविद्भिरेताव
देवोत्तरं वक्तुं शक्यं किं तदिति चेत्तत्राह। अग्निष्टोमादिशब्दाः प्रकृतिविकृतिसंस्पर्शिनः संतु
नाम प्राप्यताम्नातसंस्थान्यथमममथनने यां त्वनाम्नातसंस्थाश्च तत्तत्स्य कल्पितात्र प्रभृतिषु वि
धयश्चोदकप्राप्तमग्निं श्रयेनाकृत्स्यादित्यौ विदधत इति तेष्वक्षतान्याप्तेतेति। पूर्वश्लोको
क्तरीत्या संकोचकारणाभावादिमेऽग्निष्टोमादिशब्दाः प्रकृतिविकृतिगामिनः संतु नाम क्ष

© Dharmartha Trust J&K. Digitized by eGangotri

तएवप्रकृतिसामान्यविध्यादरिसंख्यातमनुपपन्नमितितंत्ररत्नवचनमप्यग्निष्टोमादिवा
क्यत्रयाभिप्रायेण युज्यते। तथापि विकृतरूपास्सर्वाग्निष्टोमादीन्नस्पृशंतीति किंत्वग्निष्टोमादि
संस्थावपः क्रतुविशेषानन्विष्टंतास्तेषु क्रतुषु तत्य तत्र क्रतुसाम्नातास्तत्तत्संस्थाः संतिते षुसी
118 म्रंत्रुध्रुपाहूतेषु प्रथममवतरंतितावता नैराकांक्ष्यान्। शाखान्तरविस्मृत्यापाराभावाच्च तदनं
तरं विलंबिते पस्थितिकेषु चोदकप्राप्य संस्थेषु क्रतुषु नावतरंति। पार्थमपि तेना आदिवाक्य
स्थितजुह्वादिशब्दादुच्चोदकप्राप्तानामेव प्रकृतजुह्वादिषु उपांशुपौर्णमास्यां यजन्निति वाक्या
भावे दर्शपौर्णमासाधिकारवाक्यस्थपूर्णमासपदमिव वाक्यगतजुहोतेरप्यग्नयश्चस्व
कालत्वादित्यंतरा विधिसामर्थ्यलभ्यस पौर्णमासीकाले उपांशुयाजे आहवनीयाधिकरणे ११९
सर्वहोमविधिसाधारण्यं नांगीकृतं किंतु यद्विकृति धामनहोमादय उपविष्टानस्तति दिष्टमस्ता

© Dharmartha Trust J&K. Digitized by eGangotri

त्साधारण्यमेवांगीकृतं। तन्मात्रसाधारण्यस्यातिदिष्टसाधारण्यद्वन विरम्य व्यापारप्रसक्ति
रस्ति अत एवातिदेशप्राप्येषु होमेष्वाहवनीयस्याप्यतिदेशो नैव प्राप्तिस्तदधिकरणवार्त्तिके
दर्शिता। तत्रश्चाहवनीयेन सहैवस्यातिदेशनात्। प्रकृतौ वा द्विरुक्तत्वादित्यत्र येनिश्चयोऽस्येवं दे
दृति। एवं च प्रकृतानामग्निष्टोमादिशब्दानां प्रत्यक्षाम्नानात्तत्संस्थाविशेषमात्रविषयत
मात्तेष्वेवाग्नेरुपदेशात्। प्रकृतिर्येषु द्विरात्रादिषु प्रत्यक्षाम्नानात्संस्थाविशेषरहितेषु वोढका
व्याद्यशाहिकमध्यमदशरात्रगततत्तत्कृत्याविशेषलाभस्तेष्वग्निष्टोमादिवाक्यरूपोपदे
शाप्रत्यक्षेष्वतिदेशात्त एवाग्नेः प्राप्तिरिति तेषु गुणकामा न प्राप्नुयुः अतस्तेषु सामान्यविध्येन
गुणकामप्राप्त्यर्थमग्निविधिपराणि द्विरात्रादिवाक्यानीति तेष्वाप्तिकथनं युक्तमित्येव
वदिहवर्त्तुं शक्यं नन्वेवं समाधानमुच्यतां को दोष इति चेन्न त्राह। तत्रैतद्दूषणं स्यान्न गुणक

© Dharmartha Trust J&K. Digitized by eGangotri

119

लविधिष्वत्रवान्यत्रवाग्निः प्राक्किंचित्कत्वपूर्वान्वयमुपगतवानाश्रयोत्रानुवाद्यः। किंत्वग्नि
ष्टोममुख्यक्रतुसमधिगमात्प्रागनारभ्यवादेष्वशुद्धोग्निस्तस्यनैवाक्वचिदपिविकृतावाश्रय
त्वस्तिभेदः। स्यादिदमुत्तरं यद्यन्याश्रितफलविधिषु अत्रैवाग्निप्रकरणेन्येषु वाक्रतुप्रकर
णेषु किंचित्कत्वर्थपूर्वान्वयित्वेन सिद्धोग्निराश्रयत्वेनानुवाद्यः स्यात्. तथाहि यदि प्रागेवा
न्याश्रितगुणफलविधिप्रवृत्तेः। केषुचित्क्रतुप्रकरणेषुपदेशेन केषुचिदतिदेशेन तत्क्र
त्वपूर्वान्वयोग्नेः सिद्धः स्यात्तद्व्यतिरेकेण वात्रगुणफलविधिष्वाश्रयानुवादार्थं शुद्धाग्नि
समर्पकः पुरोवादोनस्यात्तदानीमौपदेशिकं तु तन्न्यायेन प्रथमबुद्धिमवलस्त्वौपदेशिके
नावाश्रयत्वेनान्विते चरममातिदेशिकस्याग्नेरन्वयो नभवेदिति तस्यापि तदाश्रयत्वेना
न्वयार्थमुपदेशः सफलः स्यात् यदि वा तत्रैव प्रकरणे किंचित्क्रत्वपूर्वान्वयित्वेन सिद्धष्वा ११९

© Dharmartha Trust J&K. Digitized by eGangotri

ग्निरप्प्रणयनवद्गुणफलविध्यन्वयी स्यात् तद्दागोदोहनवदग्न्याश्रितगुणफलविधिस्तत्रै
वं क्रतौ व्यवतिष्ठेतेति क्रत्वंतरगतान्नेरपि तदाश्रयत्वसिध्यर्थं यत्नांतरं कर्त्तव्यं स्यान्नत्वेवमनार
भ्यवादन्नूपेग्नि प्रकरणेग्निष्टोमादिवाक्यैः क्रत्वन्वयकरणात् प्रागेव यएवं विद्वानग्निं चिनुत
इस्कसन्नः श्रुद्धोग्निः श्येना कृत्यादिगुणफलविधिष्वाश्रयत्वेनान्वेति सोमप्रयोगाद्बहिः
केवलस्याग्नेरनुष्ठानुमशक्यत्वात् अग्निष्टोमादिवाक्यैस्तस्य क्रतुषु संयोजनाद्वयत्राग्नि
स्तत्रैव तदाश्रिता गुणफलविधय इत्यर्थादेवतेषामपूर्वीयाग्निसंबंधः सिध्यतीत्यर्थान्वापूर्वी
यस्याश्रयत्वं येष्वग्नेरोपदेशिकमपूर्वीयत्वं येषु वातिदेशायीनं तेषु सर्वेष्व्यविशेषेण सिध्यतीति न घ २
ह तत्रातिदिष्टस्याग्नेराश्रयणे दार्शपौर्णमासिकाप्प्रणयनाश्रितत्वेनावगतस्य गोदोहनस्य
स्यांतरातिदिष्टप्रणयनाश्रयणे वैगुण्यवदिहकिंचिद्वैगुण्यमस्ति एतादृग्विषयापि प्रायेणैवा

© Dharmartha Trust J&K. Digitized by eGangotri

तिदिष्टाश्रयणेनापिगुणकामप्रवृत्तिरंगीकृता अवैगुण्येतुभवतुकामस्यापिप्रवृत्तिरितितद्
120 भिप्रायेणोक्तभाष्यकारेणाहतस्मिन्प्रवर्त्तमानेकामोपिप्रवर्त्ततइतितस्मादतिदिष्टाग्न्याश्रय
णेनापिगुणकामप्राप्तिसंभवान्नतदर्थंद्विरात्रादिवाक्यापेक्षेतिभावः कातर्हिद्विरात्रादिवा
क्यानांगतिस्तावकत्वेपेत्स्फलमितिचेन्नाग्निष्टोमोक्थ्यातिरात्रवाक्यरूपतयानद्विविधाय
कतथाप्रतीयमानानांव्यर्थप्रायस्तुतिपरत्वकल्पनायोगात्तस्मात्तंत्रद्विवलनिर्वाहान्यथा
नुपपत्त्यैवातिदिष्टाश्रयेनगुणकामानप्रवर्त्ततेइतिकल्पयिष्यामः तथासतिद्विगुणप्राप्त्यर्थ
तातेषांमवेदित्यनुश्रायानेप्रत्याहवावस्त्वग्नेर्द्विरात्रप्रभृतिषुप्राप्तिसंवक्ष्यतामन्यतोग्निंतेषुन्यां
गानिसूत्रानियमनमयवातेषुकुर्वेतुतस्य। यद्येताः क्रियागत्यागुणफलप्रवनप्रापणार्थाभिवेसुः
बोऽस्यपर्थेषिवस्यात्तदपिविधिफलंतथ्यवपंतथापि। यदिद्विरात्रादिवाक्यानांकेनचिन्त्रका १२०

३०

© Dharmartha Trust J&K. Digitized by eGangotri

रणविधायकत्वं वाच्यमिति निर्बंधस्तदा तान्यहर्गणांतरेभ्योग्नेः परिसंख्यां कुर्वंतु । यदि यागस्य परिसंख्या
त्रिहोषात् तदपेक्षयाथवा आज्ञापि सकलैरेव वा मितिउक्तमिति तत्रापरितोषस्तर्हि द्विरात्रादिष्वेव गृहमे
धीयाज्यभागविधिन्यायेन चोदकप्राप्तानां तत्परिसंख्यां कुर्वंतु । यदि च द्विरात्रादिषु अतिदेशप्राप्ता
गसद्भावे किं गानियंतु अतितद्विरोधान्न त्रापि परितोषस्तर्हि द्विरात्रादिषूत्तरवेघाः पशुप्राप्तावग्ने
र्नियमनं कुर्वंतु । द्विरात्रादि चोदकपर्यालोचनालभ्योत्तरवेदिप्राप्त्यपेक्षाग्नेर्नियमापेक्षयाग्नि
प्रकरणाम्नाततदाश्रितगुणकामप्राप्तिवृद्धिसंनिहितत्वात्तदर्थमेव द्विरात्रादिवाक्यानां कल्प
यितुमुचितमिति प्रथमश्लोकव्याख्याने प्रतिपादितमिति मपि चेदिदमपि तवापरितोषस्तर्हि द्विरात्रादिव
चनमुदाहृत्य प्रतिपादितमेव संनिहितफलालाभे प्रकरणांतरस्थचोदकाधीनप्राप्तिसापेक्षो नि
यमोपि फलं भवितुमर्हतीति द्रूहवान्यतः संवृत्तीगुणकामप्राप्तिः फलं न भवतीत्युक्तमेव यत्स्वपि कि

© Dharmartha Trust J&K. Digitized by eGangotri

ष्टगत्याद्विरात्रादिवाक्यानांगुणकामप्राप्त्यर्थत्वंसमर्थ्यते तथाप्ययंने नियमनमपिसंभवन्ननिवा
रयितुंशक्यं नह्येकस्य वाक्यस्य प्राप्तिनियमपरिसंख्यास्वेकमेव फलमितिनियमः अनेकफल
संकरस्य तत्र तत्र वाक्येषु बहुशः प्रागुदाहृतत्वात्। किंचाद्विरात्रादिवाक्येष्वेव षोडशिग्रहविषयेष्व
(12) नेकफलसंकरः सिद्धांताभिमतो दृश्यते। तथाहि उत्तरे हनुद्विरात्रस्य गृह्यते इत्यादिवाक्यानि त
त्प्राचीनवाक्यसंकीर्तितब्राह्मणत्वराजन्यत्वरूपनिमित्ताभावेपि षोडशिनः प्रापणार्थानीति वि
वच्छास्त्रदीपिकाकृतोक्तं। तेनैवोत्तरे हन्नितिवाक्यं प्रकृत्यतिरात्रे विकल्पितस्य षोडशिनस्तथै
वद्विरात्रस्योत्तरे हनि प्राप्तौ तन्नियमार्थमिति तंत्ररत्ने प्रतिपादितं। सूत्रकृतानुषोडशिनो वै
कृतत्वं तत्र कृत्स्नविधानादित्यधिकरणे उत्तरे हन्नित्यादिवाक्यानि पत्तिसंख्यार्थानीति प्रतिपादि 929
तं। तत्र हि षोडशी प्रकृतौ ज्योतिष्टोमे नग्राह्यस्तस्य मध्यमे हन्नित्यादिवाक्यैः कात्स्न्येन विकृ

© Dharmartha Trust J&K. Digitized by eGangotri

तिसंबंधित्वावगमात् तदनुसारेणाग्निष्टोमोक्थ्यातिरात्रशब्दानां दिकृत्यग्निष्टोमादिपरत्वो
चित्यात् अन्यथाप्रकृत्यग्निष्टोमादिषु सतन्त्रस्यातिदेशाद्विकृतिषु प्राप्तिसंभवे मध्यमादिवाक्य
वैयर्थ्यप्रसंगादिति प्राघप्यज्योतिष्टोमप्रकरणगतानां षोडशिविषयाग्निष्टोमादिवाक्यानां
द्वादशोपसत्त्वादिवाक्यवदनन्यपदरहितानां प्रकरणादुत्कर्षयोगात् प्रकृतावपि षोडशी
नास्त्येवेति सिद्धांतितं किमर्थानि तर्हि मध्यमादिवाक्यानीत्याकांक्षायामाम्नानं परिसंख्यार्थ
मिति सूत्रेणातिरात्रोक्थ्याग्निष्टोमसंस्थे ह्र्गणानाम हूरंतरेष्वपि ब्राह्मणराजन्ययोः षोडशि
नः प्राप्तौ तत्परिसंख्यार्थनीत्युक्तं किमर्थं तत्र फलं प्रत्याख्यातव्यं तस्मात् षोडशिविषयद्विरात्रा
दिवाक्येष्विवाग्निविषयद्विरात्रादिवाक्येष्वप्यनिवार्यः फलांतरसंकरः अतः फलांतरे
णतेषां विधित्वनिर्वाहादतिदिशाश्रयेणगुणकामानप्रवर्तंतीति परिभाषानाश्रयणा।

© Dharmartha Trust J&K. Digitized by eGangotri

येति कथमपि द्विरात्रादिवाक्येष्वव्याप्तिरवकाशं न लभत इति भावः एवं द्विरात्रादिवाक्येष्वव्याप्ते
रनवकाशत्वं सप्रपंचमुपपादितं पशुकाम उक्थ्यं गृह्णीयात् षोडशिना वीर्यकामः स्तुवीतातिरात्रेण
प्रजाकामं याजयेदिति वाक्यानि पश्वादिफलार्थं ज्योतिष्टोमाश्रितोक्थ्यादिसंस्थारूपगुणविधा
122 यकानीति मतमाश्रित्योक्थ्यातिरात्रवाक्ययोरप्यव्याप्तेरनवकाशत्वं प्रागुपपादितं येतु मन्यंते
पशुकामादिवाक्यानि पश्वाद्यर्थमुक्थ्याद्यधिकारवन्ति युक्तप्रकृतसोमयागविधायकानि ननु
तदाश्रितोक्थ्यादिसंस्थामात्रविधायकानि यत्र हि लौकिकतः क्रतोर्गुणान्वयो लभ्यते तत्रैव
फलाय गुणमात्रस्य विधिर्युज्यते यथा गोदोहनादेः यत्र तु शास्त्रादेते न तत्सिद्धिस्तत्र न सयु
ज्यते गुणाश्रयसंबंधे गुणफलसंबंधे च शास्त्रव्यापारायोगात् किंतु तत्र गुणविशिष्टक्रतोरेव फला
य विधानं वाच्यं अत एव दाक्षायणयज्ञेन स्वर्गकामो यजेतेत्यादिष्वप्यावृत्तिगुणविशिष्टस्य क्र १२२

© Dharmartha Trust J&K. Digitized by eGangotri

तोरेवफलायविधानमभ्युपगम्यतेएवंचफलकामनानिमित्तकतदधिकारनियुक्तोक्थ्या
दिसंस्थःसोमयागोनित्यवदाम्नाततदनाधिकृतनियुक्तस्याग्निष्टोमसंस्थास्यवसंतेज्योतिषायजे
तज्योतिष्टोमेनस्वर्गकामोयजेतेतिविधिद्वयप्राप्तनित्यकाम्योभयावस्थस्यसोमयागस्यवि
कारइतितत्रदीक्षणीयादंगकलापस्यातिदेशेनैवप्राप्तिर्नत्रूपदेशेननित्यवदाम्नातदीक्षणी
याद्युपदेशस्यशीघ्रोपस्थितिकनित्यवदाम्नाताग्निष्टोमनित्यकाम्यक्रतुप्रयोगान्वयेनचरि
तार्थस्यविलंवितोपस्थितिकनैमित्तिकोक्थ्यादिग्रहास्तेप्याधिकारनियुक्तप्रयोगांतरान्वय
कल्पनेहिद्विरुक्तिप्रसंगादितितन्मताश्रयणेनोक्थ्यातिरात्राग्निवाक्ययोरतिदेशातःसंप्रवत्या
प्तिकाग्निविधिरूपयोरव्याप्तिर्वक्तुंशक्यतेइत्यतआहुःउक्थ्यादिस्वकफलानांक्रतुसमधि
गतिंमन्वतेकेपितेषांतेनाग्निष्टोमसंस्थक्रतुविकृतित्वोक्थ्यादिसंस्थानसिध्येत्ःकिंतुस्या

© Dharmartha Trust J&K. Digitized by eGangotri

त्सार्वकाम्यात्क्रतूदितफलभिदासाधिकायां प्रकृत्यामुक्थ्यादीनांव्यवस्थाप्रकरणपठनात्स
र्वतन्त्रत्वप्रसक्तौ ॥ पशुकाम उक्थ्यं गृह्णीयादित्यादिवाक्येषूक्थ्यादिशब्दानुवाक्याद्दिस्तोत्रैः क्रतु
समाप्तिरूपामुक्थ्यादिसंस्थामतिलंघ्योक्थ्यादिपदलक्ष्यस्योक्थ्यादिसंस्थाविशिष्टस्य क्र
123 तोः पश्वादिफलसंगतिरंगीक्रियते वेत्पशुकामादिवाक्यानि क्रतुफलविधयो न भवेयुः सर्वे
भ्यः कामेभ्य इति वाक्यांतरेणैव क्रतोः पश्वादिकसकलफलान्वयसिद्धेः तत्रश्चोक्थ्यादिसंस्थक्र
तोः फलार्थस्य विध्यंतरस्याभावान्नह्यधिविधेयउक्थ्याद्यधिकावृत्तियुक्तः क्रतुरग्निष्टोमसंस्थ
स्य क्रतोर्विकृतिरेवं न सिध्येदेव किं तर्हि पशुकामादिवाक्यैः सिध्येदिति चेदुच्यते वसंतादिवा
क्यन जीवदधिकारतया सर्वकामवाक्येन तन्न स्फलकामाधिकारतयावावगतप्रकृतिभूते
ज्योतिष्टोमे तत्प्रकरणोत्पन्नानामुक्थ्यादीनामविशेषेण संबंधे प्राप्ते पशुकामादिवाक्यैरु १२३

© Dharmartha Trust J&K. Digitized by eGangotri

कश्चास्य पशुफलार्थे तस्मिन्संबंधः षोडशिनो वीर्यफलार्थेऽत्यादिनूपाप्य वस्थापरं ते वकिंचेःसि
ध्यति यथा वृष्ट्यादिफलत्रयार्थविहितसौम्मरपठितानां त्रयाणामपि हि षीत्येवमादीनां
निधनानामविशेषेण तत्संबंधे प्राप्ते हीषिति वृष्टिकामाय निधनं कुर्यादूर्गित्यन्नाद्यकामा
यऊ इति स्वर्गकामायेत्यादिवाक्यैर्व्यवस्थार्थे हीषिति निधनमित्यादिव्यवस्थासिध्येदेवं दाक्षा
यणयज्ञसाकंप्रस्थायीपादावपि दार्शपौर्णमासिकसार्वकाम्यवाक्यलब्धस्वर्गपश्वादि
फलविशेषे कृतावावृत्ति सहप्रस्थानादिगुणव्यवस्थेव न सिध्येदननुगुणविशिष्टस्य क्रतोः
सार्वकाम्यवाक्योदितफलास्फलांतरेणान्वयः तस्मादुक्थ्यादिवाक्योदितफलानां क्रतु
ग्नि संगतिस्वीकारेप्युक्थ्यादीनामग्निष्टोमविकारत्वासिद्धेस्तन्मताश्रयणेप्युक्थ्यातिरात्राग्निवा
क्ययोरभावात्तेनावकाश इतिभावः वस्तुतस्तु तेषां क्रतुसंगतिस्वीकार एवायुक्तः संस्थावि

© Dharmartha Trust J&K. Digitized by eGangotri

द्रोषविधिशेषेषु क्रतुषूक्थ्यादिश्रुतप्रयोगस्य विशेष्यं नाभिधाग छेदलक्षीएशक्तिविशेषणइतिन्या
येनलाक्षणिकत्वात् उक्थ्यादिफलवाक्येषु च लक्षणाकल्पनेप्रमाणाभावात् न च तेषां गुणाश्र
यसंबंधे गुणफलसंबंधेन आपाराद्योगाल्लक्षणाकल्पनं। प्रकरणादेव गुणानामाश्रयसंबंधलाभा
1214 भावत्। तस्मादुक्थ्यादिफलवाक्येषु स्तोत्रविशेषैः क्रतुसमाप्तय एवोक्थ्यादिशब्दवाच्याः फल
न् यविधीयंते यथा गीयाँस्कवीनयाजेयदिति तु सोर्यादिषु निर्वपत्यादिवदनुवादमात्रं तदेतत्सर्वं शा
स्त्रदीपिकायां स्पष्टं। एवमप्यास्वरसोमन्वते केपी सुक्त्यासूचितः संस्थास्कसमानविधानाः
प्रकरणाविशेषादिति संस्थाधिकरणे किं सर्वसंस्थं ज्योतिष्टोमं प्रकृत्य दाक्षिणीयादयो धर्मा
उताग्निष्टोमं प्रकृत्येत्यादि भाष्यवचनं तु ज्योतिष्टोमस्यैवाग्निष्टोमसंस्थस्योक्थ्यादिसं
स्थत्वसामानविध्यासामानविध्यविचारपरं न ग्राह्यं किं तु ज्योतिष्टोमेन तदाश्रितानामुक्थ्या १२४

© Dharmartha Trust J&K. Digitized by eGangotri

य

दिसंस्थानां पृथक्फलत्वेनेति कर्म्मव्यतापेक्षिणीनां सामानविधानां सामानविध्यविचारपरं नेतदंअ
नएव यत्र यत्र गुणकामा मात्मवंतितत्र तत्र क्रियायांसाध्यमानायां नान्यथा मत्रेति कर्म्मव्यता यांतिकमु
मुपनिपतत्साधनस्य वास्मध्यस्य वेतिसंदेह्यमानासाध्यस्यफविनुमर्हतिनासोसाध्यस्याभवंती
साधनेनसंवध्यतइतिसिद्धांतभाष्य वचनेसंगछतेदुदं कतोः कलाश्रितगुणकामानां च फलार्थ
त्वेनेति कर्त्तताकांक्षालक्षणाप्रकरणाविशेषादीक्षणीयादिषुसामानविध्यमितिपूर्वपक्षे प्राप्ते
सिद्धांतयुक्तिप्रदर्शनपरं· अस्य चेदंतात्पर्यं गुणःफलाय चोद्यमानः पूर्वमात्मानं परप्रयुक्तक्रिया
माश्रित्य पश्चात्संबध्यते। व्यंशप्रयुक्ता च क्रियाप्रयुज्यमेततलब्धप्राक्तनः स्वतः कर्त्तव्यतारूपक्रियाविधि
स मय एवांगविधीनां व्यापारो न पश्चाद्गुणफलविधानेपिविरम्यव्यापारायोगादिति। तस्मादप्रयु
क्तं वैकृताग्निविधिषु पूर्वविधिलक्षणस्याव्याप्तिकथनमितेवं प्रथमाक्षेपः प्रपंचेनाक्षिप्तः अथा

 © Dharmartha Trust J&K. Digitized by eGangotri

क्षेपांतराण्यपि यथासंभवमाक्षिप्यंते ॥ यदुक्तं साप्तदश्यवाक्यवदभ्युदयार्थत्वांगीकारेण स्वर्गका
मादिवाक्येष्वपूर्वविधिलक्षणाव्याप्त्युद्धारे तस्य नियमपरिसंख्याविध्योरतिव्याप्तिः स्यादिति।
तत्र साप्तदश्यवाक्यदृष्टांतकथनमयुक्तमित्याक्षिपति तास्कस्यात्साप्तदश्यं प्रकरणरहितं यास्क
नश्रूयते तत्रास्वस्य स्याह्निकल्प्यो विकृतिषु कथितेनैवोदकात्म्यां वदश्ये। सत्येवं मित्रविंदादिषु नि
यमविधिस्तत्रस्य भूयो विधिः स्यात्सार्थक्ये संभवत्यभ्युदयफलकता केवलं नैव कल्प्या। अनार
125 भ्याधीतसाप्तदश्यवाक्यस्यापि प्राकरणिकसाप्तदश्यवाक्यवन्मित्रविंदादिमात्रशरणत्वे स्या
देवमगत्याभ्युदयार्थत्वकल्पनं तदेवासिद्धं तस्य प्रवृत्तिविशेषकरत्वपर्यवसायिगत्यंतरसंभवा
त्। तथाहि यास्कसौर्यादिविकृतिषु साप्तदश्यं नश्रूयते नाम्नानारभ्यवादसाप्तदश्यं गत्वातिदे
शप्राप्तेन पांचदश्येन विकल्पं प्राप्नोतु। मित्रविंदादिषु पुनः साप्तदश्यविधानेन विकल्प एवा १२५

© Dharmartha Trust J&K. Digitized by eGangotri

दत्रूपं साप्तदश्यनियमार्थमस्तु॰ एवं सर्वस्यापि साप्तदश्यवाक्यस्य प्रवृत्तिविशेषकारत्वसंभवे कि
मन्यतः सिध्यर्थे केवलादृष्टार्थविधित्वमभ्युपगम्यते॰ नन्वनारभ्याधीतसाप्तदश्यस्य सौर्यादि
गामित्वे सौर्यादिष्वतिदेशात्प्राप्तं पांचदश्यं न प्राप्नुयादुपदेशेनातिदेशबाधादिति चेन्सत्यमन्यत्र न
तथैवेह तु सौर्यादिषु साप्तदश्यं पांचदश्यातिदेशबाधनेन स्वयं नियतं प्राप्नोतीति चेन्मित्रविंदा
दिषु पुनः साप्तदश्यविधानं व्यर्थं स्यात्तथैव मित्रविंदादिष्वपि साप्तदश्यनियमलाभोपपत्तेः
अतोनारभ्याधीतसाप्तदश्यं वाक्यं स्वस्य मित्रविंदादिगतोऽस्त्ववैयर्थ्यं सौर्यादिगतो पांचदश्या
तिदेशबाधेन प्राकरणिकसाप्तदश्यवाक्यवाक्यवैयर्थ्यं वालोचयन्सौर्यादिकं गत्वा तत्र पांचद
श्यातिदेशं च सोढ्वा तेन सह विकल्पमनुमन्यते। यथा तौ न पशौ करोतीति पशावाज्यभागप्र
तिषेधस्तत्र चोदकादाज्यभागयोः प्राप्तावप्रसक्तप्रतिषेधतयास्त्ववैयर्थ्यं चोदकानयोः प्रा

© Dharmartha Trust J&K. Digitized by eGangotri

मौसर्वथातयोः प्रतिषेधे वतत्प्रापकस्य चोदकस्याप्रामाण्यापत्तेश्चोलोच्याज्यभागातिदेशंसो
ढूलिंदनुष्ठानेनसहविकल्पमंगीकरोति। एवंहितत्रचोदकनिषेधशास्त्रयोरविरोधात्रापिप्राकर
णिकसाप्तदश्यवाक्ययोः प्रवृत्तिविशेषकतयासाफल्यंभवति। तस्मादहरपार्थत्वेसाप्तदश्य
वाक्यस्योदाहरणमयुक्तमितिनिष्कर्षः। यमुक्तमपूर्वविधिलक्षणेसर्वेद्विश्यानुष्ठानेरप्याप्नेश
126 त्यंतिकत्वमितिपक्षेचाधात्तंदुलान्विभजेद्विविधावस्थापितस्तत्रदार्शिकहविषांपूर्वदेव
ताभ्योपनयस्यवक्ष्यमाणदेवताभ्योविभागस्यवाविधौतेषांमध्येतंडुलदधिघृतेषुदेवताप
नयविभागयोरर्थसिद्धत्वेनोपांशुयाजाज्यमात्रेविधेश्चारितार्थस्यवक्तव्यत्वादिति। तदाक्षि
पतिनाम्न्येवोपांशुयाजोदधिशृतसहितःपौर्णमास्यांविधानात्तद्द्वयंदर्शतंत्रेपठितमपि
ऋगाम्नातयाज्यानुवाक्यं॥ कृत्वाचिंतैवतस्यकविदधिकरणेदार्शिकेष्वस्तितोक्तिमत्त्रेधा १२९

© Dharmartha Trust J&K. Digitized by eGangotri

तंडुलानित्यनुवदन्मतस्तत्र नाप्याप्तिरस्ति। दधिघृतवत्याममावास्यायामुपांशुयाजो नास्त्ये
व। उपांशुपौर्णमास्यां यजन्निति पौर्णमास्यां तद्विधानात्। न च वाच्यं बह्वृचब्राह्मणेऽमावा
स्याप्रकरणे उपांशुयाजयाज्यानुवाक्यायुगलपाठात्तस्याममपि सोऽस्ति। प्रधानस्योपांशुयाज
स्य पौर्णमासीकालत्वेन तदंगतया तस्य तंत्रस्य मंत्रस्यान्यत्र पठितस्यापि तद्गामित्वात्। अयं
वार्थः त्रैसूत्रकृतैव दशमाध्यायेऽमावास्यायामुपांशुयाजः स्यादुपांशुयाजमन्तरा यजतीत्य
विशेषश्रवणादिति पूर्वपक्षं कृत्वाऽपि पौर्णमास्यां स्यात्प्रधानशब्दसंयोगान्मंत्रो यथाप्रधा
नं स्यादिति सिद्धान्तसूत्रेण स्पष्टीकृतः प्रपंचितं चैतच्चतुर्थश्लोकव्याख्याने नाप्येतच्छंकनीयं
अमावास्यायामुपांशुयाजमंगीकृत्याप्युपांशुयाजोऽवचनाद्यथाप्रकृतीत्याद्यधिकरणप्रवृत्तिद
र्शनात्। प्रयत इति तस्य न्यायस्योत्सादनार्थकत्वाचिंतानूपतया नेतव्यत्वात्· अन्यथापौर्णमा

© Dharmartha Trust J&K. Digitized by eGangotri

स्यां यजन्नि सा हृत्य पौर्णमासी कालस्य विधायकश्रुतिव्यापको पप्रसंगात् उदाहृतश्रुत्यवलंबनासु
पादेयं दाहृतदार्शमिकाधिकरणाविरोधप्रसंगाच्च । तस्मात्त्रेधा तंदुलान्विभजेदित्ययं वक्ष्यमाणस्य तं
दुलानां मध्यमादिभावेन विभागस्यानुवाद इत्येव युक्तं । आकरग्रंथेष्वंगीकृतस्यानुवादत्व परिहारायदा
127 र्शिकहविः सामान्यलक्षणामंगीकृत्य पूर्वदेवतापनयनस्य वक्ष्यमाणदेवताभ्यो विभागस्य वा विधेय
त्वाभ्युपगमेपि तस्य तंदुलदधिपयस्सु धर्मसिद्धत्वेनोपांशुयाजाज्यस्याभावेन च विधेयत्वाभावे नानुवादत्वा
परिहाराच्च । तस्मात्त्रेधा तंदुलानिति विधौ सर्वोद्देश्यानुरणावास्यभावेनाव्याप्तिवर्णनमयुक्तमिति भावः
एवमभ्युदयेष्टिवाक्ये दार्शिकहविषां पूर्वदेवताभ्यो पनयस्यापेक्षामंगीकृत्य तस्यार्थसिद्धतात (?) विधिवै
यर्थ्यमुक्तं । इदानीं तदपेक्षैव नास्तीति निरंतरां तस्य वैयर्थ्यमाह प्रत्येकं द्रव्ययुग्मेनयदु घटपिनुं (?) देवता
वाक्यमेकं सारूप्यस्यापि भंगः पशुफलवत्त्वसाकेवलं तद्विधाने । तस्मात्तावद्विशिष्टान्वायिनियतविधा
तिर्विवाक्याकरीसा वक्ष्यमाणदेवतानामपनयनविधेः कल्पनं क्वोपयुक्तं भवेद्दार्शिकहविषां पूर्वदे 925

ष्ये-

© Dharmartha Trust J&K. Digitized by eGangotri

तापनयापेक्षायदितेषां देवतांतरसंयोजनपराणि मध्यमादिवाक्यानिस्युः तदेवासिद्धं तथात्वे दिवा
क्यभेदः प्रसज्येत तथाहि मध्यमादिवाक्यानां देवतांतरसंयोजनपरत्वे द्रव्ये ऽग्न्यादिदेवताविधानं दे
वतासु दातृत्वादिगुणविधानं चेति त्रिष्वपि वाक्येषु तावदेको वाक्यभेदः दधिघृतवाक्ययोः स्थवि
ष्ठानां दध्यणिष्ठानां घृतं वा दधिकरणं विधेयं द्रव्यपरो वाक्यभेदस्तथा स्थविष्ठानामणिष्ठानां च रू
भावेपि विधेयद्रव्यान्यो वाक्यभेदः स्यादित्यनेन वाक्यभेदाः प्रसरंति । तथाहि दातृप्रप्रदातृशिपिविष्ट
शब्दानामग्न्यादिपदसामानाधिकरण्यात्पदद्वयप्रतिपादितं विशिष्टदेवताकारकमेकमेव वि
धेयं ननु देवतास्तद्गुणाश्च प्रत्येकं विधेयाः अभ्युदयेष्टिप्रकरणे सहश्रपतीति वचनमस्ति तदेतद्दैव
तैक्याद्दधिस्थविष्ठयोः शृतानिष्ठयोश्च सहपाकविषयं । ततश्च स्थविष्ठानामणिष्ठानां च तंडुलाना
मल्पत्वाद्दधिघृतयोर्भूयिष्ठत्वाच्च तंडुलानां चरुत्वं दधिघृतयोरधिकरणत्वं चार्थात्प्राप्नोति अर्थात्प्राप्तं च

© Dharmartha Trust J&K. Digitized by eGangotri

तत्सर्वमनूद्यते तन्न द्रुणविशिष्टमेकमेव देवताकारकं विधीयते मध्यमायां तं द्रुलानामग्निर्दत्तादेवता
स्यविधानादभक्ष्येंद्रः प्रदाता अणिधानां घृतस्य च विष्णुः शिपिविष्ट इति अतो नैवं वाक्यभेदाव का
श इति चेत्सत्यमित्थं सहस्रप्रणे वाक्यांतरमंगीकृत्य कल्पने उक्तप्रकारेण वाक्यभेदो नास्तीति त
128 थापि प्रकारांतरेण वाक्यभेदः स्यादेव दधिवाक्ये दधिस्थविशेषेषु घृतवाक्ये शृतेक्षोदिष्टेषु च प्रत्येकं दे
वतासंयोजनात् इयांस्तु भेदः पूर्वस्मिन्पक्षे स्थविशिष्टदेवताप्रणीताकार्ये च दधिविधेयमिति क्षो
दिष्टेषु देवताप्रणीताकार्ये घृतं च विधेयमिति च विधेयभेदाद्वाक्यभेदः द्वितीयपक्षे स्थविशेषेषु द
धिवक्षोदिष्टेषु घृते च देवताविधेयेस्य द्व्यभेदाद्वाक्यभेद इत्युभयत्राप्यविशिष्टो विध्यावृत्तिलक्ष
णो वाक्यभेदः अपि वा त्रमध्यमाभ्यदि वाक्येषु दार्शिकवाक्येषु हविषां देवतांतरसंयोजनविधिरि 92८
ति पक्षे पशुकामार्थं मध्यमादिवाक्यसारूप्यभंगः प्रसज्येत । एवं हि काम्येष्टिकांडे श्रूयते । यः पशु

© Dharmartha Trust J&K. Digitized by eGangotri

कामः स्यात्सोमा वा स्यात् मिष्ट्वा वत्सानपाकुर्याद्यो मध्यमास्युस्तानग्नये दात्रे पुरोडाशमष्टाकपा
लं कुर्याद्यो स्थविष्ठास्तानिन्द्राय प्रदात्रे दध्यंश्चरुं ये निधास्तान्विष्णवे शिपिविष्टाय शृते चरु
मिति। तत्र पशुकामेष्टिविधौ मध्यमादिवाक्येषु द्रव्यदेवताविशिष्टकर्मविधिरंगीकृतो नवमे।
तथात्रापि तथाभूतकर्मविध्यंगीकारे तद्वाक्यानुप्यं समंजसं भवति ननु देवतामात्रविध्यंगीकारेण त
स्मादिहाप्यवाक्यभेदाय पशुकामेष्टिवाक्यसारूप्यसामंजस्याय च तत्र द्रव्यविशेषविशिष्टक
र्मविधिरेवांगीकर्तुं युक्तः। ननु तत्र प्रकृतकर्मप्रत्यभिज्ञानाभावाद् गत्या विशिष्टविधिरंगीकृ
तः इह प्रकृते दर्शकर्मणि प्रत्यभिज्ञायमाने नैवं मिति कदेवतान्तरमात्रविधाने लाघवे संभव
ति न विशिष्टविधिगौरवमंगीकर्तुं युक्तमिति चेन्न। आग्नेयवाक्यन्यायेन प्रकृतकर्मप्रत्यभिज्ञा
नमनादृत्याप्यवाक्यभेदाय विशिष्टकर्मान्तरविधेरेवांगीकर्तुमुचितत्वात्। तथाहि। दर्शप्रकरण

© Dharmartha Trust J&K. Digitized by eGangotri

एवंकृते यस्योभयं हविरार्त्तिमार्च्छेदैंद्रं पंचशरावमोदनं निर्वपेदितिवाक्ये आर्त्तिदोहप्रतिनिधि
त्वेन पंचशरावद्रव्यमात्रं कर्मणः साधनं विधीयते न द्रव्यदेवताविशिष्टकर्मांतरं गौरवादिति पक्षे
पंचशरावस्य द्रव्यकृते प्रतिनिधिः स्यादिति सूत्रेण पूर्वपक्षं कृत्वा सिद्धांतितं· आर्त्तिकर्मणि पंचश
रावद्रव्यमैंद्रो देवतेति द्वयं विधातुं न शक्यते वाक्यभेदप्रसंगात्। न च सान्नाय्यप्रतिनिधौ पंचशरा
वे सान्नाय्यदेवतायां इंद्रस्य स्थानापत्त्या प्राप्तिसंभवादिंद्रशब्दोनुवाद इति वाच्यं· सान्नाय्ये महे
129 द्रस्यापि कदाचित्संभवेनेंद्रस्य नित्यप्राप्त्यभावात् तस्मान्नित्यतयेंद्रस्यापि विधेयत्वाद्वाक्यभेदः स्या
दित्यवाक्यभेदाय द्रव्यदेवताविशिष्टदोहार्त्तिनिमित्तकर्मांतरविधिरेवांगीकर्त्तव्य इति· एवं च द्रव्या
संस्कृतस्य सान्नाय्ययागस्य द्रव्यापेक्षायां स्फुटायामपि यदि सत्रादीक्षितानां साम्युत्तिष्ठेत्
ते सोममपभज्य विश्वजिता यजेतेति वाक्यसंकल्प्यमध्ये सत्रं त्यक्त्वा निष्क्रांसोः सोमक्रयात्पूर्वंप १२९

ध्वाद्धाविशेषेण प्रायश्चित्तविधायकमिति साम्युत्थाने विश्वजिक्रीति विभागसंयोगादिव्यधि
करणे निर्णीतिसोमविभागवच नभ्यसोम क्रयानंतर कालोत्पत्तिश्च आसुयजमान कर्तृकस्व कीयसो
मांशविभागानुवादकत्वव देंद्रशाश्चस्येंद्र्याजीयजमानोद्देश्यदेवतानुवादकत्वमिति पक्षस्या
प्यानुवादकत्वाभ्युपगमेन कथंचिद्वाक्यभेदस्य परिहर्तुंशाक्यत्वेप्येंद्रपदस्य विधेयसमर्पकत्वे
संभवति निरर्थकपाक्षिकानुवादत्वं कल्पनीयमिति न्यायमात्रमवलंब्या वाक्यभेदायकमां
तरविधावंगीकृते किमुवक्तव्यमभ्युदयेष्टिवाक्ये कर्मांतरविधिरंगीकर्त्तव्य इति। नहि तत्रेंद्र
संबंधस्यैवात्र यत्किंचिद्रव्यदेवतासंबंधस्य पक्षे प्राप्तिरस्ति। येन दधिवाक्ये घृतवाक्ये वप्रति
द्रव्यं देवतासंबंधबोधन कृतो वाक्यभेदः कथंचिदपि परिह्रियेत नवात्र द्रव्यमात्रविधिपक्षोस्यापक
प्रकृतकर्मगतद्रव्याकांक्षानिमित्तद्रव्यापचारानुकीर्त्तनिवदिह देवतामात्रविधिपक्षोप्यापकदेव

तोकांक्षानिमित्तदेवतापवारानुकीर्त्तनामस्ति॰ नचत्रेधातंदुलानितिवाक्यस्यदेवतापनयनविधि
परत्वंस्पष्टंयेनतद्विधिबलादपनीतपूर्वदेवतानांहविषांदेवताकांक्षास्तीतिसमर्थ्येतकिंतुतंडुल
शब्दस्यसाधिकहविःसामान्यलक्षकत्वकल्पनयातद्विभागप्रतियोगिनीनांशब्दानुपात्तानांदे
वतानांकथंचिद्बुद्धिकरणेनवातन्निष्टंकल्पनीयंनचैवंकल्पनायांकिंचिकल्प्यमस्ति। म
130 ध्यमादिवाक्येषुप्रकृतहविषांदेवतान्तरविधिरेवतदाकांक्षार्थंपूर्वदेवतापनयमपेक्ष्यमाणस्त्रे
वाक्यस्थापितद्विधायकत्वकल्पकइतिचेन्न॰ वाक्यभेदप्रसंगेनतेषांप्रकृतहविःसंबंधिदेव
तान्तरविधिपरत्वासिद्धेः। देवतापनयविधिबलाद्देवतेषांदेवतान्तराकांक्षयासोऽपिवाक्यभेद
मध्यमादिवाक्येषुदेवतान्तरविधिरभ्युपगम्यतइत्युच्यतेचेत्परस्पराश्रयोनातिवर्त्तितुंशक्यते। ननु
मध्यमादिवाक्याबाप्रकृतकर्मसंबंधिगुणमात्रविधायकत्वसंभवतिप्रकृतहानमप्रकृतकल्पनंवि १३०

© Dharmartha Trust J&K. Digitized by eGangotri

शिष्टविधिगौरवमपूर्वकर्मान्तरकल्पनागौरवं चावश्यं परिहरणीयं। संभवति चात्र प्रकृतहविःसंबं
धिदेवतामात्रविधानं। यदि तत्पादद्धिधिघृतवाक्ययोः प्रति द्रव्यं देवतासंबंधबोधनेन वाक्यभेदोस्ति अ
स्तु स एको दोषः न ह्येकस्माद्दोषाद्बिभ्यता बहवो दोषाः स्वीकरणीयाः यदि वाक्यभेदोवश्यं परिहर
णीयस्तदा मध्यमं दधिवाक्यानीद्व्यदेवताविशिष्टैकप्रयोगविधायकत्वमस्तु तत्र चानेकगुणविशि
ष्टैककर्मविधावपि वाक्यभेदो न प्रसरति। प्रकृतहानमप्रकृतकल्पनमपूर्वकर्मान्तरकल्पनं च न प्र
वति प्रकृतस्यैव दर्शकर्मणो द्रव्यदेवताविकारविशिष्टप्रयोगविधानादिति चेत् तर्हि तत्रिवाक्येप्येवमेव
कर्मान्तरविधिर्न स्यात्। वस्तुतस्तु तत्रैवार्जवेन द्रव्यमात्रविधिर्द्रव्यदेवताविशिष्टैकप्रयोगविधिरि
ति कल्पनेन प्रकृतहानाद्ययः पतिहर्तुं शक्यं ते तत्र द्रव्यमात्रविधिपक्षेप्यैन्द्रपदस्य पक्षप्राप्तानुवाद
कत्वेन वाक्यभेदपरिहारसंभवात् इह देवतामात्रविधिपक्षे तत्परिहारासंभवात्। तस्यैकस्यैव लिङः
श्रवणेननावद्धि कारदैशिष्टैकप्रयोगविधायकत्वसंभवात्। अत्र तु विधायकानां लिङां मनेकत्वा

© Dharmartha Trust J&K. Digitized by eGangotri

द्धिकाराणांचानेकवाक्यगतत्वे ननावद्धिकारविशिष्टैकप्रयोगविधायकत्वकल्पनानवकाशात्. नवम
ध्यमादिवाक्येष्वेकैकवाक्योदितविकारविशिष्टप्रयोगत्रयंविधीयत इति युक्तंनवासिद्धांताभिमतमेक
स्मिन्नेवप्रक्रांते दर्शप्रयोगेऽकालोपक्रमनिमित्तदेवताविकारमात्राभ्युपगमात्. परमार्थतस्तु उ
भयत्रापि प्रयोगविधिपक्षस्तुच्छः प्रक्रांतस्य दर्शप्रयोगस्य यावज्जीववाक्येन काम्यवाक्येन चाविहित
स्य विध्यंतरानपेक्षितत्वात्. प्रयोगांतरविधेस्त्वनभिमतत्वादभ्युदयेष्ट्यधिकरणे प्रक्रांत एव प्रयोगे दे
131 वताविकारोपपादनात्. दधिघृतविशिष्टप्रयोगस्यासन्नयतानुष्ठातुमशक्यत्वेन सन्नाय्यसंयोगात्
सन्नयतः स्यादित्यधिकरणेऽसन्नयतोप्यभ्युदयेष्टिं व्यवस्थापितवता सिद्धांतिना मध्यमादिवाक्येषूत
त्र दैवतान्वित दधिघृतविशिष्टप्रयोगविधेरंगीकर्तुमशक्यत्वाच्च दधिघृतयोर्देवतांतरविधानार्थमनुवा
घृते हि पक्षप्राप्तयोर्यथाप्राप्तिपाक्षिकमनुवादद्वसन्नयतोपि सास्यादनुविधेयत्वेन च वाच्यं विधेय
तत्र दैवतान्विताभ्यां यथाप्राप्त्यनुवादाभ्यां दधिघृताभ्यां विशिष्टः प्रयोगो विधेयः स्यादिति. विधिवि १२१

षयविशिष्टांतर्गतस्य विधेयसंदष्टस्य दध्नः श्रृतस्य सोमारौद्रं चरुं निर्वपेच्छुक्लानां व्रीहीणामित्यत्र व्रीहि
विशेषणस्येवानुवाद्यत्वायोगात् तस्मान्मध्यमादिवाक्येषु प्रक्रांते दर्शकर्मणि गुणविधिरेष्टव्यः। ननु
तर्हि गुणविधिरेवास्तु यस्य हविर्निरुप्तमित्याद्यधिकारविशेषणाद् अकालोपक्रांतप्रकृतकर्मप्रत्य
भिज्ञानेनाप्यनितित्रगुणमात्रविधानमतिलंघ्य गुणविशिष्टकर्मांतरविधिकल्पनायोगात्। ज्ञाते वै
वंप्रत्यभिज्ञाबलाद्गुणविधितास्पर्येतदनुरोधेनापतन्नेके द्व्यो ह्येनदेवतागुणविधानप्रयुक्तो
वाक्यभेदो न दोषः द्रुतिवेदे वंतस्यापि वाक्येष्वेवमेव गुणमात्रविधिः स्यात् तत्रापि यस्योभये हवि
रित्यधिकारविशेषणतः सान्नाय्यहविष्कप्रकृतकर्मप्रत्यभिज्ञानात् यत्तु हविर्नशिकर्मणि एव नास्या
त्र प्रकृतकर्मप्रत्यभिज्ञानास्तीति। तन्नुच्छं। उपात्तहविर्नाशे हविरंतरोत्पादनेन कर्मानुष्ठानस्य शेषा
दवदाननाशे स्यात्तदर्थत्वादित्यधिकरणेन व्यवस्थापितत्वेन यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयुरपहरेयु

© Dharmartha Trust J&K. Digitized by eGangotri

वाज्येन नादेवताः परिसंख्यायज्ञेनेतिश्रवणेन च कर्मलोपाप्रसक्तेः कालकृतमितिप्रसिद्धेरत्राप्यका
लोपक्रांतकर्माभावेन प्रत्यभिज्ञानाभावस्य वक्तुं शक्यत्वाच्च· तस्मादार्भिवाक्येषु मध्यमादिवाक्ये
ष्वपि कर्मान्तरविधिरेव वक्तव्य इति नास्ति तत्र द्वार्शिहविषां पूर्वदेवतापनयस्योपयोगः कर्मांतरविधौ
तंडुलादीनामुपादेयत्वेन प्रकृतग्रहणेकारणाभावात्· ये मध्यमादिति यच्छब्दस्य सतोपि द्रव्यविशिष्ट
132 कर्मविधौ तंडुलानामुद्देश्यतापादनासमर्थतया पक्षकामेष्टिगतमध्यमादिवाक्यस्थैतयच्छब्दस्यैवा
विवक्षितार्थतायाएवमाप्तेः। अत एवातंचनाभ्यासलिंगसमर्थने कर्मांतरविधिपक्षे प्रकृतद्रव्य
ग्रहणाभावोभ्युदयेष्ट्यधिकरणएव वर्णितः। एवं हितनु। यदि विभियाद्भिमोदेष्यतीति महाग्ने
हवींषि निर्वपेत्। फलीकृतैस्तंडुलैरुपासीताद्दधि हविरांतंनाथं निदध्यादर्धनयद्यभ्युदियात्तेना
तं अपरेद्युः प्रदिनान्ये द्युस्तेन ब्राह्मणान् भोजयेदिति। अस्यार्थोयः प्रवृत्तदर्शतंत्रो यजमानः किम १३२

© Dharmartha Trust J&K. Digitized by eGangotri

घ्यवनुर्दश्यामेवामावास्याश्रांसूादर्शः प्रारब्धः किंचंद्रमाऽभ्युदेष्यतीतिशंकयाभयं प्राप्नुयात्सम
हत्यामेवरात्रौ व्रीहीन्निरूप्याहवेनीसफलीकृत्योदीक्षमाणआसीत। सायंदोहसंपादितंचद
धिद्विधाविभज्यतदर्धंमुख्यकालेक्रियमाणस्यदर्शस्यार्थेतत्पूर्वदिनसायंदोहसंपाद्यदध्यातं
चनायनिदध्यादर्धंतिरंतदर्थंननिदध्यात्। एवंकृतेयद्यभ्युदयःस्यात्तदामुख्यकालोदर्शप्रारंभ
नैनरंमातंचनार्थंनिहितेनार्द्धेनदध्नासायंदुग्धेपयस्यातंचनंकृत्वादभ्युसाध्यान्येपुरंधियागंनि
निर्वर्तयेत्। यदिनाभ्युदयस्तदानीमातंचनार्थंनिहितादधदिन्येनार्धेद्दर्शनिर्वर्त्तेसत्कतदर्थंदध्यु न
स्यादनानपेक्षणेनातंचनार्थंनिहितमर्धंब्राह्मणभोजनेनप्रतिपादयेदिति। तदेतदातंचनाभ्या
सदर्धमंसिद्धांततलिंगत्वेनवर्णितं। यदिकर्मांतरमभ्युदयेष्टिःस्यात्तदापशुकामेष्टाविवदधिप
तयोरधिकरणत्वेनप्रणीताकार्यविधानादुपादेयत्वंचेन्नेप्रकृतग्रहणप्रमाणाभावात्लौकि

© Dharmartha Trust J&K. Digitized by eGangotri

कृष्टवदग्निपर्यग्निवज्ञ्रपणीकृतासाद्यंक्षोदेहिनाकालकृतेनापिप्रायश्चित्तनिर्हृतकालात्ययापराधदोषे
णमुख्यकालेदर्शः कर्तव्योनदध्यंतरमुत्पादनीयं।यद्विकालप्रक्रांतमेवदर्शकर्मदेवताविकारयु
क्तंसदभ्युदयेष्टिः स्यात्तदर्थंकृतेनदध्नातस्यैवानुष्ठितत्वान्मुख्यकालकर्तव्यदर्शार्थमवश्यंदध्यं
तरमुत्पाद्यमितिअर्थवदातंचनं।तन्नामुख्यकालकृतसायंदोहार्द्धे नैवातंचनंकार्यमित्येतावा
133 न्विशेषोविधीयतइति।नन्वेवंसतिशांतिकर्मणिवेतालोदयः कर्मांतरविधिपक्षेप्रकृतग्रहणप्र
माणाभावप्रदर्शनार्थमितंचनाभ्यासलिंगमुपवर्णितंतत्वयैवकर्मांतरविधौलिंगानुपपत्तिरु
द्भाविता अतः कर्मांतरविध्युपगमोनयुक्तइतिचेन्न।उच्यते।अ[illegible]चनाभ्यासलिंगसमर्थ्यमाने
नसिद्धांतिनाकर्मांतरविधिपक्षेप्रकृतग्रहणाभावः समर्थितइत्येतावदस्माभिरिहापन्यस्तंनत्वा
तंचनाभ्यासेलिंगत्वमनुमोदितं।अकालकृतदध्नः कर्मनिवृत्तियाप्यातंचनाभ्यासोपपत्तेः प्राय १३३

© Dharmartha Trust J&K. Digitized by eGangotri

श्चित्तेनाकालकृताग्निप्रणयनदेवतापरिग्रहादिशास्त्रोपचारनिर्हरणवदकालकृतदर्शः क
र्मांगत्वमपितेनकृतमितिस्वत्रप्रमाणाभावात्. नहिस्तेयप्रायश्चित्तेनस्तेयदोषनिर्हरणवत्स्तेय
लब्धद्रव्यस्यकर्मार्हत्वमपिक्रियतेएवंकर्मांतरविधिपक्षेप्रकृतद्रव्यग्रहणंनशक्तिरितिसिद्धा
समिमानमनुत्पत्त्यर्देवतापनयविधेरनुपयोगउक्तः वृक्षनस्तस्मिन्नपिपक्षेप्रकृतद्रव्यग्रह
णानियमोऽस्त्येवयतस्तल्लिंगमेवयदिविज्ञियादित्यादिवाक्यमध्यमादिवाक्यवर्जागमर्त्ति। तथा
हिफलीकृतैरुपासीतेतिफलीकरणपर्यंतमेवकृत्वातंडुलप्रावविनाशकंपेषणमकृत्वाभ्युद
यसदृशत्वावनिर्णयपर्यंतंप्रतीक्षणविधानादिदंज्ञायतेमध्यमादितंडुलविभागापेक्षायामभ्यु
दयेस्यामेतएवतंडुलादृष्टम्न्यथापेषणान्मागेवप्रयोगमवस्थाप्यप्रतीक्षणमदृष्टार्थंस्यात्।
तथाआतंचनार्थस्यदध्यर्थस्याभ्युदयाभावपक्षइवतदन्यस्मदध्यर्थस्याभ्युदयपक्षेप्रतिपत्त्यन

© Dharmartha Trust J&K. Digitized by eGangotri

भिधानादिदं ज्ञायतेऽभ्युदयेष्ट्यां तदेवान्यदर्धं दधीत। अन्यथाभ्युदयाभावपक्षे दध्यंतरोत्पादनस्यानपे
क्षितत्वात् तं तु नार्थ दध्यर्धस्य प्रतिपत्त्यपेक्षावदभ्युदयपक्षे तद्दधिशब्दस्य लौकिकदधिसाध्यायामभ्
युदयेष्ट्यां दध्यंतरोत्पादननिर्वर्त्यमुख्यकालदर्शेष्वानुपयोगात् प्रतिपत्त्यपेक्षास्तीति तत्प्रतिपत्तिरप्यु
पवर्ण्यते। तथा विष्णुर्वेशिपिविष्टाय शृतं चरुमिति शृतपदप्रयोगात् ज्ञायतेऽभ्युदयेष्ट्यां वैदिकप्र
सिद्धयागद्रव्यस्य शृतशब्दवाच्यः पातदोह एव प्रयोगान्न तु लौकिकं पयसि। अन्यथा आदित्यः प्रायणी
134 यः पयसि चरुरित्यत्रैव पयः शब्द एव प्रयुज्येत। ननु पशुकामेष्टौ लौकिकः पयःसाध्यायामपि शृ
तपदं श्रूयते। सत्यं। तत्र शृतशब्दः श्रपणवतो लौकिकपयसो लक्षणार्थ इति सूत्रकृतैवोक्तं पशु
कामेष्ट्यधिकरणे। लक्षणार्थाश्शृतश्रुतिरिति। न चेह लक्षणायां प्रमाणमस्ति। प्रकृतस्य शृ
तशब्दमुख्यार्थस्य संभवात्। ननु कर्मान्तरार्थद्रव्याणां कर्मान्तरार्थत्वमयुक्तमिति चेत्। किमेक २३४

© Dharmartha Trust J&K. Digitized by eGangotri

स्मिन्नपि वा कर्मणि देवतां तदर्थद्रव्याणां देवतां तदर्थत्वं युक्तं । वचनबलाद्युक्तमिति द्वभयत्रापि तुल्यं ।
एवं च कर्मान्तरपक्षेप्याप्तं वचनाभ्यासत उपपन्नः । प्रकृतस्य द्रव्यः कर्मान्तरे विनियुक्तत्वे न मुख्यकालक
र्तव्यदर्शे दध्यन्तरापेक्षा प्रसक्ता । एवं तर्हि देवतापनयविधेरनुपयोगः । प्रत्यक्षश्रुतस्याद्यार्थिकद्रव्या
णां कर्मान्तरेभ्युदयेष्टौ विनियोगार्थं दार्शिकदेवतापनयविधेरपेक्षितत्वात् । अर्थसिद्धे विधेर्ना
स्त्युपयोग इति चेत् । एवं पूर्वश्लोकप्रदर्शितार्थसिद्धत्वहेतुनैवात्राप्यनुपयोगवर्णनायामत्र श्लो
त के समर्थितस्य कर्मान्तरत्वस्याहेतुतया द्वैयर्थ्यप्रसंग इति चेत् । उच्यते । पूर्वश्लोके तं तुल्यादिवि
वोपांशुयाजाज्यदेवतापनयस्यार्थसिद्धत्वाभावात्तत्र तद्विधेरर्थवत्त्वमित्याशंकामावास्याया
मुपांशुयाजाभावसमर्थनेन निराकृता । अत्र तु तस्यामभ्युपगम्याप्युपांशुयाजमभ्युदयेष्टेश्रु
तः कर्मान्तरत्वसमर्थनेन सा निराक्रियते । कर्मान्तरत्वे हि तत्रोपांशुयाजाभावेन तद्विषयतयादे

© Dharmartha Trust J&K. Digitized by eGangotri

वतापनयविधेरर्थवत्तानभवतीतिभावः एवंनत्वाभ्युदयेष्टेः कर्मान्तरत्वेपितद्देवताभ्यः प्रकृतद्दविषांविभ
जनविधिः स्यादेवतुपांशुयाजाज्येतस्यार्थवत्ताकर्मान्तरोभ्युदयेष्टावुपांशुयाजाभावेपिप्रकृतहविरं
तर्गतोपांशुयाजाज्यस्याभ्युदयेष्टिदेवताभ्योविभजनापपत्तेरित्साकाङ्क्षो मुद्राव्यनिराकरोति। तर्हि ग्रं २
स्याद्देवताभ्यः प्रविभजनविधिस्तत्रतण्डुलामिनीभ्योनस्यादेवंहिसर्वास्वपिदधिघृतयोर्देवतास्वन्वयः
135 स्यात्। तस्मिन्वाक्यविधेयंविभजनमिहवक्ष्यमाणप्रकारंनस्यादौपांशुयाजेद्दविषितदिति
त्सर्वथाव्यर्थमेव॥ यदिप्रकृतहविषामविशेषेणाभ्युदयेष्टिदेवताभ्योविभजनमाक्षिप्तमतंतदा
दधिघृतयोरपिसर्वदेवतान्वयः स्यात्॰ ततस्तत्रतयोर्विशिष्यसंकीर्तनंस्यविशेषणिषेध्वतंडुलैः
सहश्रपणनियमार्थंस्यात्॰ अथवक्ष्यमाणप्रकारेणविभजनविधिस्त्रेधातंडुलान्विभजेदिति १३५
वाक्यंगीक्रियते। तथाचदधिघृतयोर्वक्ष्यमाणदेवताविशेषव्यवस्थानभज्यतद्दतिमतंतदेपां

© Dharmartha Trust J&K. Digitized by eGangotri

श्रुयाजाज्येवक्ष्यमाणोदेवतान्वयप्रकारोनास्तीतिविभजनवाक्यंतद्विषयत्वेनार्थवन्नभवेत्‌ः
तंडुलदधिघृतेषुतुतद्वाक्यैरेवतथातथाविभजनंसिद्धमितिसर्वथाव्यर्थमेवत्रेधातंडुलानितिवाक्यं·
अतस्तंतुलशब्दलक्षणाक्लेशोपितद्व्यर्थ्यनिपायान्नम्ययथाश्रुतानुवादकत्वमेवयुक्तमितितन्नवि
ध्यभावान्नहिध्यव्याप्तिवर्णनमप्यसमंजसमितिभावः एवमाक्षिप्तेपूर्वविध्यादीनांलक्षणेषूद
हरणेषुचलक्षणानिचव्यवस्थापयितुंनियमपरिसंख्यालक्षणसंग्राहसंदेहपदानिनिर्धारि
तान्येवलक्षणव्यवस्थापनंप्रतिजानीते।एवंप्राप्तेभणामस्त्रिविधविधिजुषांलक्षणानांविभा
गंदृष्टार्थेयःससर्वोभवतिनियमइत्यभ्युपेत्यमव्यवस्थां।अर्थाद्वाशब्दतोवास्वविषयगलितादेव
कारान्नत्वोवायःस्यात्कस्यापिबाधःसभवतिपरिसं-ख्येतिरीतिंवक्ष्यामः।प्रागव्यतान्यादि
विधीनांदृष्टार्थानामप्राप्तविषयत्वादपूर्वविधित्वमंगीकृत्यतेषुलक्षणाव्याप्तिरुक्ता·पूर्तीघोको

© Dharmartha Trust J&K. Digitized by eGangotri

रमंत्र नियमविध्यतिव्याप्त्युद्भावनेन तत्समानन्यायतया सर्वेषामपि दृष्टार्थविधीनां नियमविधित्व
मपि सूचितं। तथा निषेधरूपविधिष्वपूर्वविधिलक्षणाव्याप्त्युद्भावनेन दीक्षितो न जुहोतीत्यादीना
मपूर्वविधित्वं सूचितं॰ तथा निषेधेष्वभावस्य परिसंख्यात्वाभ्युपगमोप्यसूचि॰ तेनात्र नियमपरिसं
ख्यालक्षणसंप्राप्तासंदेहमात्रमाविरभुच्यते॰ अप्राप्तविषयः प्राप्तविषयो वा यो विधिर्दृष्टार्थः स सर्वोपि
नियमविधिरित्यभ्युपगच्छामः। अप्राप्तविषयेपि तस्मिन्नियमादृष्टाभ्युपगमावश्यंभावात्॰ तथाहि
136 दृष्टार्थोप्राप्तविधिविषयो द्विविधः विधिं विना स्वतः प्रसिद्धदृष्टप्रयोजनजननसामर्थ्यो विधिबलप्र
सादनिरततज्जनकं नसामर्थ्यश्च। तत्र द्वौ दुंबरो भूयो भवती स्याद्यः प्रकृतौ यूपे पक्षप्राप्तोप्युदुंबरः
स्वदिरादिनियमविधिना निवर्तितः इति विकृतावपि चोदकाद्बदिरादेः प्राप्तप्रतिप्रसवविधिविषय १३६
न्यायेन सोमापोहपशावप्राप्ते वोदुंबरजातिरुपात्त्वादिविशिष्टस्वरूपाकृतिजननेन स्वतः एव प्रसिद्धि

© Dharmartha Trust J&K. Digitized by eGangotri

सामर्थ्याच्च · तत्र राघारथास्वाच्छेदनमंत्रोक्तपरिध्यादिर्द्वितीयः विधिवत्लोदेपरि हिरण्यगर्भे मंत्रस्य
गौणवृत्तिकल्पनया हूं दूष्प्रकाशने इषे त्वेति मंत्रस्याच्छिन्नमीत्यध्याहारेणशाखाच्छेदनप्रकाशनेन
कारस्य एकवग्रताकारणेन वाजिनपात्रधारणेपरिधेः स्यविरग्रहणेन पशुनियोजने च सामर्थ्यं प्रसा
धनीयं ततश्च तद्दैविध्यात्तद्विषयो विधिरपि द्विविधः एवं द्विविधेऽप्यप्राप्तिफलके दृष्टार्थविधौ नियमा
दृष्टाभ्युपगम आवश्यकश्चोदकप्राप्तस्वादिरादिनापि संभवति यूपादिस्वरूपमात्रेण तु वरादिनिय
मविधानस्यानर्थक्यात् · अत एवाहुः । दृष्टार्थेष्वपि सर्वेषु नियमाद्दृष्टमिष्यत इति · अन्यथाऽदन ३५
नादिनियमविधावपि नियमादृष्टकल्पनं न स्यात् · नानोपायसाध्ये दृष्टप्रयोजने विधिदृष्टस्य वि
न्नियमोऽनर्थकस्तस्य कृत्वपूर्वेऽपि योगित्वमपि तज्जन्यं द्वारं विनानुपपन्नं · कृत्वपूर्वस्यप्रधानानु
ष्ठानानंतरभाविवादित्येतदेव हि तेषु नियमादृष्टकल्पनायां बीजं · तदिहापि तुल्यं · नियमादृष्टा
भ्युपगमे च नियमविधित्वमेव प्राप्नोति अत एव पूतीकविधेः पक्षप्राप्तविषयत्वाभावेऽपि नियमवि

© Dharmartha Trust J&K. Digitized by eGangotri

धित्वं सर्वद्रव्यविधयो नियमविधय इत्याकारेण सकलमीमांसकप्रवादश्च· अपि च नावसिके पत्नी
संयाजाधिकरणे पत्नीसंयाजांतान्यहानि संतिष्ठंत इत्यस्य भाष्यादिषु यन्नियमविधित्वमुक्तं न तदप्य
प्राप्तेस्यैव पत्नीसंयाजांतत्वस्य हत्वार्थतामात्रेण ननु तस्य पाक्षिकप्राप्त्यात दसंभावात्· तद्धि· यद्यपि
द्वादशानामन्हां सह प्रयोगवचनात्सूर्वं पूर्वमन्हः कस्मिंश्चित्पदार्थे च परंपरमुपक्रमितव्यं। तथापि प
त्नीसंयाजेष्ववस्थापनं पक्षेपि न प्राप्नोति। उपांश्वादि हारियोजनपर्यंतः सोमयागो ह्यश्वमेधे नोच्य
137 ते। यथोक्तं तंत्ररत्ने· ज्योतिष्टोमेन्हः शब्दे न उपांश्वादि हारियोजनपर्यंतः सोमयागः परिच्छिन्न द्व
हापि द्वादशाह एवं द्रष्टव्यमिति। तथा च सहत्वसिध्यर्थं हारियोजनानंतरमेवावस्थानं प्राप्नोति· य
दि तु वसतीवरीपर्यंतानि पूर्वाणि तंत्रमध्यकालत्वादेव अप्यादीन्यनंतराणि तस्य दीक्षाविसर्गार्थादिति
सूत्रोक्तरीत्या द्वादशाहे वसतीवरीपर्यंतानां पूर्वेषाम अप्यादीनां उत्तरेषां चांगानां तंत्रेपि भेदक १३७
तद्वदकर्मभेदः प्रयोगः स्यात्तेषां प्रधानभेदादिति सूत्रोक्तन्यायेन प्रधानैः पृथक्कालान्यंगानि त

© Dharmartha Trust J&K. Digitized by eGangotri

तत्प्रधानकालभेदेनानुष्ठयानीतितन्तत्कृत्स्नाकालीनानामैष्टिकप्रयोगसमाप्त्यनंतरमेवावस्थानं
प्राप्नोतिसर्वथापिपत्नीसंयाजानंतरमवस्थानस्यनप्राप्तिकीप्राप्तिरस्ति॰ तथा चपत्नीसंयाजांतोऽग्नी
षोमीयःसंतिष्ठतइतिवदप्राप्तविधिरेवायं॰ तथापिसर्वंह निर्वाहकतयादृष्टार्थनासत्वात्तावन्मात्रेणनि
यमविधित्वंभाष्यादिषूक्तमितिसमर्थनीयं ऽअनियमेप्राप्तेपत्नीसंयाजांतेसंस्थातव्यमितिनियमस्य
तइतिभाष्यंवाहारियोजनांतत्वादेरेवप्राप्त्यापत्नीसंयाजांतनियमस्याभावेप्राप्तइत्येवंयोजनीयं॰
यस्मिन्कस्मिंश्चिदनियमेनावस्थानेप्राप्तेपत्नीसंयाजांततानियम्यतइतितंत्ररत्नमपिहारियोज
नग्रहचारेपश्चादिहसमापनकर्मणिवायस्मिन्कस्मिंश्चित्पत्नीसंयाजांतनियमंविनावस्थानेप्राप्त
इतियोजनीयं॰ ननुयथाश्रुतेतथात्वेपत्नीसंयाजांततायाअनियमतःप्राप्त्यसंभवोक्तत्वात्॰ परिसंख्या
लक्षणाक्षेपेतुयथाश्रुतभाष्याद्यनुरोधादनियमोऽस्माभिरुपन्यस्तः तस्माद्दृष्टार्थःसर्वोविधिर्निय

© Dharmartha Trust J&K. Digitized by eGangotri

मविधिरितियुक्तमेव· न चैवं पुत्रेष्टिकारीर्थात्विधेर्नियमविधित्वप्रसंगः। अदृष्टद्वारकत्वस्यापिवि
वक्षितत्वात्· तयार्थात्वास्वापि विषयप्रभुतात्वास्तएकशाह्वाह्वाएवकारग्रहणात्रूपस्याह्वालभ्यो यस्य
कस्यापि भावस्यापि भावस्य बाधो बाधः ससर्वोपि परिसंख्येति मर्यादां कुर्महे· तत्राति रायस्त्रो बर्हिः
प्रतिसमानायते जुह्वामोपभृतमित्यर्थात् उपरितनप्रयाजहविर्जो हवाज्यस्य प्राचीनप्रयाजत्रये
138 औपभृतान्यस्य बाधः द्वैआहवनीयजुह्वत्यत्र यदाहवनीये जुहोतीति सामान्यशास्त्रप्राप्तेविधिस्व
रूपविषयप्रभुतादप्राप्तनिषेधरूपार्थान्तरलक्षकात्तस्मादेवशाखाद्‌ग्निहोत्राजुहोत्यंतराभ्या
सेष्वाहवनीयबाधः अत्रत्येवावपंतीत्यत्रैवकारेण पवमानातिरिक्तस्तोत्रेष्वावापबाधः। नतो
पशोकरोति इत्यत्र नञ्रूपदेन पशावाज्यभागबाधः। स्यान्नैतदेतन्न। नयपदलभ्यः सर्वोपिनिषेधः ९३८
परिसंख्येसंगीकर्तुंयुक्तं विधाविव निषेधेपि अपूर्वविध्यादिरूपेण त्रैविध्यसंभवात्· शक्यतेहि

© Dharmartha Trust J&K. Digitized by eGangotri

दीक्षितो न जुहोतीत्यादिरपूर्वविधिः न हिंस्यादित्यादिर्नियमविधिः नानुयाजान्नित्यादिः परिसंख्ये
ति वक्तुमिति चेद् । मैवं परिसंख्यायाः शब्दार्थवर्जनबुद्धिजनकस्य नञोऽपि परिसंख्यात्वस्यापत्यारव्य
पतस्मात योगे न जुहोति न हिंस्यादित्यादेरपि परिसंख्यात्वस्यानिवार्यत्वात् । तत्र चान्यत्र च प्रा
प्राप्तद्रुतिलक्षणानुसारेणापि तस्य परिसंख्यात्वप्राप्तिः तद्व्यावर्तनाय तत्र विशेषणान्तरं विविक्षा
र्यं वा । परिसंख्यालक्षणाक्षेपे दूषितत्वात् । अत्र ह्येवावपन्तीति परिसंख्यायां तत्र चान्यत्र च प्राप्त
द्रुति यथाश्रुतलक्षणास्याव्याप्त्यभावाच्च तस्मात्स्वार्थो लक्ष्येण वकारो प्रतिपाद्योऽनर्थभूतश्च
सर्वोऽपि निषेधः परिसंख्येति युक्तं । उक्तं च न्यायसुधायां परिसंख्या वर्जनबुद्धिस्तद्दर्शनं त्वत्रादिः प
रिसंख्याशब्दस्य योगात् ब्राह्मणेन हन्तव्यो नेक्षितोद्यन्तमादित्यमित्यादौ नामैवं कृत्वा परिसंख्या
त्वं निषेधे पर्युदासविशेषव्यपदेशात्तु व्यवहारासिद्धेर्न परिसंख्याव्यपदेशः सत्यमेव वदितव्यमित्या

© Dharmartha Trust J&K. Digitized by eGangotri

दीनामेकक्रत्यानियमत्वं॰अन्यत्रतुफलेनैवनियमपरिसंख्याव्यपदेशइति॰एवंदृष्टार्थः सर्वोपि
विधिर्नियमविधिरितिसर्वोपिनिषेधः परिसंख्येतिचांगीकृत्यापूर्वविध्यादीनांलक्षणानिविभ
ज्यदर्शयिष्यतइत्यर्थः नान्यदाहसमाप्तोयंग्रंथः॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७ ७ ७ ७ ७ ५५८

तर्क २२ ३२५८

श्लोक २२००